अत्र पञ्चभूतानां पञ्चधिदेवता उक्ताः । भ्रूमध्ये तु परशिवोऽस्ति, लिखिष्यमाणवचनात् ।। २ ।।

विद्युन्मालाविलासा मुनिमनसि लसत्तन्तुरूपा सुसूक्ष्मा
शुद्धज्ञानप्रबोधा सकलसुखमयी शुद्धबोधस्वभावा ।
ब्रह्मद्वारं तदास्ये प्रविलसति सुधाधारगम्यप्रदेशं
ग्रन्थिस्थानं तदेतद् वदनमिति सुषुम्णाख्यनाड्या लपन्ति ॥ ३ ॥

श्लोकान्तरेण तां विशेषयति--**विद्युन्मालेति**। **लसत्तन्तुरूपेति**। लसन्ती दीप्यमाना तन्तुरूपिणी अब्जतन्तुसदृशी कुण्डलिनी यत्र सेत्यर्थः। **सकलसुखमयी** सर्वानन्दमयीत्यर्थः। **शुद्धबोधस्वभावेति**। शुद्धबोधाय तत्त्वज्ञानाय स्वस्य आत्मनो भावो भावना यत्रेत्यर्थः। तदास्ये ब्रह्मनाड्या आस्ये हरमुखकुहरे। ब्रह्मद्वारं कुण्डलिन्याः शिवसन्निधिगमनाय प्रवेशनिर्गमपथरूपमित्यर्थः। **सुधाधारगम्यप्रदेशमिति**। सुधाधारः परमशिवशक्तिसामरस्यनिःसृतामृतधारो गम्यते मूलाधारस्थशिवशक्तिभ्यां लभ्यते येन

**विद्युन्मालेत्यादि। एतस्या ब्रह्मनाड्या एव विशेषणान्याह--विद्युन्मालेति। विद्युन्मालेव विलासः प्रकाशो यस्याः। मुनिमनसि प्रकाशमानमृणालतन्तुरूपा। अतः सूक्ष्मा। शुद्धज्ञानस्य प्रबोधः प्रकाशो यस्याः। अतः कलासहितानां सुखमयी। यद्वा सर्वेषां सुखमयी। शुद्धभाव एवात्मभावो यस्याः। यद्वा शुद्धभावनां स्वे परमात्मनि भावो ज्ञानं यतः सा तथा। तस्या मुखे ब्रह्मद्वारं प्रकाशते। अमृतस्य य आसारः**

ब्रह्मनाडीमाह--तस्यान्तरिति। तस्यां चित्रायां तद्ब्रह्मनाडी प्रसिद्धब्रह्मनाडी। हरमुखकुहरात् मूलाधारस्थ-स्वयम्भूलिङ्गमुखविवरात्। आदिदेवान्तसंस्था ब्रह्मपर्यन्ता। **मायातन्त्रेऽपि**--"शिरा स्याद् ब्रह्मपर्यन्तमि"त्यादि। विद्युन्मालेव विलासो यस्याः सा। पद्मसूत्रतुल्या, अतः सूक्ष्मा। शुद्धज्ञानिनः प्रबुध्यन्ते ज्ञायन्ते यया सा तथा। अमृतस्राविणीत्वात् सकलसुखयुता। भावो मनोधर्मः, स्वभावः आत्मधर्मः, शुद्धो भावः स्वभावो यस्याः सा इति पञ्चम्यन्तबहुव्रीहिः "भावो हि मानसो धर्मः" इत्युक्तेः। येन द्वारेण कुण्डलिन्या ब्रह्मणि गमनं तद् द्वारमाह--ब्रह्मद्वारमिति। तदास्ये ब्रह्मनाड्या आस्ये।

मूलाधारात् सहस्रारस्तदन्तर्ब्रह्मनाडिका।
शिरा स्यात् ब्रह्मपर्यन्तं तदन्तर्द्वारमुत्तमम् ॥

इति मायातन्त्रात्।

ब्रह्मद्वारमुखं नित्यं मुखेनावृत्य तिष्ठति।
येन द्वारेण गन्तव्यं ब्रह्मस्थानं निरामयम्।
मुखेनाच्छाद्य तद् द्वारं प्रसुप्ता परमेश्वरी ॥

## मूलाधारचक्रनिरूपणम्

**अथाधारपद्मं सुषुम्णास्यलग्नं ध्वजाधो गुदोर्ध्वं चतुःशोणपत्रम् ।**
**अधोवक्त्रमुद्यत्सुवर्णाभवर्णैर्वकारादिसान्तैर्युतं वेदवर्णैः ॥ ४ ॥**

द्वारेण तद्रूपप्रदेशमित्यर्थः । **तदेदिति** । तस्य द्वारस्य एतत् समीपवर्त्ति प्रदेशं सुषुम्णाया **ग्रन्थिस्थानं** कन्दसुषुम्णयोः सन्धिस्थानं सुषुम्णाया वदनञ्चेति **लपन्ति** आगमज्ञा वदन्तीति समुदयार्थः ॥ ३ ॥

नाडीं निरूप्य अङ्गप्रत्यङ्गादिसहितं मूलाधारचक्रं निरूप्यते—**अथाधारपद्ममिति** नवभिः श्लोकैः । **सुषुम्णास्यलग्नं** चतुष्पार्श्वे कन्दसुषुम्णयोः सन्धिस्थानसंलग्नपत्रमित्यर्थः । **ध्वजाधो गुदोर्ध्वं** लिङ्गुमूलादधोऽवधि सुषुम्णापर्यन्तमित्यर्थः । चतुःशोणपत्रं रक्तवर्णचतुर्दलम् । **वकारादिसान्तैः**

शीकरस्तस्य गम्यप्रदेशो गमनप्रकृति यदास्यमिति यावत् । "प्रदेशः स्थानमार्गयो"रिति त्रिकाण्डशेषः । तदेतद्वदनं सुषुम्णानामनाडया ग्रन्थिस्थानं सुधियो वदन्तीति । ततस्तया सहास्यलग्नं मिलनं तत्रैवेति ॥ ३ ॥

अथाधार इति नाडीप्रस्तावानन्तरं षट्पद्मानां यथाक्रमं मूलतः सङ्गतिः कथ्यते । अथाधारपद्मं वक्ष्ये इति सम्बन्धः । सुषुम्णाया आस्ये संलग्नं ध्वजाधो गुदोर्ध्वं गुदस्योर्ध्वे अपानस्थाने तत्पद्मस्य अवस्थितिः । चतुःशोणपत्रं चत्वारि रक्ताकारपत्राणि यस्य । अधःस्थितं वक्त्रं कर्णिकादि यस्येति । उद्यत्सुवर्णस्य या आभा तस्या इव वर्णो

इति गोरक्षसंहितावचनाच्च । सुधेति सुधाकणस्रुतिप्रदेशं ग्रन्थिस्थानम् । एतद्द्वारं सुषुम्णाया नाड्या वदनं धीरा वदन्ति ॥ ३ ॥

आधारपद्ममाह—अथेत्यादिना ।

षण्णवत्यङ्गुलायामं शरीरमुभयात्मकम् ।
गुदध्वजान्तरे कन्दमुत्सेधाद् द्व्यङ्गुलं विदुः ।
तस्माद् द्विगुणविस्तारं वृत्तरूपेण शोभितम् ॥

इति शारदोक्तकन्द एव मुख्यनाडी एव ग्रन्थिस्तदूर्ध्वं ध्वजाधः सुषुम्णास्यलग्नम् । तथा च मायातन्त्रे—मुख्यनाडीत्रयं ग्रन्थेरूर्ध्वं वज्राध ईश्वरि ।
रक्तवर्णो वेदवर्णो मूलाधारोऽप्यवाङ्मुखः ॥

इति । उद्यत् प्रस्फुटितम् ।

तयैव ग्रथितं पद्मं मूलादिपद्मपञ्चकम् ।
कलिकाकाररूपेण डाकिन्याद्यवलम्बिकम् ॥

इति वचनात् । पूर्वमेव व्याख्यातं तत् । सुवर्णाभवर्णैरिति । तथाच दक्षिणामूर्त्तौ—

धरामण्डलस्वरूपम्

**अमुष्मिन् धरायाश्चतुष्कोणचक्रं समुद्भासि-शूलाष्टकैरावृतं तत् ।**
**लसत्पीतवर्णं तडित्कोमलाङ्गं तदन्ते समास्ते धरायाः स्वबीजम् ॥५॥**

व श ष स इति **वेदवर्णैर्युतम्** । अत्र षट्चक्रेषु पद्मानां दलावच्छेदे दक्षिणावर्त्तेन वर्णयोगश्चिन्तनीयः । तदुक्तं **विश्वसारतन्त्रे**—

सर्ववर्णात्मकं पत्रं पद्मानां परिकीर्त्तितम् ।
दक्षिणावर्त्तयोगेन लिखनं चिन्तयेद्धिया ॥ इति ॥४॥

**अमुष्मिन् धरायाश्चतुष्कोणचक्रमिति** । एतत्पद्मकर्णिकायां चतुष्कोणरूपं पृथ्वीमण्डलं समास्ते इत्यर्थः । मण्डलं विशेषयति--समुद्भासीत्यादिना । तस्य मण्डलस्याऽष्टदिक्षु प्रकाशमानाष्टशूलैर्युक्तमेतन्मण्डलं **पीतवर्णम्** । स्पष्टमाह--

मूलाधारे धराचक्रं चतुष्कोणं प्रियंवदे ।
पीतवर्णं परिवृतं चाष्टशूलैः कुलाचलैः ॥ इति ॥

शूलैः कादृशैः ? कुलाचलैरिति । कामिभ्याः स्तनसदृशाग्रैरित्यर्थः । यद्वा कुलाचलैरिति ।

नीलाचलं मन्दरञ्च पर्वतं चन्द्रशेखरम् ।
हिमालयं सुबेलञ्च मलयञ्च सुपर्वतम् ।
चतुष्कोणे वसेद् देवि एतत् सप्तकुलाचलम् ॥

यस्य; एवम्भूतैरन्तस्थीयवकाराद्यैर्दलैः सकारान्तैश्चतुर्वर्णैर्युतम् । एतेन एतद्वर्णोपलक्षितदलान्यस्य वक्ष्यमाणस्वदलान्तरालमध्यवर्ति-तद्भूतवर्णत्वात् ॥ ४ ॥

अमुष्मिन् इति । अमुष्मिन् पद्मे धरायाः पृथिव्याश्चतुष्कोणावच्छिन्नं चक्रं सम्यक्प्रकारेण उद्भासितुं शीलं येषाम्, एवम्भूतैरष्टशूलैरावृतं तच्चक्रमिति । श्रीमद्भगवद्भैरवीकलाविर्भूतडाकिन्यादिनिवासभूतत्वात् पृथिव्यादिचक्राणां तन्त्राऽधिष्ठि-

आधारे स्वर्णवर्णेऽस्मिन् पद्मेषु वादिसान्तानि संस्मरेत् ।
द्रुतसौवर्णवर्णानि वर्णानि परमेश्वरि ॥ इति ॥

**सारसमुच्चये** षट्सु पद्मेषु वर्णा बिन्दुयुक्ता ग्रन्थगौरवभिया नात्र प्रकटिताः ॥ ४ ॥

चतुष्कोणचक्रमिति । तथा च **मायातन्त्रे**--

तत्कर्णिकान्तरे पृथ्वी चतुष्कोणा सुपीतभा ॥ इति ॥

तथा **तन्त्रान्तरे**--भूगृहं चतुरस्रं स्यादम्भोवज्रविभूषितम् ॥ इति ॥

धरायाः स्वबीजमिति । तथाच **शारदायाम्**--

वृत्तं दिवस्तत् षड्बिन्दुलाञ्छितं मातरिश्वनः ।
त्रिकोणं स्वस्तिकोपेतं वह्नेरर्द्धेन्दुसंयुतम् ॥

धराबीजध्यानम्

**चतुर्बाहुभूषं गजेन्द्राधिरूढं तदङ्के नवीनार्कतुल्यप्रकाशः ।**
**शिशुः सृष्टिकारी लसद्वेदबाहुर्मुखाम्भोजलक्ष्मीश्चतुर्भागभेदः ॥ ६ ॥**

इति निर्वाणतन्त्रवचनाद् यथा पृथ्वीमध्ये सप्त कुलाचलास्तथात्राऽष्टशूलानि कुलाचलसदृशानीति भावः । **तदन्ते** इति । तस्य धरामण्डलस्यान्ते मध्ये **धरायाः** स्वबीजं लकारः समास्ते । एतद्बीजमपि पीतवर्णम् । तद्यथा—

बीजं तन्मध्यतश्चैन्द्रं पीतवर्णं चतुर्भुजम् ।
वज्रहस्तं महाबाहुमैरावतगजस्थितम् ॥ इति ॥

तेन लसत्पीतवर्णमित्युभयसम्बन्धः ॥ ५ ॥

धराबीजध्यानमाह—चतुरित्यादि । यदेव धराबीजं, तदेव ऐन्द्रबीजमित्यविरुद्धम् । तदङ्के इति धराबीजस्याऽङ्के । **सृष्टिकारी** ब्रह्मा वसेदित्यन्वयः । तदङ्के धराबीजस्य बिन्दुमध्ये इति बोध्यम् । तदुक्तम्—

मूलाधारे धराबीजं तद्बिन्दौ ब्रह्मणः स्थितिः ।
तदङ्के शिशुरूपस्य गजारूढोऽमराधिपः ॥ इति ॥

शिशुरूपस्य ब्रह्मणः स्थितिरित्यन्वयः । तदङ्के धराबीजक्रोडेऽमराधिप इति तु मतान्तरम् । स्वमते धराबीजैन्द्रबीजयोरभेदात्, "मन्त्राणां देवता प्रोक्ता देवता मन्त्ररूपिणी ।" इति वचनाच्च तयोरभेदवर्णनम् । **निर्वाणतन्त्रे** —

तत्वाच्च मूलाधारादीनां चक्रसंज्ञा प्रतीयते । "भैरवीचक्रसंस्थितिरि"त्यादियामलवचनात् । कीदृशं ? लसन् पीतवर्णो यस्य । विद्युदिव अङ्गं यस्य । तच्चक्रमध्ये पृथिव्याः स्वबीजमास्ते सानुस्वारलकार इति ॥ ५ ॥

चतुर्बाहुभूषमिति बीजस्य विशेषणम । चत्वारो बाहवो भूषा अलङ्कारा इव यस्य । गजेन्द्रमधिरूढं, "गत्यर्थाकर्मके"त्यादिसूत्रात् कर्त्तरि क्तः । तदङ्के तस्याङ्के बीजाकारमूर्त्तेरङ्के । प्रातःकालीनसूर्यतुल्यदीप्तिः सृष्टिकारी शिशुर्विराजते । लसन्तश्चत्वारो

अम्भोजमम्भसो भूमेश्चतुरस्रं सवज्रकम् ।
तत्तद्भूतसमाभानि मण्डलानि विदुर्बुधाः ।
वर्णैः स्वैरञ्जितान्याहुः स्वस्वनामावृतान्यपि ॥ इति ॥

तत्तद्भूतसमवर्णानि मण्डलानि । तथा स्वैर्वर्णैः ह-य-र-व-ल-वर्णैर्युक्तानि । स्वस्वनामावृतानि पृथिव्यादीनां स्वस्वनामावृतानीत्यर्थः । एतदनुसारेण सर्वेषु स्वस्वबीजानि ज्ञेयानि ॥ ५ ॥

चतुर्बाहुरिति । अत्र पद्मे ब्रह्मास्तीत्याह—तदङ्क इत्यादिना । नवीनार्कतुल्य-

ऐन्द्रबीजं वरारोहे लिङ्गस्य वामदेशके ।
सुसिद्धं ब्रह्मसदनं नादोपरि सुसुन्दरम् ।
तत्रैव निवसेद् ब्रह्मा सृष्टिकर्त्ता प्रजापतिः ।। इति ।।

अत्र बीजस्योर्ध्वे नादोपरि ब्रह्मस्थितिकथनेन नादोर्ध्वे बिन्दुमध्ये स्थितिरवगम्यते । "लिङ्गस्य वामदेशके" इति मतान्तरम् । अत एव **शारदायाम्**—

आधारांश्च विदुस्तत्र मतभेदादनेकधा ।

इत्युक्तम् । स किम्भूतः ? **लसद्वेदबाहुरिति** ।

अत्र केचिद् ब्रह्मणो द्विभुजदर्शनेन लसद्बाहुवेदाः सामवेदादयो बाहौ यस्येति व्युत्पत्तिं कृत्वा तदेव संस्थापयन्ति । तन्न । ब्रह्मणो हस्ताभ्यां वेदधारणस्य कुत्राऽप्यदर्शनात् किन्त्वत्र ब्रह्मा चतुर्भुजत्वेनैव ध्येयः । तथा स्पष्टमाह **भूतशुद्धौ**—

तदङ्के च चतुर्बाहुं रक्तवर्णं शिशुं शिवे ।
चतुर्वक्त्रं हंसपृष्ठे ब्रह्माणं विद्धि पार्वति ।। इति ।।

**मुखाम्भोजलक्ष्मीश्चतुर्भागभेद** इति । अस्य ब्रह्मणश्चतुर्भिर्भागैर्यो भेदोऽवयवेषु विशेषः, सैव मुखाम्भोजलक्ष्मीरित्यर्थाद् ब्रह्मणश्चतुर्मुखत्वमायातम् । यद्वा—मुखे अम्भोजलक्ष्मीर्यस्य, तथा चतुर्भिर्भागैरर्थान् मुखावच्छेदे भेदो यस्येति विशेषणद्वयम् । "चतुर्भागवेद" इति पदेऽभेदरूपेण पूर्वप्रकारार्थः ।

अत्र [ केचिद् ] ब्रह्मणो हस्तेऽस्त्रानभिधानेऽपि—

दण्ड-कमण्डलु-धरामक्षसूत्राभयं तथा ।
ध्यायेत् तां रक्तवर्णाञ्च ब्राह्मीं कृष्णाजिनोज्ज्वलाम् ।।इति।।

**विश्वसारतन्त्रोक्त**ब्राह्मीध्याने ब्रह्मशक्तिहस्ते दण्डकमडलवक्षसूत्राभयदर्शनात् अत्रापि तथा कल्प्यते, 'यस्य देवस्य यद्रूपमि' त्यादिना **सप्तसतीस्तोत्रे** शिवशक्तयोरेकास्त्रदर्शनादिति वदन्ति ।

वस्तुतस्तु—अभय-वरद-हस्तं कुण्डिकामक्षमालाम् ।
दधतममलभूषं चिन्तयेदादिमूर्त्तिम् ।।

इति **यामलो**क्तकर्मान्तरीयध्यानप्राप्ताभयवरादीनि ध्येयानि । स्पष्टयन्यत् ।। ६ ।।

बाहवो यस्य । मुखाम्भोजलक्ष्मीश्चतुर्भागो वेदो यस्य । अर्थात् चतुर्मुखविशिष्टब्रह्मा इत्यर्थः ।। ६ ।।

प्रकाशो रक्तवर्णः सृष्टिकारी ब्रह्मा चतुर्बाहुयुक्तः । चतुर्भागवेदो मुखम्भोजलक्ष्मीर्यस्य स तथा ।। ६ ।।

आधारपद्मस्थ-डाकिनीशक्तिस्वरूपम्

**वसेदत्र देवी च डाकिन्यभिख्या लसद्वेदबाहूज्ज्वला रक्तनेत्रा।**
**समानोदितानेकसूर्यप्रकाशा प्रकाशं वहन्ती सदा शुद्धबुद्धेः ॥ ७ ॥**

आधारपद्मे डाकिनीशक्तिस्थितिमाह–**वसेदिति। अत्र पद्मे डाकिनी** नाम्नी **देवी वसेद्**इत्यन्वयः। सा किम्भूता ? **सदा** सर्वस्मिन् काले शुद्धबुद्धेस्तत्त्वज्ञानस्य **प्रकाशं वहन्ती** तत्त्वज्ञानसम्पादयित्रीत्यर्थः। तथाच योगाङ्गत्वेनाऽत्र तां ध्यात्वा तत्त्वज्ञानमाप्नोतीति भावः। इयं देवी चक्राधिष्ठात्री। तदुक्तम्—

वक्त्रं व-श-ष-सोपेतं डाकिन्या समधिष्ठितम् ॥ इति ॥

तथा—डाकिनी राकिणी चैव लाकिनी काकिनी तथा।
शाकिनी हाकिनी चैव क्रमात् षट्पङ्कजाधिताः ॥ इति ॥

अस्या ध्यानविशेषमाहाऽन्यत्र—

रक्ताक्षीं रक्तवर्णां पशुजन-भयकृच्छूलखट्वाङ्गहस्तां
वामे खड्गं दधानां चषकमपि सुधापूरितं चैकवक्त्राम्।
अत्युग्रामुग्रदंष्ट्रामरिकुलमथनीं पायसान्ने प्रसक्तां
मूलाधारेऽमृतार्थे परिवृतवपुषं डाकिनीं चिन्तयेत् ताम् ॥ इति ॥

तथा—सिन्दूरतिलकोद्दीप्तामञ्जनाञ्चितलोचनाम्।
कृष्णाम्बरपरीधानां नानाभरणभूषिताम् ॥ इत्यादि—

कर्मान्तरोक्त-डाकिनीध्यान-प्राप्त-कृष्णाम्बरं ध्येयमिति। अत्र ब्रह्मादीनां षट्चक्रस्थसकलदेवानां भावभेदेनोर्ध्वाधोवक्त्रेण स्थितिचिन्तनमाह **शाक्तानन्दतरङ्गिणीधृतमायातन्त्रे—**

पार्वत्युवाच—
अधोवक्त्रस्थितिस्तत्र अधोभागे कथं भवेत्।

**वसेदत्रेति। अत्रैव चक्रे डाकिन्यभिख्या नाम यस्याः, सा वसेत्। "अभिख्या नामशोभयो"रित्यमरः। लसद्भिः प्रकाशद्भिश्चतुर्बाहुभिरुज्ज्वला रक्ताकारनेत्रा च सा देवी। समानोदितेति। एककालीनोदितानामनेकसूर्याणामिव प्रकाश उदयो यस्याः सा**

अत्र डाकिनी शक्तिरस्तीत्याह वसेदत्रेति। तथाच भट्टधृततन्त्रे—
मूलाधारं ब्रह्मणः स्थानमेतत् सौवर्णाभं डाकिनी देवताऽत्र ॥ इति ॥
एषा डाकिनी अनेकसूर्यप्रकाशा। अतिशयरक्ता इत्यर्थः। तन्त्रान्तरे—

मूलचक्रकर्णिकास्थ-त्रिकोणस्वरूपम्

**वज्राख्या-वक्त्रदेशे विलसति सततं कर्णिकामध्यसंस्थं**
**कोणं तत् त्रैपुराख्यं तडिदिव विलसत्कोमलं कामरूपम् ।**

इति प्रश्ने— महादेव उवाच—

तत् सर्वं पङ्कजं देवि सर्वतोमुखमेव च ।
प्रवृत्तिभावचिन्तायामधोवक्त्राणि चिन्तयेत् ।
निवृत्तिभावमार्गेषु सदैवोर्ध्वमुखानि च ।। इति ।।

अन्यत् सुगमम् ।। ७ ।।

मूलचक्रकर्णिकायां त्रिकोणं निरूप्यते—**वज्राख्या-वक्त्रदेश** इति । सुषुम्णाया आस्याद् द्वयङ्गुलोर्ध्वे लिङ्गमूलादधो वज्रावक्त्रम् । तत् तु मूलाधारकमल**कर्णिकामध्यस्थग**ह्वरान्तर्वत्ति, तत्र **त्रिकोणं विलसती-**त्यन्वयः । त्रिकोणं कीदृशम् ? **त्रैपुराख्यमिति** । त्रिकोणगर्भस्थ-कामबीज-घटक-ककारमध्ये त्रिपुरसुन्दर्यधिष्ठानात् त्रैपुराख्यमिति तात्पर्यम् । तदुक्तं **शाक्तानन्दतरङ्गिण्यां** ककारतत्त्वकथनमुपक्रम्य—

तेषां मध्ये स्थिता देवी सुन्दरी परदेवता ।। इति ।।

**तथा । सर्वदा शुद्धबुद्धीनां प्रकाशं वहन्ती, परमार्थविषयीभूता सदृशं विभाषयन्ती तदावाग्विराणां ज्ञाननेत्र ददातीत्यर्थः ।। ७ ।।**

**वज्राख्येति । अस्यैव पद्मस्य कर्णिकामध्यस्थं त्रैपुराख्यं त्रिपुरासम्बन्धीदं त्रैपुरं, तदेवाख्या नाम यस्य । चतुष्कोणं वज्राख्यनाड्याः समदेशे प्रकाशते । सर्वदैव विद्युदिव प्रकाशते कोमलं कामरूपपीठम् । यद्वा भक्ताभिलाषस्वरूपम् । तस्य कोणस्य मध्ये**

रक्तां रक्तत्रिनेत्रां पशुजनभयकृच्छूलखट्वाङ्गहस्तां ।
वामे खड्गं दधानां चषकमपि सुधापूरितं कैकवक्त्राम् ।। इति ।।

शुद्धबुद्धेः प्रकाशं वहन्तीत्यन्वयः ।। ७ ।।

मध्ये अवान्तरदेवतादिकमभिधाय प्रकृतमाह—वज्राख्येति । वज्राख्याया वक्त्र-देशे । सामीप्ये सप्तमी, अधोभागे इति यावत् ।

मुख्यनाडीत्रयं ग्रन्थेरूर्ध्वं वज्राध ईश्वरि ! ।

इति मातातन्त्रात् । कर्णिकामध्यसंस्थं त्रैपुराख्यं त्रिकोणम् । तत् कामरूपाख्यं त्रिकोणम् । कन्दर्पो वह्निः समन्ताद् भ्रमति । नाम प्रकर्षे । जीवेशो वायुश्च निवसति । तथाच मायातन्त्रे—

**कन्दर्पो नाम वायुर्निवसति सततं तस्य मध्ये समन्ता-**
**ज्जीवेशो बन्धुजीवप्रकरमभिहसन् कोटिसूर्यप्रकाशः ॥ ८ ॥**

**कोमलं सुस्निग्धम्**। तथा **कामरूपं** कामं निरूप्यतेऽनुभूयते येन तादृशं, मदनागारात्मकमित्यर्थः। अत एव--

त्रिकोणं तत् तु विज्ञेयं शक्तिपीठं मनोहरम्।

इत्युक्तम्। एतत् त्रिकोणं धराबीजस्योर्ध्वे। तदुक्तं **सम्मोहने** धराबीजमधिकृत्य—

वामा ज्येष्ठा तथा **रौद्री त्रिरेखा** च तदूर्ध्वतः॥ इति॥

तत्त्रिकोणामध्ये कन्दर्पवायुस्थितिमाह--**कन्दर्प** इति। **समन्तात्** त्रिकोणव्यापकरूपेणेत्यर्थः। **जीवेश** इति। अस्य जीवधारकत्वाज्जीवेश इत्युक्तम्। तथा हि—

कन्ददेशे वसेत् प्राणो ह्यपानो गुदमण्डले।

इत्यादि-वचने गुदमण्डलस्थ-वायोरपानत्वाभिधानात् तादृशगुदमण्डलस्थ-कन्दर्पवायोरप्यपानांशः। ततश्च—

अपानः कर्षति प्राणं प्राणोऽपानञ्च कर्षति।
रज्जुबद्धो यथा श्येनो गतोऽप्याकृष्यते पुनः।
तथा चैतौ विसंवादे संवादे संत्यजेदिमम्॥ इति॥

समन्ताच्चतुर्दिक्षु सर्वदैव कन्दर्पो नाम वायुर्विलसति। काम एव वायुभूतोऽत्राऽस्तीति गुरुचरणाः। तेनैव हेतुना जीवात्मनाविर्भवतीत्याह--जीवेश इति। किम्भूतः ? बन्धूकपुष्पसमूहमत्यर्थमुपहसन्निव। ततोऽप्यत्यर्थरक्ताकारः। अतो वायू रूपवानित्यादि-

तत्कर्णिकान्तरे पृथ्वी चतुष्कोणा सुपीतभा।
तन्मध्ये योनिमध्ये च वह्निवाय्वोः समाश्रये॥ इति॥

श्रीक्रमेऽपि—कर्णिकायां स्थिता योनिः कामाख्या परमेश्वरि।
अपानाख्यं हि कन्दर्पमाधारे तत्त्रिकोणके।
स्वम्भूलिङ्गं तन्मध्ये पश्चिमाभिमुखं प्रिये॥ इति॥

रुद्रयामलेऽपि—भ्रमदयोनिगतं ध्यायेत् कामं बन्धूकसन्निभम्।
ज्वलत्कालानलप्रख्यं तडित्कोटिसमप्रभम्॥ इति च॥

तदेवाह—जीवेश इत्यादिना। बन्धूकपुष्पसमूहमभिहसन् तदधिकरक्तवर्ण इति भावः। "बन्धूको बन्धुजीवकः" इत्यमरः। "आधारे तत्त्रिकोणके" इत्युक्तत्वात्। तथा—

त्रिकोणमध्यस्थ-स्वयम्भुलिङ्गस्वरूपम्

**तन्मध्ये लिङ्गरूपी द्रुत-कनककला-कोमलः पश्चिमास्यो ज्ञानध्यानप्रकाशः प्रथमकिसलयाकाररूपः स्वयम्भुः।**

'विसंवादे' परस्परवैपरीत्यगमने 'एतौ' प्राणापानवायू 'तथा' कर्षाकर्षिणौ 'संवादे' अविरोधिगमने 'इमं' देहं 'सन्त्यजेदि'त्यर्थक-तद्वचने कन्दर्पावान्तरनामकापानवायोः प्राणाकर्षकत्वेन देहधारणत्वाज्जीवधारकत्वं प्रतीयते। अतो जीवेश इत्युक्तिरिति भावः। अत एव ग्रन्थकृता दशमश्लोके "श्वासोच्छ्वासविभञ्जनेन जगतां जीवो यया धार्यते" इत्यनेन श्वासोच्छ्वासरूपयोः प्राणापानयोर्जीवधारकत्वं स्वयमेवोक्तम्। स्पष्टमन्यत् ॥ ८ ॥

त्रिकोणमध्ये स्वयम्भुलिङ्गस्थितिमाह—**तन्मध्य** इति। त्रिकोणमध्ये **लिङ्गरूपी स्वयम्भुः** स्वयम्भुनामकशिवलिङ्गं विलसतीत्यन्वयः। **द्रुतकनककला-कोमल**स्तप्तकाञ्चनावयव इव स्निग्धभाव इत्यर्थः। **पश्चिमास्यो**ऽधोमुखः। तदुक्तं **कालीकुलामृते**--

तत्र स्थितो महालिङ्गः स्वयम्भुः सर्वदा सुखी।
अधोमुखः क्रियावांश्च कामबीजेन चालितः॥ इति॥

**ज्ञानध्यानप्रकाश** इति। ज्ञानध्यानाभ्यां प्रकाशो यस्य तादृश इत्यर्थः। तथा च ज्ञानेन निर्गुणरूपप्रकाशो ध्यानेन च सगुणरूपप्रकाशो यस्य स एवायं स्वयम्भुरिति भावः। दृष्टान्तेन विशेषयति—**प्रथमकिसलयाकाररूप** इति। अचिरोत्पन्नपत्राङ्कुरवदाकारो रूपं यस्य। तेन स्थूलमूलात् सूक्ष्माग्र-

सांख्यसिद्धान्तोऽपि संगच्छते। पुनः कीदृशः? कोटिसूर्याणामिव प्रकाशो दीप्तिर्यस्येति॥ ८॥

तन्मध्ये इति। तत्कोणस्य किञ्चिदुपरि लिङ्गरूपी स्वयम्भुर्भावरूपेण तिष्ठति। कीदृशः? द्रुता या कनककला वह्निश्लथीभूता तस्या इव कोमलः। पश्चिमा योऽधो-

मूलाधारे त्रिकोणाख्ये इच्छाज्ञानक्रियात्मिके।
मध्ये स्वयम्भूलिङ्गस्तु कोटिसूर्यसमप्रभः॥

इति गौतमीयात्। तथा--

अधोमुखो लिङ्गरूपी हेमाभो भ्रमणे रतः॥ इति॥ ८॥

पुनरपि मायातन्त्राच्चाह--तन्मध्ये इति। त्रिकोणमध्ये लिङ्गरूपि स्वयम्भूलिङ्गम् द्रुतसुवर्णकलाकोमल इति। सुवर्णवर्णयोगित्वात् कोमलत्वाच्च तथाभिहि-

**विद्युत् - पूर्णेन्दुबिम्ब - प्रकरकर-चय-स्निग्धसन्तान - हासी**
**काशीवासी विलासी विलसति सरिदावर्त्तरूपप्रकारः ॥ ९ ॥**

पर्यन्तं चम्पककुसुममध्यस्थितशलाकावदुन्नतः श्यामवर्णश्चेत्यर्थः । तदुक्तं **शाक्तानन्दतरङ्गिण्याम्**--

स्वयम्भुलिङ्गं तन्मध्ये सरन्ध्रं पश्चिमाननम् ।
ध्यायेच्च परमेशानि शिवं श्यामलसुन्दरम् ॥ इति ॥

यत्तु--मलाधारे स्मरेद् दिव्यं त्रिकोणमतिसुन्दरम् ।
तस्यास्त्रिरेखामानीय अधऊर्ध्वव्यवस्थिताम् ॥
नीलतोयद-मध्यस्थां तडित्कोटि-समप्रभाम् ।

इति **यामलवचने** कुण्डलिन्या नीलतोयदमध्यस्थविशेषणेन स्वयम्भुलिङ्गस्य नीलवर्णत्वमायातम् । तन् नीलश्यामयोरेकपर्यायत्वान्न विरुद्धम् । **विद्युत्-पूर्णेन्दुबिम्ब-प्रकरकर-चय-स्निग्धसन्तानहासीति** । विद्युत्-पूर्णचन्द्रबिम्बयोर्यः प्रकृष्टकर उत्तापरहितकिरणः तत्तुल्यकिरणसमूहेन मृदुप्रवाहविशिष्टप्रकाशोऽस्याऽस्तीत्यर्थः । **काशीवासी विलासीति** । अत्र काशीवासतुल्यवासविशिष्टः सन् विलासीत्यर्थः । तेन यथा काशीवासे सुखं भुनक्ति तद्वदत्रापीति भावः । अथवा विलास उल्लासः कामप्रफुल्लभाव इति यावत्, तद्विशिष्ट इत्यर्थः । "कामबीजेन चालित" इति वचनात् । अयं स्वयम्भुः काशीवासी । एतेनास्य विश्वेश्वरत्वं सूचितमिति । **सरिदावर्त्तरूपप्रकार** इति सरिदावर्त्ते यद्रूपं तत्प्रकारः । ततश्च यथा भ्राम्यमाणनदीजलं मध्यनिम्नं तन्मध्ये किञ्चिदुन्नतं शङ्खमध्योन्नतवदिति भावः । अयं स्वयम्भुः कामबीजोपरिस्थितः । तदाह **कालीकुलामृते**--

किञ्जल्कोपरि शृङ्गाटः सरन्ध्रः सुमनोहरः ।
तत्र स्थितो महालिङ्गः स्वयम्भुः सर्वदा सुखी ।
अधोमुखः क्रियवांश्च कामबीजेन चालितः ॥ इति ॥

---

मुखः । ज्ञानध्यानाख्ययोगाभ्यां प्रकश उदयो यस्य । नवीनपल्लवाकारस्येव रूपं यस्य । विद्युत्पूर्णेन्दुबिम्बसमूहानां करवृन्दस्निग्धसमूहस्येव हास्यं सविशेषो यस्य । तत्स्थानमपि

---

तम् । पश्चिमास्यः अधोमुखः । ज्ञानध्यानाभ्यां प्रकाश्यते यः स तथा । प्रथमकिसलयाकाररूपो नूतनपल्लवाङ्कुराकारः । विद्युदिति । तथाच पूर्णचन्द्रादधिकरससमूह इत्यर्थः । स्निग्धसन्तानं स्निग्धसमूहं हसतीति स्निग्धसन्तानहासी । काशी-

स्वयम्भुलिङ्गस्थ-कुण्डलिनीशक्तिस्वरूपम्

**तस्योर्ध्वे बिसतन्तुसोदरलसत्सूक्ष्मा जगन्मोहिनी**
**ब्रह्मद्वारमुखं मुखेन मधुरं संछादयन्ती स्वयम् ।**

तथान्यत्र--पूर्वोक्ता डाकिनी तत्र कर्णिकायां त्रिकोणकम् ।
यन्मध्ये विवरं सूक्ष्मं रक्ताभं कामबीजकम् ।
तत्र स्वयम्भुलिङ्गञ्चाधोमुखालक्तकप्रभम् ॥ इति ॥

**मतान्तरम्** ॥ ६ ॥

**स्वयम्भुलिङ्गे** कुण्डलिनीशक्तिस्थितिमाह--**तस्योर्ध्व** इति द्वाभ्याम् । अनयोरर्थः--**यथा कुण्डलिन्या श्वासोच्छ्वासविभञ्जनेन** प्रवर्त्तनेन **जगतां जीवो** जीवात्मा **धार्यते** देहावच्छेदे स्थाप्यते सा देवी **मत्तालिमालास्फुटं** यथा स्यात् तथाकृतिरेवं वक्ष्यमाणक्रमैर्वाचमर्थाज् जनयन्ती सती **अम्बुजगह्वरे** मूलाधारकमलकर्णिकामध्यत्रिकोणगह्वरे **तस्य** स्वयम्भुलिङ्गस्योर्ध्वभागे **विलसतीति** श्लोकद्वयस्य विशिष्टान्वितार्थः । **बिसतन्तुसोदरलसत्सूक्ष्मा** मृणालसूत्रतुल्यसूक्ष्मेत्यर्थः । **जगन्मोहिनी** जगतां मायारूपिणीत्यर्थः । **ब्रह्मद्वारमुखं** स्वयम्भुलिङ्गच्छिद्रं **मधुरं** मृदु यथा स्यात् तथा **स्वमुखेन** संछादयन्तीत्यर्थः । **नवीनचपलामालाविलासस्पदेति** । सर्वेषां नवीनत्वे प्रकाशाधिक्यदर्शनादत्र नवीनोत्कीर्त्तनमधिकप्रकाशप्राप्त्यर्थम् । ततश्चातिप्रकाशितविद्युन्मालानां विलासस्य स्थिरतरकौतूहलवासस्यास्पद इत्यर्थात्

काशी । विलासी विलसितुं शीलमस्य । सरिदावर्त्तरूपः प्रकार आकृतिर्यस्य, अतिचञ्चलत्वात् । एवम्भूतः सन् विलसति ॥ ६ ॥

तस्योर्ध्वे इति । तस्य शिवस्योर्ध्वेऽध इत्यर्थः । मृणालतन्तुसदृशी शरीरकला यस्याः, एवम्भूता सा कूजन्ती कुलकुण्डलिनीति वक्ष्यमाणश्लोकेनान्वयः । यतो बिसतन्तुसदृशी, अतः सूक्ष्मा । जगतां मोहिनी महामायारूपेणेत्यर्थः । ब्रह्मद्वारमुखं मुखेन मुख-

वासीत्यादिविशेषणम् । सरितामावर्त्तश्चक्रवज्ज जलानां भ्रमणं तद्रूपप्रकाशो यस्य स तथा । "स्यादावर्त्तोऽम्भसां भ्रमः" इत्यमरः ॥ ९ ॥

तल्लिङ्गं सार्द्धत्रिवलयेनावेष्टय कुण्डलिनी शक्तिरस्तीत्याह—तस्योर्ध्वे इत्यादिना । बिसतन्तुसोदरतुल्या सा चासौ कला प्रकृतिश्चेति सा तथा । अतः सूक्ष्मा । नवीनचपलामाला तस्या विलसनशोभया सह आस्पदमास्पर्द्धा यस्याः सा तथा । "तडित् सौदामिनी विद्युच्चञ्चला चपलाप च" इत्यमरः । सुप्ता निद्रिता शिवोपरि लसन्ती सार्द्धत्रिवृत्ता आकृतिः शरीरं यस्याः सा तथा । सा तु अधोवक्त्रा । यथा **श्रीक्रमे**—

शङ्खावर्त्तनिभा नवीनचपलामालाविलासास्पदा
सुप्ता सर्पसमा शिवोपरि लसत्सार्द्धत्रिवृत्ताकृतिः ॥ १० ॥

स्थिरतरातिप्रकाशितविद्युत्समूहप्रकाशतुल्य-प्रकाशवतीति पर्यवसितम्। वाक्यजननक्रममाह—**कोमलकाव्यबन्धरचनाभेदातिभेदक्रमैरिति**। **कोमलकाव्यं** मृदुशब्दघटित-रूपगुणरसादि-वर्णनात्मक-वाक्यम्। बन्धः पद्मबन्धाश्वबन्धादि-चित्रकाव्यम्। **रचना** तदतिरिक्तगद्यपद्यात्मक-वाक्यम्। **भेद**स्तेषां विशेषः। **अतिभेद**स्तदितरसंस्कृतवाक्यसमुदायः। तयोर्यः **क्रमः** शास्त्रव्यवहारानुरूपरीतिः। तादृशीभी रीतिभिर्वाचं जनयन्तीति परिष्कृतार्थः, कुण्डलिन्याः संकृतप्राकृतविशेषाविशेषयावद्वाक्यजनयित्रीत्वात्। तदाह **शारदायाम्**—

भिद्यमानात् पराद् बिन्दोरव्यक्तात्मा रवोऽभवत्।
तत् प्राप्य कुण्डलीरूपं प्राणिनां देहमध्यगम्।
वर्णात्मनाविर्भवति गद्यपद्यादिभेदातः ॥ इति ॥

"**गद्यपद्यादी**"त्यादिपदाद् यावद् वाक्य गृह्यते। व्यक्तमाह **कादिमते**—

स्वात्मेच्छाशक्तिघातेन प्राणवायुस्वरूपतः।
मूलाधारे समुत्पन्नः पराख्यो नाद उत्तमः ॥

कमलेन स्वयमेव सञ्छादयन्ती, सम्यक् प्रकारेणाच्छादयन्तीत्यर्थः। एतेन अमृतवर्त्मसञ्छादनं कृत्वा अमृतं पिबतीत्यर्थः। अस्तदमृतसंयोगेन तन्मुखं मधुरं। शङ्खस्य वेष्टनाकारतुल्या। नवीनविद्युच्छ्रेणीप्रकाश एव स्थानं यस्यास्तत्सदृशीति यावत्। सुप्ता अतः सर्पतुल्या। सर्पो हि सुप्तः कुण्डलाकारो भवति। शिवस्योपरि लसन्ती प्रकाशमाना सार्द्धत्रिवृत्ता आकृतिः शरीरं यस्याः ॥ १० ॥

अधोवक्त्रा स्थिता देवी ऊर्ध्वपुच्छातिशोभना।
अत्र विद्युल्लताकारा कुण्डली परदेवता ॥
परिस्फुरति सर्वात्मा सुप्ता हि भुजगाकृतिः।
ब्रह्मद्वारमुखं नित्यं मुखेनावृत्य तिष्ठति ॥
येन द्वारेण गन्तव्यं ब्रह्मद्वारं मनोमयम्।
मुखेनाच्छाद्य तद्द्वारं प्रसुप्ता परमेश्वरी ॥
मस्तके मणिवद् भिन्ना स्वयम्भूलिङ्गवेष्टिनी ॥ इति ॥

योगान्तरेऽपि—मुखेनाच्छाद्य तद्द्वारं कुण्डलीशक्तिरुज्ज्वला।
निद्रावशगता देवी प्रसुप्तभुजगोपमा ॥ इति ॥

तथा मायातन्त्रेऽपि—सार्द्धत्रिवलयानन्दा नन्दिता भास्करप्रभा ॥ इति ॥ १० ॥

**कूजन्ती कुलकुण्डली च मधुरं मत्तालिमालास्फुटं**
**वाचं कोमलकाव्य-बन्ध-रचना-भेदातिभेद-क्रमैः ।**

स एव चोर्ध्वतां नीतः स्वाधिष्ठानविजृम्भितः ।
पश्यन्त्याख्यामवाप्नोति तथैवोर्ध्वं शनैः शनैः ॥
अनाहते बुद्धितत्त्वसमेतो मध्यमाभिधः ।
तथा तयोरूर्ध्वगतो विशुद्धौ कण्ठदेशतः ॥
वैखर्याख्यस्ततः कण्ठशीर्षताल्वोष्ठदन्तगः ।
जिह्वामूलाग्रपृष्ठस्थस्तथा नासाग्रतः क्रमात् ॥
कण्ठताल्वोष्ठकण्ठस्थः कण्ठौष्ठद्वयतस्तथा ।
समुत्पन्नान्यक्षराणि क्रमादादिक्षकावधि ॥ इति ॥

अलं विस्तरेण । कुण्डलिनीध्यानान्तरमाहाऽन्यत्र--

ध्यायेत् कुण्डलिनीं देवीं स्वयम्भुलिङ्गवेष्टिनीम् ।
श्यामां सूक्ष्मां सृष्टिरूपां सृष्टिस्थितिलयात्मिकाम् ।
विश्वातीतां ज्ञानरूपां चिन्ययेदूर्ध्ववाहिनीम् ॥

**कूजन्तीति । सा कुण्डलिनी मधुरं यथा स्यात् तथा शब्दं कुर्वन्तीत्यर्थः । एतेन लब्धध्वन्यात्मकः शब्दो भवति । तत्र स एव शब्दः कण्ठताल्वाद्यभिघातेन वर्णात्मकत्वेन परिगण्यत इत्याह । कोमलकाव्यबन्धग्रथनाया यो भेदो नानाप्रबन्धो गौडी वैदर्भी**

**कूजन्तीति** । उत्थिता सतीति शेषः । तथा **च तन्त्रा तरे**--

झिल्लीवाऽव्यक्तमधुरा कुजन्ती सततोत्थिता ॥ इति ॥

**कोमलकाव्यै**[वाक्यै]र्वाचं कूजन्तीत्यर्थः ।

तत् प्राप्य कुण्डलीरूपं प्राणिनां देहमध्यगम् ।
वर्णात्मनाविर्भवति गद्यपद्यादिभेदतः ॥

इति **शारदोक्तेः** । तत् चैतन्यम् । श्वासोच्छ्वासविभञ्जनेन वायुना तथा जगतां जीवः जीवात्मा हंसः धार्यते [ तदुक्तं –]

विभर्त्ति कुण्डलीशक्तिरात्मानं हंसमाश्रिता ।
हंसः प्राणाश्रयो नित्यं प्राणो नाडीसमा [पथा]श्रयः ॥
आधारातुद्गतो वायुर्यथावत् सर्वदेहिनाम् ।
देहं प्राप्य स्वनाडीभिः प्रयाणं कुरुते बहिः ।
द्वादशाङ्गुलमानेन तस्मात् प्राण इतीरितः ॥ इति ॥

**भट्टाः**—कुण्डली शक्तिरात्मानं परमात्मानं विभर्त्ति तद्योगभागिनी भवतीत्यर्थः । कीदृशी ? हंसं जीवात्मानमाश्रिता जीवाधिष्ठाना सतीत्यर्थः । हंसः प्राणाश्रयः,

**श्वासोच्छ्वासविभञ्जनेन जगतां जीवो यया धार्यते**
**सा मूलाम्बुजगह्वरे विलसति प्रोद्दामदीप्तावलिः ॥ ११ ॥**

तथा--ध्यायेत् कुण्डलिनीं देवीमिष्टदेवस्वरूपिणीम् ।
सदा षोडशवर्षीयां पीनोन्नतपयोधराम् ॥
नवयौवनसम्पन्नां सर्वाभरणभूषिताम् ।
पूर्णचन्द्रप्रभां रक्तां सदा चञ्चललोचनाम् ॥ इति ॥

"रक्तामि"ति सुन्दरीविषये ज्ञेयमिति **शाक्तानन्दतरङ्गिणीकारः** । वस्तुतस्तु सर्वदेवताविषये एव कुण्डलिनी रक्तवर्णत्वेन ध्येया न तु श्यामवर्णत्वेन, प्रायः सर्वतन्त्रे सर्वसंग्रहे च कुण्डलिन्यास्तडिदाकारत्वकथनात् । "श्यामामि"त्यनेन—

शीतकाले भवेदुष्णा चोष्णकाले च शीतला ।
प्रतप्तकाञ्चनाभा सा श्यामा स्त्री परिकीर्त्तिता ॥

इत्येतद्वचनाक्रान्तत्वं ज्ञापितम् । न तु श्यामवर्णत्वमतः सर्वशास्त्र-सामञ्जस्यमिति । चक्रभेदनात् पूर्वं ब्रह्मद्वारमध्ये कुण्डलीध्यानमाह **कङ्कालमालिन्याम्**—

कोटिचन्द्रप्रतीकाशां परंब्रह्मस्वरूपिणीम् ।
चतुर्भुजां त्रिनेत्राञ्च वराभयकरां तथा ॥
तथा पुस्तकवीणाञ्च धारिणीं सिंहवाहिनीम् ।
गच्छन्तीं स्वासनं भीमां नानारूपधरात्मिकाम् ॥इति१०-११॥

**पाञ्चाली कवितारीतिक्रमस्तस्य भेदस्य शृङ्गारादिनवरसबन्धेन योऽतिभेदस्तत्क्रमैः । मत्तभृङ्गमालेव स्फुटं यथा स्यात्तथा वाचश्च कूजन्ती तस्या एव वैखरीत्वमायातमिति । यया देव्या च श्वासोच्छ्वासविभञ्जनेन जगतां जीवो धार्यते सा मूलाधारपद्मकुहरे प्रकाशते । प्रोद्दामदीप्ता बलिर्यस्याः, दीप्तमिति भावे क्तः ॥ ११ ॥**

प्राणवायुसमाश्रयः इत्यर्थः । प्राणी नाडीसमाश्रयः । कथं तस्य नाडीसमाश्रयत्वम् ? इत्यत आह--आधारादिति । प्रयाणं कुरुते इति प्राण इति प्राणपदव्युत्पत्तिरपि दर्शितेत्यन्तेनाहुः ।

**दक्षिणामूर्त्तौ तु**--उच्छ्वासे चैव निश्वासे हस इत्यक्षरद्वयम् ।
तस्मात् प्राणस्तु हंसाख्य आत्माकारेण संस्थितः ॥
षटशतान्यधिकान्यत्र सहस्राण्येकविंशतिः ।
अहोरात्रं चरेद् वायुः स जपो मोक्षदायकः ॥ इति ॥

विज्ञानभैरवोक्ते अन्यत्रापि- सः कारेण बहिर्याति हंकारेण विशेत् पुनः ॥ इति ॥
प्रोद्दामदीप्तश्रेणी (?) ॥ ११ ॥

कुण्डलिनीमध्यस्थ-परशक्तिस्वरूपम्

**तन्मध्ये परमा कलाऽतिकुशला सूक्ष्मातिसूक्ष्मा परा**
**नित्यानन्द - परम्परातिविगलत् - पीयूषधारा - धरा ।**
**ब्रह्माण्डादिकटाहमेव सकलं यदभासया भासते**
**सेयं श्रीपरमेश्वरी विजयते नित्यप्रबोधोदया ॥ १२ ॥**

स्वयम्भुलिङ्गवेष्टितकुण्डलिन्यूर्ध्वे समसूत्रपातन्यायेन दण्डकारेण लिङ्गाग्रपर्यन्तस्थितां परशक्तिमाह--**तन्मध्य** इति । अस्यार्थः--**यद्भासया** यस्याः शक्तचा दीप्त्या **ब्रह्माण्डादि तत्कटाहश्च भासते** प्रकाशते, **सेयं श्रीपरमेश्वरी तन्मध्ये** स्वयम्भुलिङ्गे कुण्डलिनीवेष्टनोर्ध्वे **विजयते,** सर्वान् वशवर्त्तिनः कृत्वा तिष्ठतीत्यर्थः । सा किम्भूता ? **परमाऽ**घटनघटनपटीयसी माया । **कला** नादशक्तिरूपा कुण्डलिन्यभेदशरीरिणी । तदुक्तं **शाक्तानन्द-तरङ्गिण्याम्**--कला कुण्डलिनी सैव नादशक्तिः शिवोदिता । इति ।

तथान्यत्र--तस्योपरि मनो ध्यायेच्चित्कलामी-समाश्रिताम् ।
प्रदीपकलिकाकारां कुण्डल्यभेदरूपिणीम् ॥ इति ॥

तथा **कालिकाश्रुतौ**

तस्याः शिखाया मध्ये तु अध ऊर्ध्वव्यवस्थिताम् ।
स ब्रह्मा स शिवः शूरः स एव परमेश्वरः ॥
स एव विष्णुः स प्राणाः स कालाग्निः स चन्द्रमाः ।
इति कुण्डलिनीं ध्यात्वा सर्वपापैः प्रमुच्यते ॥ इति ॥

तस्याः शिखाया मध्ये त्रिबलयस्योर्ध्वे व्यवस्थितां परमां कलां नादरूपामित्यर्थ इति **ललितारहस्यकारः** । **अतिकुशला** सृष्टिसम्पादनयोग्यतारूप-

**तन्मध्य इति । तस्याः कुण्डलिन्या मध्ये परमा कला आस्ते । परं परमात्मानं मीयतेऽनयेति परमा । अत्यर्थ कुशलं यतः साऽतिकुशला । सूक्ष्मा, यतस्तस्या मध्ये परा पश्यन्ती मध्यमा वैखरी । समाधिरूपा नित्यमानन्दपरम्परा यस्याः सा तथा । अत्यर्थ-विद्युन्मालेव लसन्ती प्रकाशमाना दीधितिस्तेजो यस्याः । ब्रह्माण्डस्य आदिकटाहपर्यन्तं**

तस्याः कुण्डलिन्या मध्ये परमा नाम्नी शक्तिरुच्यते --तन्मध्ये इत्यादिना । परमा उत्कृष्टा । परा परानाम्नी अतिसूक्ष्मा । तथाच **भट्टधृततन्त्रे** --

सूक्ष्मा कुण्डलिनी मध्ये ज्योतिर्मात्रा परा मता ॥ इति ॥

सा एव परमात्मस्वरूपा । तथा च श्रुतिः--

तस्याः शिखाया मध्ये तु परमा सा व्यवस्थिता ॥ इति ॥

मूलाधारे कुण्डलिनीशक्तिचिन्तनफलम्

**ध्यात्वैतन्मूलचक्रान्तर - विवर-लसत्-कोटिसूर्य - प्रकाशां**
**वाचामीशो नरेन्द्रः स भवति सहसा सर्वविद्याविनोदी ।**

कौशलवतीत्यर्थः । **नित्यानन्दपरम्परेति ।** नित्यानन्दात् परम्परा परपरक्रम-सम्बन्धो यस्या इत्यर्थः । ततश्च नित्यानन्दो निर्गुणं ब्रह्म, तस्मात् सगुणा-विर्भावः, सगुणाच्छक्तिः, शक्तेर्नादो, नादाद् बिन्दुर्बिन्दोः कुण्डलिनी कुण्ड-लिन्यवान्तररूपेयं चित्कलेत्येवंप्रकारेण नित्यानन्दपरम्परेति भावः । यद्वा नित्यानन्दपरम्परातिविगलत्पीयूषधाराधरेत्येकविशेषणम् । निन्यानन्दात् परम्परया नित्यानन्दात् परं बिन्दुः, तत्परमाज्ञाचक्रं, तत्परं विशुद्धचक्रमेवं क्रमेण मूलाधारपर्यन्तमतिविगलन्ती या पीयूषधारा सा ध्रियते गृह्यते यया सेत्यर्थः । स्पष्टमन्यत ॥ १२ ॥

मूलाधारे कुण्डलिनीचिन्तनफलमाह—**ध्यात्वैतदिति । मूलचक्रति ।** "मूलामाधारषट्कानां मूलाधारं ततो विदुरि"ति वचनान् मूलाधारचक्रं, तस्यान्तरे मध्ये यद **विवरं गह्वरं**, तस्मिन् लसत्कोटिसूर्यप्रकाशामित्यर्थः । **सकलसुरगुरूनिति** । "सिंहशार्दूलनागाद्याः पंसि श्रेष्ठार्थवाचका" इत्यम-रोक्त्या सुरगुरुवर्त्तिना गुरुशब्देन सुरश्रेष्ठा ब्रह्मविष्णुशिवादयः प्रतीयन्ते । ततश्च तदादिदेवान् **सेवते** स्तवादिवाक्यैस्तोषयतीत्यर्थः । स्पष्टमन्यत् ।

**तदयं महावक्यार्थनिर्णयः ।** मूलाधारचक्रं चतुर्दलं रक्तवर्णम् । व-श-ष-सेति स्वर्णाभचतुर्वर्णयुक्तदलकर्णिकायां धरामण्डलं चतुष्कोणामष्ट-

**यस्याः कलाया भासया सकलं भासते । यद्वा शरीरस्यापि ब्रह्माण्डसंज्ञा, "ब्रह्माण्डे ये गुणाः सन्ति ते हि सन्ति कलेवरे" इति प्रामाणिकोक्तवात् । सेयं श्रीपरमेश्वरी विजयते जयतीत्यर्थः । नित्यज्ञानस्योदयो यतः ॥ १२ ॥**

ध्यात्वैतदिति । **एतन् मूलाधारस्थं सर्वं ध्यात्वा नर एवमेवं भवति । तत्क्रमेणाह— वाचामीशो नराणामिन्द्रतुल्यः सहसा सर्वविद्याविनोदी च भवति । तस्य नित्यमेवा-रोग्यम् । निरवधि अहर्निशमेव । महानन्द ईश्वरस्तच्चिन्ताविशिष्टोऽन्तरात्मा यस्य,**

**नित्या ध्वंसप्रागभावरहिता । आनन्दपरम्परा आनन्दसमूहयुक्ता । अतिचपलाय-माना विद्युल्लता इव लसन्ती दीधितिर्दीप्तिर्यस्याः सा तथा । यस्याः कलायाः प्रभया ब्रह्माण्डादिकटाहान्तं जगत् शरीरं भासते सा विजयते । नित्यज्ञानस्य उदयो यस्यां सा ॥१२॥**

आरोग्यं तस्य नित्यं निरवधि च महानन्दचित्तान्तरात्मा
वाक्यैः काव्यप्रबन्धैः सकलसुरगुरून् सेवते शुद्धशीलः ॥ १३ ॥

स्वाधिष्ठानचक्रस्वरूपम्

सिन्दूर - पूर - रुचिरारुण - पद्ममन्यत्
सौषुम्णमध्यघटितं ध्वजमूलदेशे ।

शूलावृतं पीतवर्णम् । तन्मध्याधो धराबीजं चतुर्भुजमैरावतारूढं पीतवर्णं वज्रहस्तम् । धराबीजबिन्दुमध्ये शिशुरूपो ब्रह्मा रक्तवर्णश्चतुर्भुजो दण्ड-कमण्डल्वक्षसूत्राभयहस्तश्चतुर्मुखः । तत्कर्णिकायां रक्तपद्मोपरि चक्रा-धिष्ठात्री डाकिनीशक्ती रक्तवर्णा चतुर्भुजा शूल-खट्वाङ्ग-खङ्ग-चषक-हस्ता । कर्णिकामध्ये विद्यदाकारत्रिकोणम् । तन्मध्ये कामवायुः काम-बीजञ्च रक्तवर्णम् । तदुपरि स्वम्भुलिङ्गः श्यामवर्णः । तस्योर्ध्वे कुण्डलिनी-शक्तिः सार्द्धत्रिवलयाकारा । तदूर्ध्वे लिङ्गाग्रे चित्कला दण्डकारेण स्थितेति प्रथमप्रकरणम् ॥ १३ ॥

मूलाधारचक्रं निरूप्य स्वाधिष्ठानचक्रं निरूपयति—**सिन्दूरपूरेत्यादि**-पञ्चभिः । प्रथमस्यायमर्थः—**ध्वजमूलदेशे** लिङ्गमूलस्थाने अन्यदाधार-चक्रभिन्नं **सिन्दूरपूररुचिरारुणपद्मं** सिन्दूरस्य पूरणेन यथा मनोहररक्तवर्णं तद्वद् रक्तवर्णपद्मम् । आस्ते इति क्रियासमाहारेणाऽन्वयः । पद्मं विशेषयति—

**एवं भवतीत्यर्थः । एतत् कीदृशं ? मूलाधारमध्यप्रकाशम् । कोटिसूर्याणां प्रकाशो यस्य तत्तथा । स जनः काव्यप्रबन्धैर्वाक्यैः सकलसुरगुरुं शुद्धशीलः सन् सेवते, वाक्पति-सदृशो भवतीत्यर्थः ॥ १३ ॥**

**सिन्दूरेति । अन्यत् स्वाधिष्ठानाख्यं लिङ्गमूलसमदेशे आस्ते । सुषुम्णामध्य-घटकीभूतम् । सुषुम्णाशब्दात् स्वार्थे अणिति केचित् । तद् दूष्यम् । वस्तुतस्तु सुषुम्णाया इदं ब्रह्मनाड्यादि तन्मध्यभूतं पद्मं, तस्येदमित्यर्थे अण् । कीदृशम् ? सिन्दूररुचिर-**

काव्यबन्धैर्वाक्यैर्बृहस्पतीन् सेवते । गौरवे बहुवचनम् ॥१३॥

स्वाधिष्ठानाख्यपद्मामाह—सिन्दूरेत्यादिना । अङ्गच्छदैः षट्पत्रैः विद्युत्-प्रकारैर्वाद्यैः पुरन्दरान्तैर्वादिलान्तैः सबिन्दुकं परिवृतं पद्मम् । तथा च **मायातन्त्रे** —

तदूर्ध्वे तु महेशानि स्वाधिष्ठानमृतुच्छदम् ।
रक्तवर्णं कर्णिकायामब्जमर्द्धेन्दसंयुतम् ।
मण्डलं वारुणं देवि तदूर्ध्वे मणिपूरकम् ॥ इति ॥

**अङ्गच्छदैः परिवृतं तडिदाभवर्णै**
**र्वाद्यैः सबिन्दुलसितैश्च पुरन्दरान्तैः ॥ १४ ॥**

अम्भोजमण्डलस्थितिवर्णनम्

**तस्यान्तरे प्रविलसद् विशद-प्रकाश-**
**मम्भोजमण्डलमथो वरुणस्य तस्य ।**

सौषुम्णमध्यघटितमिति । सुषुम्णानाडीमध्ये निर्मितम् । तथा अङ्गच्छदैः परिवृतं षट्पत्रयुक्तम् । पुरन्दरान्तैरिति । **पुरन्दरो** लकारस्तदन्तैर्वाद्यैस्तेन व-भ-म-य-र-लेति षड्भिस्तडिदाभवर्णैर्दलवत् परिवृतस्तेन दलावच्छेदे वर्णयोगः प्रतीतः । वर्णान् विशेषयति—**सबिन्दुलसितैरिति** । बिन्दुना सह वर्त्तमानाः सबिन्दवः, लसिताः प्रकाशिताः । सबिन्दवश्च ते लसिताश्चेति तैरित्यर्थः । ततश्चात्र विशेष्य-विशेषण भावकल्पने विशेषणीभूतबिन्दौ लसितत्वकारणत्वं प्रतीयते । "सुरापः पतती"त्यत्र कर्त्तृविशेषण-सुरापाने पतनकर्त्तृत्ववदिति । यद्वा बिन्दूनां लसितं बिन्दुलसितं बिन्दुप्रकाशस्तेन सह वर्त्तमानैर्वाद्यैरित्यर्थः ।। १४ ।।

एतत्पद्मकर्णिकायामम्भोजमण्डलस्थितिमाह—**तस्यान्तर** इति । तस्य पद्मस्याऽन्तरे मध्येऽम्भोजमण्डलम् अम्भोजाकारमण्डलं **प्रविलसत्** प्रकाशमानम् । तत् किम्भूतम् ? **विशदप्रकाशं** शुक्लवर्णम् । पुनः किम्भूतम् ? अर्द्धेन्दुरूपलसितमर्द्धचन्द्रयुक्तमित्यर्थः । इदं जलमण्डलम् । तदाह **शारदायाम्**—

**तथाऽरुणवर्णम् । पुनः कीदृशम् ? अङ्गच्छदैः षड्दलैरावृतम् । कीदृशैः ? तडिदिवाभा वर्णो येषां तथोक्तैः । पुरन्दरो लकारस्तदन्तैर्बिन्दुना परिलसितैरेवम्भूतैर्दलैरित्यर्थः । एतेन वर्णानां सर्वपद्मेषु दलमध्यवर्त्तित्वमायातम् ॥ १४ ॥**

**तस्यान्तर इति । तस्य पद्मस्य मध्ये अम्भसि जातं वरुणस्य मण्डलमास्ते । अथो शब्दः सम्भावनायाम् । कीदृशम् ? प्रकर्षेण विलसन् निर्मलप्रकाशो यस्य तत् तथा । तस्यैव वरुणस्य । अर्द्धेन्दुरूपेण लसितं मनोज्ञम् । अत एव वङ्कारबीजम् अमलं निर्मलशरच्चन्द्र इव शुभ्रम् । मकराधिरूढं मकरो जन्तुविशेष ओङ्कार इति ख्यातस्त-**

**दक्षिणामूर्त्तौ**—स्वाधिष्ठाने विद्रुमाभे बादिलान्तानि संस्मरेत् ।
विद्युत्पुञ्जसमाभानि विद्युद्भासितमस्तके ॥

इत्यादि ।। १४ ।।

विशदप्रकाशं शुक्लवर्णम् । **शारदायाम्**—"तत्तद्भूतसमाभानी"ति प्रागुक्तम् ।

**अर्द्धेन्दुरूपलसितं शरदिन्दुशुभ्रं**
**वङ्कारबीजममलं मकराधिरूढम् ॥ १५ ॥**

वरुणबीजबिन्दुमध्यस्थ-विष्णुस्वरूपम्

**तस्याङ्कदेश-कलितो हरिरेव पायात्**
**नील - प्रकाश-रुचिर - श्रियमादधानः ।**

अम्भोजमम्भसो भूमेश्चतुरस्रं सवज्रकम् । इत्यादि । एतन्मण्डललक्षणमाह **राघवभट्टः**—"अर्द्धचन्द्रं कृत्वा तदुभयभागे सरोजद्वयं कुर्यादि"ति । **तदुक्तमाचार्यैः**—"अब्जोपेतार्द्धेन्दुमद्बिम्बमाप्यमि"ति । मण्डलमध्ये वरुणबीजस्थितिमाह—अथो इति । **तस्येति** । जलाधिष्ठातृत्वेन प्रसिद्धस्येत्यर्थः । **मकराधिरूढमिति** । पाशहस्तञ्च । तदाह—

तदन्वारुणं बीजं श्वेतं मकरवाहनम् ।
पाशहस्तं तदङ्के च हरिं श्यामं चतुर्भुजम् ॥ इति ॥

अयं वरुणबीजस्वरूपो वकारो यवर्गीयः, कुलाकुलचक्रे भूतलिपिमन्त्रे च तद्वकारस्यैव जलबीजत्वेनाऽभिधानात् । स्पष्टमन्यत् ॥ १५ ॥

वरुणबीजस्याङ्क विष्णुस्थितिमाह—तस्याङ्क इति । अङ्के बीजमस्तकस्थबिन्दुमध्ये । धराबीजबिन्दौ ब्रह्मणः स्थितिदर्शनादत्रापि तथा, दृष्टिपरिकल्पनान्यायात् । एवं वक्ष्यमाणं सर्वत्र बोध्यम् । **कलितः** स्थित इत्यर्थः । **नीलप्रकाशरुचिरश्रियमादधान** इति । नीलज्योतिषां या मनोज्ञा शोभा तां दधान इत्यर्थः । नेन नीलतेजःपुञ्जशरीरीति यावत् । **श्रीवत्स-कौस्तुभ-धर** इति । तद्ध्यानमाह **गौतमीये**—

कौस्तुभं हृदये रत्नं सूर्यायुतसमप्रभम् ।
तदधो वनमालाञ्च चन्द्रायुतसमप्रभाम् ॥
कौस्तुभोर्ध्वे च श्रीवत्सं चन्द्रायुतसमप्रभम् ॥ इति ॥

दधिरूढम्, कर्त्तरि क्तः । अत एवाऽम्भोजमण्डलदर्शनात् "कमपि मणिपूरे" इति शङ्कराचार्यश्लोकस्य "महीं मूलाधारे" इत्यत्र चानुपपत्तिः, तत् तद्व्यवसायिभिः प्रतिध्यातव्यम् । वयन्तु तत्र व्यस्तसमस्ततया व्याख्यां ब्रूमः ॥ १५ ॥

तस्याङ्क इति । तस्य बीजस्य क्रोडदेशलसितो हरिर्विष्णुस्त्रिभुवनं पायात् । कीदृशः ? नीलप्रकाशां मनोज्ञां कान्तिमाधत्ते । पीतवस्त्रः । प्रथमयौवनगर्वोद्रेकं

अम्भोजं षड्दलपद्मम् अर्द्धचन्द्रयुतम् । वं बीजं मकराधिरूढम्, "स्वाधिष्ठानं विष्णुगेहं प्रदिष्टं बालार्काभं राकिणी देवतात्र" ॥ इति वचनात् ॥ १५ ॥

तस्याङ्के इत्यादि । नीलद्युतिरूपां मनोज्ञश्रियं शोभाम् आदधानः । गौतमीये—

**पीताम्बरः　　प्रथम-यौवन-गर्वधारी**
**श्रीवत्स-कौस्तुभ-धरो　　धृतवेदबाहुः ॥ १६ ॥**

स्वाधिष्ठानचक्रस्थ-राकिणीशक्तिस्वरूपम्

**अत्रैव भाति सततं खलु राकिणी सा**
**नीलाम्बुजोदर - सहोदर - कान्तिशोभा ।**
**नानायुधोद्यत - करैर्लसिताङ्ग - लक्ष्मी-**
**र्दिव्याम्बराभरणभूषितमत्तचित्ता　　॥ १७ ॥**

हरिस्तेऽस्त्र **तन्त्रान्तरे**——

पाशहस्तं तदङ्के च हरिं श्यामं चतुर्भुजम् ।
शङ्ख-चक्र-गदा-पद्म-धारिणं पीतवाससम् ॥ इति ॥

"पाशहस्तं" वरुणमिति पूर्वेणाऽन्वयः । अन्यत्र—"पीताम्बरं शान्तमूर्त्तिं वनमालाविभूषितम्" । इति । मूलाधारे हंसपृष्ठे ब्रह्मणः स्थितिदर्शनादत्र गरुडोपरि विष्णुश्चिन्तनीयः ॥ १६ ॥

एतत्पद्मे राकिणीशक्तिस्थितिमाह—अत्रैवेति स्पष्टम् । राकिणीध्यान-विशेषमाह—

श्यामां शूलाब्जहस्तां डमरुकरयुतां तीक्ष्णटङ्कं वहन्ती-
मुग्रां रक्तत्रिणेत्रां कुटिलसविलसद्दन्तदंष्ट्राप्रभाभिः ।
दीप्तां तां देवदेवीं द्वितयकमलगां रक्तधारैकनासां
शुक्लान्ने सक्तचित्तामभिमतफलदां राकिणीं चिन्तयेत् ताम् ॥

अत्र पद्मान्तरे राकिण्यः स्थितिदर्शनात् सर्वत्र रक्तपद्मान्तरोपरि षट्-शक्तीनां स्थितिरिति बोध्यम् ॥ १७ ॥

**धर्त्तुं शीलमस्य तथोक्तः । श्रीवत्सचिह्नं कौस्तुभञ्च दधातीत्यर्थः । धृताश्चत्वारो बाहवो येन स तथा ॥ १६ ॥**

**अत्रैवेति । अत्रैव पद्मे खलु निश्चितं सर्वदेवस्य प्रसिद्धा राकिणी आस्ते । नील-पद्मस्योदरतुल्या शोभा यस्याः । नानास्त्रेणोद्यतकरैः प्रकाशमानाऽङ्गशोभा यस्याः सा तथा । दिव्याम्बरालङ्काराभ्यां च मत्तं चित्तं यस्याः सा चेति तथा ॥ १७ ॥**

स्वशब्देन परं लिङ्गं स्वाधिष्ठानं ततो विदुः ॥ इति ॥ १६ ॥

नीलाम्बुजोदरसदृशी कमनीयता शोभा यस्याः सा । नानायुधेति । तदुक्तं तन्त्रान्तरे —

श्यामां शूलाब्जहस्तां डमरुकसहितां तीक्ष्णटङ्कं वहन्तीं
देवीं रक्तत्रिनेत्रां द्वितयदललसद्दंष्ट्रदन्तप्रभाभिः ॥ इति ॥ १७ ॥

स्वाधिष्ठानचक्रचिन्तनफलम्

**स्वाधिष्ठानाख्यमेतत् सरसिजममलं चिन्तयेद् यो मनुष्य-**
**स्तस्याऽहङ्कार-दोषादिक-सकलरिपुः क्षीयते तत्क्षणेन ।**
**योगीशः सोऽपि मोहाद्भुत-तिमिरचये भानुतुल्यप्रकाशो**
**गद्यैः पद्यैः प्रबन्धैर्विरचयति सुधावाक्यसन्दोहलक्ष्मीः ॥ १८ ॥**

स्वाधिष्ठानपद्मादिचिन्तनफलमाह—**स्वाधिष्ठानाख्य**मिति । तदुक्तं—

स्वशब्देन परं लिङ्गं स्वाधिष्ठानं ततो विदुः ॥ इति ॥

अहङ्कारदोषादीत्यादिना कामक्रोधादयो गृह्यन्ते । तेन कामादिषड्-रिपवः क्षीयन्ते इत्यर्थः । **मोहाद्भुत-तिमिरचय** इति । दुर्निवार्य-महा-न्धकार-समूहे इत्यर्थः । ततश्च मायामोहरूपान्धकारनाशाय ज्ञानरूप-सूर्य-माप्नोतीति भावः । स्पष्टमन्यत् ।

**तदयं महावाक्यार्थनिर्णयः ।** स्वाधिष्ठानचक्रं सिन्दूरवर्णषड्दलम् । तद्दलं च तडिदाभ-सबिन्दु-व-भ-म-य-र-लेति-षड्वर्णयुक्तम् । तत्कर्णिकायां मध्यस्थलेऽर्द्धचन्द्रयुक्ताष्टदलपद्माकारमम्भोजमण्डलं शुक्लवर्णम् । तन्मध्ये वँ इति वरुणबीजं मकराधिरूढं पाशहस्तम् । तत्क्रोडे विष्णुर्गरुडोपरिस्थित-श्चतुर्भुजः शङ्ख-चक्र-गदा-पद्म-धारी पीताम्बरो वनमाला-श्रीवत्स-कौतुम्भ-धारी युवरूपः । पद्मकर्णिकायां रक्तपद्मोपरि राकिणि शक्तिः श्यामवर्णा चतुर्भुजा शूलाब्ज-डमरु-टङ्क-धरा त्रिनेत्रा कुलिदंष्ट्रा भयङ्करी शुक्लान्न-रक्तधाराभिलाषिणीति द्वितीयप्रकरणम् ॥ १८ ॥

**स्वाधिष्ठानेति । एतत् स्वाधिष्ठानाख्यं सरसिजं यो मुनीन्द्रश्चिन्तयेत् तस्याऽहङ्कारादिदोषरूपसकलरिपवो ज्ञानप्रतिबन्धकत्वात् शुद्धज्ञानपरिपन्थिनस्तत्क्षणैनैव क्षीणा भवन्तीति । पद्मं कीदृशम् ? अमलं निर्मलम् । स योगीशश्च भवति । मोहाद्भुतान्धकारचये भानुतुल्यप्रकाशश्च भवति । स च गद्यैः संस्कृतया वाचा पद्यैः श्लोकप्रबन्धैर्नानाबन्धादिभिरमृतायमानकाव्यसमूहं श्रिये विरचयति ॥ १८ ॥**

स मोहादभुतान्धकारसमूहे भानुतुल्यस्तन्नाशको भवतीति । सुधेति अमृततुल्यकाव्य-समूहसम्पत्तिं भजन्ते । अत्र पश्यन्ती शक्तिरस्ति । प्रमाणं विशुद्धपद्मव्याख्याने लिखिष्यते ॥ १८ ॥

मणिपूरचक्रस्वरूपम्

**तस्योर्ध्वे नाभिमूले दशदल-लसिते पूर्णमेघ-प्रकाशे**
**नीलाम्भोजप्रकाशैरुपहितजठरे डादिफान्तैः सचन्द्रैः।**
**ध्यायेद् वैश्वानरस्याऽरुणमिहिरसमं मण्डलं तत् त्रिकोणं**
**तद्बाह्ये स्वस्तिकाख्यैस्त्रिभिरभिलसितं तत्र वह्नेः स्वबीजम् ॥ १६ ॥**

मणिपूरचक्रं निरूपयति--**तस्योर्ध्व** इत्यादि-त्रिभिः। तस्य स्वाधिष्ठानस्येत्यर्थः। **दशदललसित** इति दशदलैर्लसिते प्रकाशिते। पद्मे इति शेषः। पद्मे किम्भूते ? **पूर्णमेघप्रकाशे** कृष्णवर्णे। तथा **डादिफान्तैः** ड-ढ-ण-त-थ-द-ध-न-प-फेति-दशवर्णैरुपहितं युक्तं जठरं मध्यं यस्य तद्रूपे इत्यर्थः। सचन्द्रैरिति। चन्द्रोऽर्द्धचन्द्रो युगलाध्ववाहित्वाद् बिन्दुश्च ताभ्यां सह वर्त्तमानैर्वर्णैरित्यर्थः। वैश्वानरस्य वह्नेः। **अरुणमिहिरसमं** बालार्कसदृशमित्यर्थः। स्वस्तिकाख्यैरिति। "स्वस्तिकं नाम परम्परसम्बद्धं विदिग्गतचतुर्वक्त्रं रेखाद्वयमि"ति राघवभट्टोक्तं, तत्प्रकारैस्त्रिभिः स्वस्तिकैस्त्रिकोणावच्छेदेऽभिलसितमित्यर्थः। अत्र वह्निमण्डले वह्निबीजं रँ ॥ १६ ॥

तस्योर्ध्वं इति। तस्य पद्मस्योर्ध्वे नाभिमूले दशदलकमले ललिते मनोज्ञे पूर्णमेघ इव प्रकाशो यस्य एवम्भूते पद्मे वैश्वानरस्य वह्नेः त्रिकोणं मण्डलं ध्यायेत्। कीदृशम् ? अरुणसूर्ययोस्तुल्यम्। पुनः कीदृशम् ? तद्बाह्ये त्रिकोणस्य बहिस्त्रिभिः स्वस्तिकाख्यैरभिलसितम्। तत्रैव वह्निमण्डले वह्नेः स्वबीजमास्ते सानुस्वारो रेफ इति। पद्मे किम्भूते ? नीलाम्भोजस्य प्रकाशो येषाम्, एवम्भूतैः सचन्द्रैर्डकारादिफकारान्तैरुपहितजठरे एतैर्वर्णैरुपशोभितजठरे, उपस्थितमध्ये इत्यर्थः ॥ १६ ॥

मणिपूरपद्मलाह—तस्यर्ध्वे इत्यादिना। तथाच--

मणिवद्भिन्नं तत् पद्म मणिपूरं तथोच्यते। इति।

नीलवर्णे नीलवर्ण-डादिफान्तवर्णैर्युक्ते। तथा च दक्षिणामूर्त्तौ--"सुनीले मणिपूरके। डफान्तानि महानीलप्रभानि परिचिन्तयेदि"ति। वह्नेर्मण्डलं बीजं चाह--वैश्वानरस्येत्यादिना। वैश्वानरस्य वह्नेर्मण्डलं रक्तवर्णं त्रिकोणम् तद्वाह्ये त्रिभिः स्वस्तिकैर्दकाराकारैर्युक्तम्। मायातन्त्रे--

दशपत्रं पयोजातं कर्णिकायां महेश्वरि।
वाह्नेयं मण्डमं रक्तं त्रिकोणं स्वस्तिकान्वितम् ॥

स्वबीजं रेफः। "वर्णैः स्वै रञ्जितान्यासन्" इति प्रागुक्तेः प्रातःसूर्यसमरक्तवर्णम् ॥१६॥

मणिपूरचक्रस्थ-वह्निबीजवर्त्ति-रुद्रस्वरूपम्

**ध्यायेन् मेषाधिरूढं नवतपननिभं वेदबाहूज्ज्वलाङ्गं**
**तत्क्रोडे रुद्रमूर्त्तिर्निवसति सततं शुद्ध-सिन्दूर-रागः ।**
**भस्मालिप्ताङ्गभूषा-भरण-सितवपुर्वृद्धरूपी त्रिनेत्रो**
**लोकानामिष्टदाताऽभयलसितकरः सृष्टिसंहारकारी ॥ २० ॥**

मणिपूरचक्रस्थ-लाकिनीशक्तिस्वरूपम्

**अत्रास्ते लाकिनी सा सकलशुभकरी वेदबाहूज्ज्वलाङ्गी**
**श्यामा पीताम्बराद्यैर्विविधविरचनालङ्कृता मत्तचित्ता ।**

**ध्यायेदिति । भस्मालिप्ताङ्गभूषाभरणसितवपुरिति ।** भस्मलेपनाङ्गभूषाभरणाभ्यां शुक्लीकृतदेह इत्यर्थः । **ध्यायेन् मेषेति ।** ध्याने विशेषमाहाऽन्यत्र--

मेषस्थं साक्षसूत्रञ्च शक्तिहस्तं स्मरेत् ततः ॥ इति ॥

विशेषानभिधानादन्यहस्तद्वये वराभयौ चिन्तनीयौ, ध्यानान्तरे तथा दर्शनात् । **लोकानामिष्टदाता** वरदातेत्यर्थः । **अभयलसितकरस्तेन** वराभयधारीति भावः । अत्र वृषोपरि रुद्रो ध्येयः स्पष्टमन्यत् ॥ २० ॥

**अत्रास्त** इति । **विविधविरचनेति । विविधेन** मणिमुक्तादियोगेन चित्रविचित्रघटनेन **विरचना** यत्र तादृशमलङ्कृतं यस्या इत्यर्थः । यद्वा

ध्यायेदिति । वह्निबीजं ध्यायेदिति पूर्वश्लोकेनाऽन्वयः । कीदृशम् ? मेषमधिरूढम् । प्रातःकालीनसूर्यतुल्यम् । चतुर्बाहुभिरुज्ज्वलाङ्गम् । तस्य बीजकोशस्याऽङ्के रुद्रमूर्त्तिर्निवसति सततमेव । कीदृशः ? शुद्धसिन्दूरस्येव रक्ताकारो यस्य । भस्मलिप्तमेवाऽङ्गभूषाभरणं तेन सितं शुभ्रं वपुर्यस्य । वृद्धाकारः । त्रीणि नेत्राणि यस्य स तथा । त्रिलोकवासिनामभीष्टदाता । अभयलसितकरः । सृष्टेः संहारकारी ॥ २० ॥

अत्रास्त इति । अत्रैव पद्मे सा प्रसिद्धा लाकिनी आस्ते । कीदृशी ? सर्वेषामेव शुभकरी । चतुर्भिर्बाहुभिरुज्ज्वलाङ्गी । श्यामवर्णा । पीतवस्त्राद्यैर्या नाना विरचना

मणिपूरं तु नीलं, "रुद्रस्थानं लाकिनी देवतात्रे"ति वचनात् । तामाह रुद्रमूर्त्तिरित्यादिना । शुद्धसिन्दूररागः अतिशयरक्तवर्णः ॥ २० ॥
वेदबाहूज्ज्वलाङ्गीत्यादि । तदुक्तं तन्त्रे--

नाभिपद्मचिन्तनफलम्

**ध्यात्वैतन् नाभिपद्मं प्रभवति नितरां संहृतौ पालने वा**
**वाणी तस्याननाब्जे निवसति सततं ज्ञानसन्दोहलक्ष्मीः ॥ २१ ॥**

विविधविरचनया अलङ्कृतमलङ्कारो धार्यते यत्रेत्यर्थः। अत्र लाकिनी-ध्यानविशेषमाह--

नीलां देवीं त्रिवक्त्रां त्रिनयनलसितां दंष्ट्रिणीमुग्ररूपां
वज्रं शक्तिं दधानामभय-वर-करां दक्षवामे क्रमेण।
ध्यात्वा नाभिस्थपद्मे दशदलविलसत्कर्णिके लाकिनीं तां
मांसस्थां गौरभक्तोत्सुकहृदयवतीं चिन्तयेत् साधकेन्द्रः॥

नाभिपद्मचिन्तनफलमाह--**ध्यात्वैतदित्यादि**। नाभिपद्मं मणिपूराख्यम्। "तत्पद्मं मणिवद् मणिपूरं तथोच्यते" इति गौतमीयात्। अन्यत् स्पष्टम्।

**तदयं महावाक्यार्थनिर्णयः**। नाभिपद्मं मेघवर्णदशदलम्। तद्दलं च नीलाभसबिन्दु-ड-ढ-ण-त-थ-द-ध-न-प-फेति दशवर्णयुक्तम्। तत्कर्णिकायां त्रिकोणाकारम् त्रिकोणवहिः स्वस्तिकायुक्तं रक्तवर्णं वह्निमण्डलम्। तन्मध्ये रँ इति वह्निबीजं रक्तवर्णं मेषाधिरूढं चतुर्भुजं वज्रशक्तिवराभयधरम्। तत्क्रोडे रुद्रो वृषारूढो रक्तवर्णो द्विभुजो वराभयधारी भस्मलेपनशुक्लाभरणाभ्यां शुक्लीकृतदेहो वृद्धरूपः। पद्मकर्णिकायां रक्तपद्मोपरि लाकिनीशक्तिर्नीलवर्णा त्रिवक्त्रा त्रिनेत्रा चतुर्भुजा वज्रशक्त्यभयवरकरा घोरदंष्ट्रा रक्तयुक्तखेचरान्नमांसाभिलाषिणीति तृतीयप्रकरणम्॥ २१॥

तया अलङ्कृता। मत्तं चित्तं यस्याः सा तथा। एतन्नाभिपद्मं मणिपूरकाख्यं ध्यात्वेत्यर्थः। संहारे पालने च प्रभवति समर्थो भवति। तस्याननाब्जे सप्ततमेव वाणी विलसति। कीदृशी? ज्ञानसमूहस्य प्राप्तिर्यतः। एनेन ब्रह्मविष्णुशिवतुल्यो भवतीत्यर्थः॥ २१॥

कृष्णां देवीं त्रिवक्त्रां त्रिनयनसहितां कुब्जिनीमुग्ररूपां
वज्रं शक्तिं सदण्डामभयवरकरां दक्षवामे दधानाम्।

इत्यादि। ज्ञानेति। ज्ञानसमूहेन सह लक्ष्मीस्ताम्॥ २१॥

अनाहतपद्मस्वरूपम्

**तस्योर्ध्वे हृदि पङ्कजं सुललितं बन्धूककान्त्युज्ज्वलं**
**काद्यैर्द्वादश वर्णकैरुपहितं सिन्दूररागान्वितैः ।**
**नाम्नाऽनाहतसंज्ञकं सुरतरुं वाञ्छातिरिक्तप्रदं**
**वायोर्मण्डलमत्र धूमसदृशं षट्कोणशोभान्वितम् ॥ २२ ॥**

हृदि पङ्कजं निरूपयति—तस्योर्ध्व इत्यादि-षड्भिः । **हृदि पङ्कजमिति ।** एवम्भूतं **पङ्कजं हृदि** ध्यायेदिति क्रियाध्याहारेणाऽन्वयः । **सुललितं** सुस्निग्धमित्यर्थः । काद्यैरिति । क-ख-ग-घ-ङ-च-छ-ज-झ-ञ-ट-ठेति द्वादश-वर्णकैरिति बोध्यम् । तैरुपहितं युक्तमित्यर्थः । **नाम्नाऽनाहतसंज्ञकमिति ।**

शब्दब्रह्ममयः शब्दोऽनाहतस्तत्र दृश्यते ।
अनाहताख्यं पद्मं तन्मुनिभिः परिकीर्त्तितम् ॥

इति वचनादनाहतनामपद्ममिति तात्पर्यम् । यतः **सुरतरुं** कल्पतरुस्वरूप-मतो **वाञ्छातिरिक्तफलप्रदमिति** हेतुगर्भविशेषणमिति भावः । तत्पद्म-कर्णिकायां वायुमण्डलस्थितिमाह—वायोरिति ॥ २२ ॥

तस्योर्ध्व इति । तस्य पद्मस्योर्ध्वे हृदि सुललितं मनोरमं नाम्नाऽनाहतसंज्ञकं पद्ममास्ते । कीदृशम् ? बन्धूककान्तिवदुज्ज्वलम् । सिन्दूरराग इवाञ्चितैः प्राप्तैः । ककाराद्यैः ठकारान्तैर्द्वादशसंख्यकवर्णैर्दलमध्यवर्त्तिभिरुपशोभितम् । पुनः कीदृशम् ? सुरतरुः कल्पवृक्षस्तत्तुल्यम्, अतो वाञ्छातिरिक्तप्रदं वाञ्छितस्याप्यतिददातीति तत् तथा । अयम्भावः—कल्पवृक्षाः पूर्णवाञ्छितफलदातारः, अयन्तु तदतिरिक्तं मोक्षफलञ्च ददातीत्यर्थ । अत्रैव मण्डले वायोर्मण्डलं विद्यते । कीदृशम् ? धूमसदृशम् ? पुनः कीदृशम् ? षट्कोणस्य या शोभा तया अन्वितम् ॥ २२ ॥

अनाहतपद्ममाह—तस्योर्ध्वे इत्यादि । बन्धूकपुष्पकान्तिस्वरूपरक्तवर्णं कादि-ठान्तैः द्वादशवर्णैः सिन्दूरवर्णैर्युक्तम् । तथाच दक्षिणामूर्त्तौ—

पिङ्गवर्णे महावह्निकलिकाभानि संस्मरेत् ।
कादिठान्तानि वर्णानि चतुर्थेऽनाहते प्रिये ॥ इति ॥

तन्मध्ये षट्कोणपद्मं वायुमण्डलम् । तथाच मायातन्त्रे —

अनाहतं द्वादशारं रक्ताभं हृदि सुव्रते ।
तन्मध्ये पावनं पद्मं षट्कोणं धूम्रवर्णकम् ॥ इति ॥ २२ ॥

## वायुमण्डलमध्यस्थ-वायुबीज-स्वरूपम्

तन्मध्ये पवनाक्षरञ्च मधुरं धूमावली-धूसरं
ध्यायेत् पाणिचतुष्टयेन लसितं कृष्णाधिरूढं परम्।
तन्मध्ये करुणा-निधानममलं हंसाभमीशाभिधं
पाणिभ्याममभयं वरञ्च विदधल्लोकत्रयाणामपि ॥ २३ ॥

वायुमण्डलमध्ये वायुबीजमाह—**तन्मध्य** इति। **पवनाक्षरं** यँ इति बीजम्। मधुरं मनोहरम्। **धूमावलीधूसरमिति**। धूमश्रेण्यावृतदेहत्वाद् धूमधूम्रवर्णमिति भावः। **कृष्णाधिरूढमिति**। कृष्णसाराधिरूढमित्यर्थः। वरुणहस्ते पाशदर्शनादत्र वायुहस्तेऽङ्कुशो ध्येयः। वायुबीजमध्ये ईशस्थितिमाह—तन्मध्य इति। स्पष्टम्। सर्वत्र शिवस्य त्रिनेत्रम्। शिवस्य त्रिनेत्रत्वादयं त्रिनेत्रः। एवं "ग्रैवेयाङ्गदहारनूपुरयुतं क्षौमाम्बरं चिन्तयेदि" त्यादि कर्मान्तरोक्त-ध्यानप्राप्त क्षौमाम्बरत्वमीशस्य। एवं "कान्तं कान्त-शशाङ्ककोटिकिरणं प्रोद्यत्कपर्द्दोज्ज्वलमि"ति ॥२३॥

तन्मध्य इति। तस्य मण्डलस्य मध्ये पवनाक्षरं वायुबीजम्। अक्षरपदेन बीज-मुच्यते। एतत्प्रकारं यस्य मण्डलं तस्यैव बीजमिति दृष्टत्वात्। कीदृशम्? मधुरं हृदयङ्गमम्। पुनः कीदृशम्? दीपकलिकाकारजीवात्मसम्बन्धिनी या धूमवली तथा धूसरम्। पाणिचतुष्टयेन लसितम्। कृष्णाजिनाधिरूढम्। परं प्रकृष्टञ्च। एवम्भूतं बीजं ध्यायेत्। तत्र वायुमण्डले। ईश एवाभिधा नाम यस्य, एवम्भूतं शूलपाणेर्वपुरास्ते। कीदृशम्? करुणावारिधिस्वरूपम्। अमलं निर्मलम्। हंसाभं सूर्य इव शोभा यस्य। पुनः कीदृशम्? पाणिभ्यां कराभ्याममभयं वरञ्च लोकत्रयाणामपि विदधत्। एतेनेयं मूर्त्तिर्हस्तपादादिविशिष्टेति ॥ २३ ॥

वायुबीजमाह—तन्मध्ये इत्यादिना। पवनाक्षरं यं। प्रमाणमाधारपद्मव्याख्याने उक्तम्। धूसरं ईषत् पाण्डुरम्। हस्तचतुष्टययुक्तं कृष्णसाराधिरूढम्। "रक्तमनाहत-मीश्वरगेहन्तु काकिन्यपीहोक्ता" इति वचनात्। तदेवाह—तन्मध्ये करुणानिधान-मित्यादिना। ईशाभिधमीश्वरनामानम्। हंसाभं सूर्यप्रभम्। अभयवरपाणिद्वय-युक्तम् ॥ २३ ॥

पद्मकर्णिकास्थ-काकिनीशक्ति-स्वरूपम्

**अत्रास्ते खलु काकिनी नवतडित्पीता त्रिनेत्रा शुभा**
**सर्वालङ्करणान्विता हितकरी सम्यग् जनानां मुदा।**
**हस्तैः पाश-कपाल-शोभन-वरान् संबिभ्रती चाभयं**
**मत्ता पूर्णसुधारसार्द्रहृदया कङ्कालमालाधरा ॥ २४ ॥**

अत्र कर्णिकायां काकिनीशक्तिस्थितिमाह--**अत्रास्त** इति। **मत्ताऽस्व-भावस्था** स्खलितभावा। **पूर्णसुधारसार्द्रहृदयेति**। **पूर्णः** सम्पूर्णस्तृप्तिजनको यः **सुधारसस्तेनार्द्रं** परोपकाराभिमतकोमलं हृदयं चित्तं यस्या इत्यर्थः। यद्वा पूर्णः पूर्णानन्दजनको यः सहस्रदलकमलान्तर्विगलितपरमामृतरसस्तेनार्द्रं परमानन्दोत्फुल्लशिथिलं हृदयं यस्या इत्यर्थः। अन्यत् स्पष्टम्।

कृष्णाम्बर-परीधानां नानाभरण-भूषिताम्।
ध्यायेच्छशिमुखीं नित्या काकिनीं मन्त्रसिद्धये॥

इति ध्यानप्राप्त-कृष्णाम्बरत्वमस्या बोध्यम्॥ २४॥

**अत्रास्त इति। अत्रैव पद्मे खलु निश्चितं काकिनी देवी आस्ते। नूतनविद्युदिव पीतवर्णा। त्रीणि नेत्राणि यस्याः सा। शुभा शुभदायिका। सर्वालङ्कारैरावृता। मुद्रा हर्षेण। जनानां सम्यक्प्रकारेण हितकारी। चतुर्भिर्हस्तैः कपाल-शूल-शोभनवराभयान् संबिभ्रती। मत्ता उन्मत्ता। कङ्कालमालाधरा अस्थिमाल्यधरा॥ २४॥**

तत्र काकिनी नवतडित्पीता गौरवर्णा त्रिनेत्रा पाशकपालवराभयान् चतुर्भिर्भुजैः बिभ्रती। कङ्कालेति अस्थिमालाधरा। "स्यात् शरीरास्थि कङ्कालः" इत्यमरः। तथाच तन्त्रे--

............................काकिनी मेघ(द)संस्थाम्।
पाशं शूलं कपालं डमरुमपि करैर्धारिणीं पीतवर्णां
दध्यन्ने सक्तिचित्तां स्ववयवनमितां वारुणीसक्तचित्ताम्॥

शूलडमरुस्थाने वराभयं तथा अस्थिमालेति **तन्त्रान्तरे** उक्तम्।

वाणलिङ्गं तु तन्मध्येऽधोमुखे शक्तिके इति।

त्रिस्त्रिकोणयुक्ते इति **क्रमात्**। तथा--

तन्मध्ये वाणलिङ्गन्तु सूर्यायुतसमप्रभम्।
शब्दब्रह्ममयः शब्दो न हेतुस्तदहेतुकः॥
अनाहताख्यं तत्पद्मं पुरुषाधिष्ठितं परम्॥

"पुरुषेण जीवात्मना" इति गौतमीयाच्च॥ २४॥

पद्मकर्णिकामध्यस्थ-त्रिकोणस्वरूपम्

**एतन्नीरज - कर्णिकान्तर - लसच्छक्तिस्त्रिकोणाभिधा**
**विद्युत्कोटिसमानकोमलवपुः सास्ते तदन्तर्गतः ।**
**बाणाख्यः शिवलिङ्गकोऽपि कनकाकाराङ्गरागोज्ज्वलो**
**मौलौ सूक्ष्मविभेदयुङ् मणिरिव प्रोल्लासलक्ष्म्यालयः ॥ २५ ॥**

एतत्पद्मकर्णिकामध्ये त्रिकोणं निरूपयति—**एतदिति** । **त्रिकोणाभिधा** त्रिकोणाकारा । शक्तिरित्यनेन त्रिकोणस्याऽधोमुखत्वं ज्ञापितम् । **सा आस्ते** इत्यन्वयः । एतत् त्रिकोणं वायुबीजस्याऽधोदेशे । तदाहान्यत्र—

तत्क्रोडे ईशं तदधस्त्रिकोणे बाणलिङ्गकम् ।

इति । बाणाख्यलिङ्गं विशेषयति–**मौलौ सूक्ष्मविभेदयुगिति** । शिवलिङ्ग-मस्तकेऽर्द्धचन्द्रबिन्दुयोगात् तद्बिन्दुमध्ये शून्यरूपो त्रिभेदश्छिद्रं, तेन युक्त इत्यर्थः । **तदाह**—

त्रिकोणान्तर्बाणलिङ्गं कनकाभरणैर्युतम् ।
चन्द्रार्द्धमस्तकं देवं मध्ये रक्ताम्बुजं परम् ॥

इति । "मध्ये रक्ताम्बुजमि"ति हृत्पद्मस्य कर्णिकाधोदेशे ऊर्ध्वमुखरक्त-वर्णाष्टदलपद्ममित्यर्थः । एतत्पद्मोपरि मानसपूजा कार्या । तदुक्तं यथा—

तन्मध्येऽष्टदलं रक्तं तत्र कल्पतरुं तथा ।
इष्टदेवासनं चारु चन्द्रातपविराजितम् ॥
तथा—नानापुष्पफलैर्युक्तं मञ्जुवाक्पक्षिशोभितम् ।
इत्याद्यभिदाय–तत्र ध्यायेदिष्टदेवं तत्तत्कल्पोक्तमार्गतः ॥

इति । अलं विस्तरेण प्रकृतमनुसरामः । बाणलिङ्गमस्तके बिन्दुप्रकाशदृष्टा-माह—**मणिरिवेति** । यथा सरन्ध्रमणिप्रकाशस्तथा शिवलिङ्गोपरि बिन्दु-

**एतन्नीरज इति । एतत्पद्मकर्णिकान्तरप्रकाशा त्रिकोणाभिधा शक्तिरास्ते । प्रसिद्ध-त्वात् सेति । तदन्तर्गता सती आस्ते इति सम्बन्धः । यद्वा स एव शिवोऽन्तर्गतो यस्याः सा तथा । तस्याः शक्तेर्मौलावुपरि बाणाख्यः शिवलिङ्गकः समास्ते । स्वर्णाकारेणा-ऽङ्गरागेणोज्ज्वलः । सूक्ष्मरूपेणा विशेषभेदं युनक्तीति । एवम्भूतो मणिरिव । पुनः**

त्रिकोणं बाणलिङ्गं जीवात्मानञ्चाह— एतन्नीरजेत्यादिना । कनकं बन्धूकपुष्प-सदृशं, बन्धूकः पुष्पविशेषः तद्वदङ्गरागोज्ज्वलः ।

हेमबन्धूककुसुमशरच्चन्द्रनिभानि च ।

हृत्पद्म-चिन्तन-फलम्

**ध्यायेद् यो हृदि पङ्कजं सुरतरुं शर्वस्य पीठालयं**
**देवस्याऽनिलहीनदीपकलिकाहंसेन संशोभितम् ।**

प्रकाश इति भावः । **प्रोल्लासलक्ष्म्यालय** इति । प्रोल्लासः कालोद्गमस्तच्छोभायुक्त इत्यर्थः ।। २५ ।।

हृत्पद्मचिन्तनफलमाह—ध्यायेदित्यादि-द्वाभ्याम् । अस्यार्थः—यो **जनो हृदि पङ्कजं ध्यायेत्** स जनो **वाचामीश्वरो** वृहस्पतिसमो भवति । एवं सर्वत्र । ईश्वर इत्यादिप्रथमान्तेन भवति-क्रियान्वयो बोध्यः । अत्र पद्मकर्णिकायां हंसरूपजीवात्मस्थितिमाह—अनिलहीनदीपकलिकाहंसेन संशोभितमिति । वायुरहिता या दीपकलिका तत्सदृशहंसेन संशोभितमित्यर्थः । ततश्च पद्मकर्णिकायां वाताहतिरहितस्थिरतर-दीपशिखाकारहंसरूपो जीवात्मा वर्त्तत इति भावः । एतत्कर्णिकायां सूर्यमण्डलस्थितिं ज्ञापयति—**भानोर्मण्डलमण्डितान्तरलसत्किञ्जल्कशोभाधरमिति** । भानोर्मण्डलेन मण्डिता भूषिता ये अन्तरलसन्तः कर्णिकामध्ये प्रकाशमानाः किञ्जल्काः केसरा अथवा याः किञ्जल्कशोभास्ता धारयतीत्यर्थः ।

अत्र भानुमण्डलमण्डितत्वं किञ्जल्कविशेषणं, नत्वन्तरविशेषणम् । तथात्वे सर्वस्मिन् पद्मे किञ्जल्कशोभाधरत्वादत्र विशेषोपादानं व्यर्थं स्यात् । भानोर्मण्डलमण्डितत्वविशेषणविशिष्टत्वे तादृशविशिष्टकिञ्जल्कानामन्य-

**कीदृशः ? प्रोद्दामलक्ष्म्यालयः । सूक्ष्मभेदकत्वात् तस्याः शक्तेरेव प्रकृष्टोद्दामश्रियस्तत्रालय इति ।। २५ ।।**

ध्यायेदिति । य एतत् पद्मं कल्पवृक्षतुल्यं हृदि ध्यायेत् सः एवमेवं भवति । वाचामीश्वरो बृहस्पतितुल्यः । जगतामीश्वरः । रक्षाविनाशक्षमश्च अर्थाज् जगताम् । पद्मं कीदृशम् ? शर्वस्य देवस्य पीठालयम् । पुनः कीदृशम् ? अनिलहीनदीपकलिकारूपहंसे-

इति **योगिन्येकवाक्यत्वात्** । स्वयम्भूवाणलिङ्गेतरलिङ्गविशेषणं—हेमादि । मौलौ मस्तके सूक्ष्मविभेदयुक्तो विवरयुक्तो मणिरिव दीप्तचिह्नालयः ।। २५ ।।

सर्वस्य देवस्य पीठालयं निर्वात्तदीपशिखाकारहंसेन जीवात्मना शोभितम् । **मायातन्त्रेऽपि**—"आत्मा तत्र प्रदीपाभः" इति । भानोरित्यस्य मण्डलपदेनैकदेशेन

**भानोर्मण्डलमण्डितान्तरलसत्किञ्जल्कशोभाधरं**
**वाचामीश्वर ईश्वरोऽपि जगतां रक्षाविनाशे क्षमः ॥ २६ ॥**
**योगीशो भवति प्रियात् प्रियतमः कान्ताकुलस्याऽनिशं**
**ज्ञानीशोऽपि कृती जितेन्द्रियगणो ध्यानावधानक्षमः ।**

त्रासत्त्वात् तदुपादानं सार्थकमिति । एवञ्च भानोर्मण्डलस्य कर्णिकारूपकत्वे तत्तेजसा सर्वेषां किञ्जल्कानां शोभाधिक्यरूपमण्डितत्वं सम्भवति, नत्वेकदेशस्थितत्वे । ततश्च तत्कर्णिकायामादौ कर्णिकाव्यापकं वायुमण्डलं, तदुपरि तथा सूर्यमण्डलम्, तदुपरि वायुबीजत्रिकोणादिकं ध्येयम् । युक्तञ्चैतत्, मानसाऽर्चनायां "मं वह्निमण्डलाय दशकलात्मने नम" इत्यादिना पूजायामुपर्युपरिक्रमेण बह्न्यर्कचन्द्रमण्डलस्थितिदर्शनाद् दृष्टपरिकल्पनान्यायावतारात् । अलमतिविस्तरेण ।

ईश्वर इति । सृष्टिकर्त्ता इत्यर्थः । **रक्षाविनाशे क्षमः** स्थितिप्रलयकर्त्ता इत्यर्थः । तेन स जनः सृष्टिस्थितिप्रलयकर्त्तेति तात्पर्यार्थः ॥ २६ ॥

**योगीश** इति । **प्रियात् प्रितमः कान्ताकुलस्येति** योषिद्वर्गस्य कर्मकुशलः । **जितेन्द्रियगण** इति । जितेन्द्रियाणां मध्ये गण्यते तुल्यत्वेन गृह्यतेऽसावित्यर्थः । **ध्यानावधानक्षमो** ध्याने ब्रह्मचिन्तनेऽवधानाय स्थिरमनोऽभिनिवेशं कर्त्तुं क्षमः समर्थ इत्यर्थः । **काव्याम्बुधारावह** इति । काव्यरूपाम्बूनां धारा अविच्छेदनिःसरणमुह्यते धार्यते येन, तादृशो भवतीति । लक्ष्मीरङ्गणदैवतो विष्णुसदृश इत्यर्थः । यद्वा लक्ष्मीः सम्पत्तिः रङ्गणमानन्दानुभवो दैवमदृष्टं तत्समूहो दैवता जनतावत्, ततश्च लक्ष्मीभी रङ्गणाय दैवता यस्येति वहुव्रीह्यर्थे णप्रत्ययनेन तत्पदं सिद्धम् । अत एवोक्तम्—

**नाऽऽत्मना संशोभितम् । भानोर्मण्डलेन मण्डितेऽन्तरे लसन्ती प्रकाशमाना केशरशोभा भावो यस्य तत्तथा ॥ २६ ॥**

**योगीश इति । एतत्पङ्कजध्यानपरो जन एव भवति । योगीशः कान्ताकुलस्य सर्वस्त्रीणां प्रियात् स्वामिनोऽपि प्रियतमो भवति । ज्ञानीशः कृति च भवति । जित-**

सहान्वयः । तेन मण्डलमण्डितमन्तरं मध्यं यस्य स चासौ तसत्किञ्जल्कश्चेति स तथा । तस्य शोभाधरम् । "किञ्जल्कः केसरोऽस्त्रियाम्" इत्यमरः ॥ २६ ॥

**गद्यैः पद्यपदादिभिश्च सततं काव्याम्बुधारावहो**
**लक्ष्मीरङ्गणदैवतः परपुरे शक्तः प्रवेष्टुं क्षणात् ॥ २७ ॥**

इह भुक्त्वा वरान् भोगानन्ते मुक्तिपदं व्रजेत् ॥

इति **परपुरे शक्तः प्रवेष्टुं** क्षणादिति। दुर्गद्वारपालादिना दुर्गमीकृतायामपि परपूर्यां प्रवेष्टुं शक्तः प्रवेशकारणभूतादर्शनाकाशगमनादियोग्यतापन्नो भवतीत्यर्थः ।

अत्र केचिद् 'दैवतमि'ति बिन्द्वन्तं पठित्वा यद्यपि जनविशेषणतया दवतमित्यस्य पुंस्त्वं भवितुं पार्यते, तथाप्यजहल्लिङ्गत्वान्नपुंसकत्वमिति वदन्ति । तन्न । "वृन्दारका दैवतानि पुंसि वा देवता स्त्रियामि"त्यमरकोशे दैवतशब्दस्य पुंनपुंसकत्वकथनाद् दैवत इति विसर्गान्तपाठोऽपि साधुः । प्रदर्शितार्थे तु सुतरां तथेति । स्पष्टमन्यत् ।

**तदयं महावाक्यार्थनिर्णयः** । हृत्पद्मं बन्धूकाभं सिन्दूराभ-सबिन्दु-क-ख-ग-घ-ङ-च-छ-ज-झ-ञ-ट-ठेति द्वादशवर्णयुक्त-द्वादशदलम् । तदुपरि सूर्यमण्डलम् । तन्मध्ये विद्युत्कोटिनिभ-त्रिकोणम् । तदूर्ध्वे वायुबीजं कृष्णसाराधिरूढं धूमधूम्राभं चतुर्भुजमङ्कुशहस्तम । तत्क्रोडे हंसाभ ईशो द्विभुजो वराभयकरस्त्रिनेत्रः । अत्र कर्णिकायां रक्तपद्मोपरि काकिनीशक्तिः पीतवर्णा चतुर्भुजा पाश-कपाल-वराभयकरा पीतवस्त्रा सर्वालङ्करणान्विता सुधार्द्रहृदया कङ्कालमालाधरा । मध्यत्रिकोणे बाणलिङ्गशिवोऽर्द्धचन्द्रबिन्दुरूपमस्तकः स्वर्णवर्णः कामोद्गमोल्लसितः । तदधः स्थिरतरदीपकलिकाकारहंसरूपी जीवात्मा । एतत्कर्णिकाधोरक्तवर्णोर्ध्व-मुखाष्टदलपद्मम् । तत्र कल्पवृक्ष-रत्नवेदी-चन्द्रातप-पताकाद्यलङ्कृतं मानसपूजास्थानमिति चतुर्थप्रकरणम् ॥ २७ ॥

मिन्द्रियं नमो येन स तथा । ध्यानेनाऽवधाने क्षमो भवति । गद्यैः संस्कृतिवाक्यैः पद्यपदादिभिः श्लोकादि-प्रबन्धैर्गद्यपद्यरूपाम्बुधारावहो भवति । अत्यन्तवर्षणशीलो मेघरूपो भवतीति यावत् । लक्ष्मीतत्कुलदैवतमिति प्रशस्तलक्ष्म्याश्रयः कुलश्रेष्ठश्च भवतीत्यर्थः । यद्वा लक्ष्मीविशिष्टा कुलदेवता यस्य स तथा, स सत्कुलीनो भवतीति यावत् । दैवतमिति स्वार्थे अण् । एवं सः क्षणादेव परपुरे अन्यशरीरे प्रवेष्टुं समर्थो भवति । कुमारीतन्त्रे परपुरप्रवेशस्याप्येतत्पद्मध्यानफलत्वेनाभिधानात् ॥ २७ ॥

कण्ठस्थ-विशुद्धचक्र-स्वरूपम्

**विशुद्धाख्यं कण्ठे सरसिजममलं धूमधूम्रावभासं**
**स्वरैः सर्वैः शोणैर्दलपरिलसितैर्दीपितं दीप्तबुद्धेः ।**

इदानीं कण्ठदेशे विशुद्धचक्रं निरूपयति—**विशुद्धाख्यमित्यादि-चतुर्भिः ।** **विशुद्धाख्यमिति ।**

विशुद्धिं तनुते यस्माज्जीवस्य हंसलोकनात् ।
विशुद्धं पद्ममाख्यातमाकाशाख्यं महत् परम् ।। इति ।।

अस्यार्थः—**कण्ठे** विशुद्धाख्यं विशुद्धनामकं **सरसिजं समास्ते** इत्यन्वयः । पद्मं विशेषयति—अमलमिति । तेजोमयत्वान् मलरहितामित्यर्थः । स्वरैः सर्वैरकारादिविसर्गान्तैः षोडशस्वरैर्दीप्तबुद्धेर्निरन्तरयोगाभ्यासेन विषयानुरागरूपमलरहितत्वेन प्रकाशितबुद्धेः साधकस्य सम्बन्धे दीपितं प्रकाशितमित्यर्थः । स्वरैः किदृशैः ? **दलपरिलसितैरिति** । एतेन स्वराणां षोडशत्वादेतत् पद्मं षोडशदलमिति सूचितम् । व्यक्तमाहाऽन्यत्र--

तदूर्ध्वे षोडशदलं पङ्कजं धूम्रवर्णकम् ।
युक्तं शोणैः षोडषभिः स्वरैर्बिन्दुविभूषितैः ।
आरक्तकिञ्जल्कयुतं व्योममण्डलमण्डितम् ।।

इति । तथा **पूर्णेन्दुप्रथिततमनभोमण्डलं** पूर्णचन्द्रमण्डलवत् सम्पूर्णं शुक्लवर्णाञ्च, अत एव "तत्तद्भूतसमाभानि मण्डलानि विदुर्बुधा" इति शारदोक्तवचनेन मण्डलानां तत्तद्दैवतभूतसमानवर्णविधानान् नभसः शुक्लवर्णत्वात् तन्मण्डलस्यापि शुक्लवर्णत्वं प्रतीयते । **नभोमण्डलं वृत्तरूपं समास्ते** । एतत्पद्मकर्णिकायामिति शेषः । **शुक्लवर्णाम्बरस्येति** । नभोमण्डलस्य मध्ये शुक्लवर्णस्याऽम्बरस्याकाशस्याऽङ्के "सदापूर्वो देवः शिव इति च समाख्यानसिद्धः" सदाशिवनाम्ना ख्यातो देवः सततं निवसतीति द्वितीयश्लोकेनाऽन्वयः । अम्बरस्य कीदृशस्य ? **हिमच्छायानागोपरि लसिततनोः**

विशुद्धाख्यमिति । अन्यत् निर्मलं विशुद्धाख्यं पद्मं कण्ठे आस्ते । किम्भूतम् ? धूमेन या धूम्राभा तस्या इव द्युतिर्यस्य तत्तथा । पुनः कीदृशम् ? सर्वैः षोडस्वरै रक्ताकारैर्दलैः परिलसितैर्दीपितं प्रकाशितम् । दीप्तबुद्धेर्दीपाकारबुद्धेर्जनस्य ज्ञानविषयो भवतीत्यर्थः । तत्रैव पद्मे शुक्लवर्णाम्बरधरस्य विष्णोः पूर्णेन्दुरिव प्रथिततमं ख्यातं

विशुद्धपद्ममाह—विशुद्धाख्याति । हिमच्छायायुक्तस्य नागस्योपरि लसित-

समास्ते पूर्णेन्दुप्रथिततम-नभोमण्डलं वृत्तरूपं
हिमच्छायानागोपरि लसिततनोः शुक्लवर्णाम्बरस्य ॥ २८ ॥

नभोबीजमध्यस्थ-सदाशिव-स्वरूपम्

भुजैः पाशाभीत्यङ्कुशवरलसितैः शोभिताङ्गस्य तस्य
मनोरङ्के नित्यं निवसति गिरिजाभिन्नदेहो हिमाभः ।

हिमच्छायया नागो हिमच्छायानाग इति तृतीयान्ततत्पुरुषेण हिमोपमाविशिष्टनाग इत्यर्थः । यद्वा हिमच्छायातुल्यो नाग इति शाकपार्थिवादित्वान् मध्यपदलोपे तत्पदसिद्धया शुक्लवर्णनाग इत्यर्थः । अत्र नागो हस्ती । व्यक्तमाह **भूतशुद्धौ**—तदन्तर्व्योमबीजञ्च शुक्लं हैमगजस्थितम् । इति । 'हैमे'ति हिमस्यायमिति इदमर्थतद्धितप्रत्ययेन हैमगजः शुक्लहस्ती इत्यर्थः । ततश्च शुक्लहस्त्युपरि परिलसिता प्रकाशमाना तनुर्यस्य तादृशस्येत्यर्थः ॥ २८ ॥

**भुजैरिति** । पुनः कीदृशस्य ? भुजैः **पाशाभीत्यङ्कुशवरलसितैः शोभिताङ्गस्येति** । पाशाङ्कुश-वराभय-हस्तस्येति फलितार्थः । पुनः कीदृशस्य ? मनोरिति । हँ इत्याकाशबीजं तदात्मकस्येत्यर्थः । तेनाऽत्र कर्णिकान्तरे नभोबीजं स्थितम् । तत् तूक्तरूपेण चिन्तनीयमिति तात्पर्यम् ।

सदाशिवं विशेषयति—**गिरिजाभिन्नदेह** इति अर्द्धनारीश्वर इत्यर्थः । **हिमाभः शुक्लवर्णः** । ततश्चार्द्धनारीश्वरत्वाद् वामार्द्धदेहं सुवर्णाभं दक्षिणार्द्धं शुक्लमिति । व्यक्तमाह—

शुक्लाम्बरेण संवीतं तत्र देवं सदाशिवम् ।
गिरिजाभिन्नदेहार्द्धं रोप्यहैमशरीरकम् ॥

नभोमण्डलं समास्ते । यद्वा पूर्णेन्दुना ख्याततमम् । "वियद्विष्णुपदो"त्यमरः । विष्णोः किम्भूतस्य ? हिमवर्णाभकान्तिर्विभा यस्य, एवम्भूतस्य नागस्योपरि लसिता तनुर्यस्य ॥ २८ ॥

भुजैरिति । तस्य विष्णोर्मनोरङ्के बीजाकारमूर्त्तेरङ्के पञ्चास्यः शिवो निवसति नित्यमेव । तस्य किम्भूतस्य ? पासाभित्यङ्कुशवरपरिलसितभुजैः शोभिताङ्गस्य ।

शरीरस्य चतुर्भिर्भुजैः पाशाङ्कुशादिलसितैः शोभितशरीरस्य दीप्तबुद्धेः उद्दीप्तज्ञानस्य ॥ २८ ॥

हिमाभः शुक्लः । सदाशिव इत्याख्यायुक्तः । सिद्धः प्रसिद्धः । तथा तन्त्रान्तरेऽपि—

**त्रिनेत्रः पञ्चास्यो ललितदशभुजो व्याघ्रचर्माम्बराढ्यः**
**सदापूर्वो देवः शिव इति च समाख्यानसिद्धः प्रसिद्धः ॥ २६ ॥**

पद्मकर्णिकास्थ-शाकिनीशक्ति-स्वरूपम्

**सुधासिन्धोः शुद्धा निवसति कमले शाकिनी पीतवस्त्रा**
**शरं चापं पाशं सृणिमपि दधती हस्तपद्मैश्चतुर्भिः ।**

इति । 'तत्र' नभोबीजक्रोणे इत्यर्थः । तथा सदा सुधास्राविचन्द्रमसः कलाधोमुखान्वितमिति । **निर्वाणतन्त्रे** विशुद्धचक्राधिकारे--

यन्त्रमध्ये च वृषभं महासिंहासनं ततः ।
तस्योपरि सदा गौरी दक्षभागे सदाशिवः ॥
त्रिनेत्रः पञ्चवक्त्रश्च प्रतिवक्त्रे त्रिलोचनम् ।
विभूतिभूषिताङ्गश्च रजताचलसोदरः ॥
व्याघ्रचर्मधरो देवः फणिमालाविभूषितः ।

इत्यादि । "तस्योपरि सदागौरी"ति शिवस्याऽर्द्धाङ्गरूपेण स्थितेति । व्यक्तमाह तत्रैव--

या गौरी लोकमाता च शम्भोरर्द्धाङ्गहारिणी ॥

इति । **ललितदशभुज** इति । लावण्येन प्रशंसितदशहस्तयुक्त इत्यर्थः । अत्र देवस्य दशभुजेष्वस्त्रविशेषानभिधानात्--

शूलं टङ्क-कृपाण-वज्र-दहनान् नागेन्द्र-घण्टाङ्कुशान् ।
पाशाभीतिकरं दधानममिताकल्पोज्ज्वलाङ्गं भजे ॥

इति ध्यानान्तरे यान्यस्त्राण्युक्तानि तान्यस्य भुजेषु चिन्तनीयानीति ध्येयम् । **प्रसिद्ध** इति । प्राधान्येन ख्यात इत्यर्थः । अन्यत् सुगमम् ॥ २६ ॥

एतत्पद्मकर्णिकायां शाकिनीशक्तिस्थितिमाह--**सुधासिन्धोरित्यादि** । **कमले** विशुद्धचक्रकर्णिकायां शाकिनीनाम्नी शक्तिर्निवसतीत्यन्वयः । तां

शिवः किम्भूतः ? गिरिजया पार्वत्याऽभिन्नो देहो यस्य, हरगौरीमूर्त्तिरित्यर्थः । पुनः कीदृशः ? हिमस्यमेव शोभा यस्य । त्रिनेत्रः । मनोज्ञा दश भुजा यस्य स तथा । व्याघ्रचर्माम्बरैर्युक्तः । यद्वा व्याघ्रचर्मणा साम्बरेण च युक्तः, हरगौर्यात्मिकत्वात् । सदाशिव इति समाख्यानसिद्धः नित्यस्वरूपप्रसिद्धः । योगिनां मनसि प्रकाशः ॥ २६ ॥

सुधासिन्धोरिति । तत्र कमले पीतवस्त्रा शाकिनी निवसति । कीदृशी ? सुधा-

सदाशिवस्थानमिदं विशुद्धं शाकिन्यथेहापि च धूम्रवर्णा ॥ इति ॥ २६ ॥

सुधासिन्धोः शुद्धा शुक्ला । तथा च तन्त्रान्तरे —

**सुधांशोः सम्पूर्णं शशपरिरहितं मण्डलं कर्णिकायां**
**महामोक्षद्वारं  श्रियमभिमतशीलस्य  शुद्धेन्द्रियस्य ॥ ३० ॥**

विशेषयति—**सुधासिन्धोः शुद्धेति**। सुधासमुद्रसदृश-शुक्लवर्णा। तथाच यथा सुधासिन्धोरमृतमयसुशीतलशक्लत्वं तथा ज्योतिःस्वरूपायाः शाकिन्या उत्तापरहित-शक्लकिरण इति भावः। ध्यानान्तरे शाकिनीं विशेषयति—

देवीं ज्योतिःस्वरूपां त्रिनयनलसितां पञ्चवक्त्राभिरामां
हस्तैः पद्मैश्च पाशं सृणिमपि दधतीं पुस्तकं ज्ञानमुद्राम्।
ध्यायेत् कण्ठस्थपद्मे निखिलपशुजनोन्मादिनीमस्थिसंस्थां
दुग्धान्ने प्रीतियुक्तां मधुमदमुदितां शाकिनीं साधकेन्द्रः॥

इति। "ज्योतिःस्वरूपां" ज्योतिषां स्वभावतः शुक्लवर्णत्वेनेयं शुक्लवर्णा। अत्र ध्यानद्वये द्विविधास्त्रदर्शनादिच्छया विकल्पः। इयं देवी कर्णिकान्तश्चन्द्रमण्डले वर्त्तते। तदाह **प्रेमयोगतरङ्गिण्याम्**—

तत्रास्ते शाकिनी शक्तिः सुधांशोर्मण्डले शुभे॥

इति। एतत्कर्णिकायां **सुधांशोश्चन्द्रस्य** शशपरिरहितं निष्कलङ्कं **सम्पूर्णं** मण्डलमपि विलसतीति पूर्वक्रियायामन्वयः। मण्डलं विशेषणेन प्रशंसति—महामोक्षेत्यादि। एतन्मण्डलं शुद्धेन्द्रियस्य जितेन्द्रियस्य महामोक्षद्वारं निर्वाणमुक्तिमाहुः। एतच्चिन्तनादियोगमार्गमवलम्ब्य मुक्तिमाप्नोतीति भावः। **श्रियमभिमतशीलस्येति**। श्रियं योगलक्ष्मीमभिमन्यते आकाङ्क्षतीति श्रियमभिमतम्, तादृशं शीलं स्वभावो यस्य, तद्रूपस्य शुद्धेन्द्रियस्येति विशिष्टार्थः। अत्र कर्णिकायां चन्द्रमण्डलादिस्थितिप्रकारस्तु—आदौ कर्णिकान्तर्नभोमण्डलं, तन्मध्ये त्रिकोणं, तदन्तश्चन्द्रमण्डलं, तन्मध्ये नभोबीजादिकमिति। तद्यथा—

सिन्धोश्चन्द्राच् शुद्धसम्बन्धीययाऽमृतधारया शुद्धा इति यावत्। चतुर्भिर्हस्तपद्मैः शरं चापं पाशं सृणिमपि दधती। तस्य पद्मस्य कर्णिकायां सुधांशोश्चन्द्रस्य शशपरि-

देवीं ज्योतिःस्वरूपां त्रिनयनविलसत्पञ्चवक्त्रां सुदंष्ट्रीं
हस्ताम्भोजेषु चापं शूलमपि दधतीं पुस्तकं ज्ञानमुद्राम्॥ इति॥

पुस्तकं ज्ञानमुद्रामिति शरं पाशमिति तन्त्रान्तरे उक्तम्। सुधांशोश्चन्द्रस्य मण्डलम्। तथाच **स्वच्छन्दसंग्रहे**—

विशुद्धचक्र-चिन्तन-फलम्

**इह स्थाने चित्तं निरवधि विनिधायाऽऽत्मसम्पूर्णयोगः**
**कविर्वाग्मी ज्ञानी स भवति नितरां साधकः शान्तचेताः ।**

कर्णिकायां त्रिकोणस्थं पूर्णचन्द्रं तु चिन्तयेत् ।
हैमाभं गजमारूढमाकाशं तत्र चिन्तयेत् ॥
शुक्लाम्बरेण संवीतं तत्र देवः सदाशिवः ॥

इति । 'शुक्लाम्बरेण संवीत'माकाशमिति ॥ ३० ॥

विशुद्धचक्रचिन्तनफलमाह—इह स्थान इति । **आत्मसम्पूर्णयोग** इति । आत्मनि ब्रह्मणि **सम्पूर्णः** सर्वव्यापकत्वेन परिपूर्णो योगो ज्ञानं यस्य तादृशः । आत्तसम्पूर्णयोग इति पाठे—आत्तः प्राप्तः सम्पूर्णयोगो येनेत्यर्थः । अत एवोक्तं **श्रीमदाचार्येण**—"पूर्णबोधात्मना तिष्ठेत् पूर्णाचलसमुद्रवदि"ति । ततश्च यः **साधक इह स्थाने निरवधि चित्तं विनिधायऽऽत्मसम्पूर्णयोगो भवति, स ज्ञानी** उपदेशं विना सर्वशास्त्रार्थवेत्ता शान्तचेताः शान्तिगुणावलम्बिचित्तः—

दयाभूतेष्वलोलुप्त्वं मार्दवं ह्रीरचापलम् ।
तेजः क्षमा धृतिः शौचमद्रोहो नातिमानिता ॥

इत्यादि-गुणोपहितचित्त इति यावत् । **त्रिकालानां दर्शीति** । अत्र केचित् ज्ञानलक्षणात्मकालौकिकसन्निकर्षरूप-योगधर्मेण सर्वं पश्यन्तीति । अन्ये तु

रहितं सम्पूर्णमण्डलमास्ते । कीदृशम् ? महामोक्षद्वारं निर्माणमुक्तिद्वारम् । पुनः कीदृशम् ? उल्बणबुद्धिशीलस्य जितेन्द्रियस्य श्रियं दधदित्यर्थः ॥ ३० ॥

इह स्थान इति । इह विशुद्धे पद्मे चित्तं यो निदध्यात् तस्य सम्पूर्णयोगविषये ज्ञानं भवतीत्यर्थः । अथवा तत् सर्वमेव सम्पूर्णयोगत्वेनोपदिष्टम् । तदेवाह क्रमेण—

अमृताद्यास्तथाकाशं चन्द्रबिन्दु तदूर्ध्वतः ।
कण्ठोर्ध्वे परमेशानि लम्बिका चतुरङ्गुले ॥ इति ॥

मतिशीलस्य ज्ञानशीलयुक्तस्य शुद्धेन्द्रियस्य जनस्य महामोक्षद्वारसम्पत्तिं दधत् मण्डलमित्यर्थः ॥ ३० ॥

स जीवो विपदामन्धकारस्वरूपाणां ध्वंससूर्यप्रकाशः । अत्र वैखरी शक्तिरस्ति । तथा च भट्टधृततन्त्रे—

सूक्ष्मा कुण्डलिनी मध्ये ज्योतिर्मात्रा परा मता ।
अश्रोत्रविषयात् तस्मात् किञ्चिदेवोर्ध्वगामिनी ॥

**त्रिकालानां दर्शी सकलहितकारो रोगशोकप्रमुक्त-**
**श्चिरञ्जीवी जीवी निरवधिविपदां ध्वंसहंसप्रकाशः ॥ ३१ ॥**

तादृशजनस्यात्मप्रत्यक्षे तत्र भासमानसर्वप्रमेयवस्तूनां प्रत्यक्षो भवतीति वदन्ति । **रोगशोकप्रमुक्तः** सिद्धमन्त्रत्वाद् रोगमुक्तश्चिरञ्जीवी छिन्नमाया-पाशत्वाच्छोकरहित इत्यर्थः । स जीवी जनो नितरामतिशयकविर्भवति । एवं सर्वत्र भवति-क्रियान्वयः । **निरवधिविपदां ध्वंसेति** । अवधिः सीमा तद्रहितविपन् निरवधिविपत् । आदिना पापपुण्यरूपकर्मबन्धे नानाविपत्ति-रिति यावत् । तेषां ध्वंसाय विपत्तिप्रागभावासमानकालीनविपत्तिनाशाय फलतो मोक्षाय । हंसस्य सहस्रदलकमलकर्णिकान्तर्गतहंसरूपान्तरात्मनः प्रकाशो यस्य तादृशो भवतीति । स्पष्टमन्यत् ।

**तदयं महावाक्यार्थनिर्णयः**— कण्ठमूले विशुद्धचक्रं षोडशदलं धूमधूम्ररूप-मारक्तकेसरं रक्तवर्ण-सबिन्दुक-षोडशस्वरयुक्तम् । कर्णिकायां नभोमण्डलं वृत्तरूपं शुक्लवर्णम् । तन्मध्ये त्रिकोणम् तत्र चन्द्रमण्डलम् । तदुपरि हँ इति नभोबीजं शुक्लवर्णं शुक्लाम्बरपरीधानं शुक्लगजारूढं पाशाङ्कुश-वराभय-धरम् । तत्क्रोडे वृषभोपरि स्थितमहासिंहासने सदाशिवोऽर्द्धनारीश्वर-त्वादर्द्धाङ्गसुवर्णाभार्द्धाङ्गशुक्लाभः पञ्चवक्त्रस्त्रिनेत्रः (दशभुजः) शूल-टङ्क-खड्ग-वज्र-दहन-नागेन्द्र-घण्टाङ्कुश-पशाभययुक्त-दशहस्तो व्याघ्रचर्माम्बरो भस्मलिप्तसर्वाङ्गो नागहारशोभितः सुधास्राव्यधोमुखार्द्धचन्द्रशेखरः । एतत्कर्णिकायां चन्द्रमण्डलमध्ये अस्थ्युपरि स्थिता शाकिनीशक्तिः शुक्लवर्णा चतुर्भुजा पाशाङ्कुशधनुःशरकरा पीताम्बरा पञ्चवक्त्रा त्रिनेत्रेति पञ्च-प्रकरणम् ॥ ३१ ॥

**कविर्वाग्मीत्यादि । स जनो निरवधि नित्यमेव विपत्प्राप्तानां त्राणे सूर्य इव तेजस्वी भवति ॥ ३१ ॥**

स्वयंप्रकाशा पश्यन्ती सुषुम्णानाभिमाश्रिता ।
सैव हृत्पङ्कजं प्राप्य मध्यमा नादरूपिणी ॥
ततः संजल्पमात्रा स्यादविभक्तोर्ध्वगामिनी ।
सैवोरुकण्ठतालुस्था शिरोघ्राणरदाश्रिता ॥
जिह्वामूलोष्ठनिस्यूता कृतवर्णपरिग्रहा ।
शब्दप्रपञ्चजननी श्रोत्रग्राह्या तु वैखरी ॥ इति ॥३१॥

भ्रूमध्यस्थिताऽऽज्ञाचक्र-स्वरूपम्

**आज्ञानामाऽम्बुजं तद्धिमकरसदृशं ध्यानधामप्रकाशं**
**हक्षाभ्यां वै कलाभ्यां परिलसितवपुर्नेत्रपत्रं सुशुभ्रम् ।**

इदानीं भ्रूमध्यस्थिताज्ञाचक्रं निरूपयति--**आज्ञानामाऽम्बुजमित्यादि-**सप्तभिः । आज्ञासंक्रमणं तत्र गुरोराज्ञेति कीर्त्तितमि"ति गुरोराज्ञासंक्रमणादाज्ञानाम । ततश्च तन्नामकं **तत् प्रसिद्धमम्बुजमास्ते** इति क्रियाध्याहारेणाऽन्वयः । एतत् पद्मं भ्रूमध्ये स्थितम् । यद्यथा—

तालुकण्ठं प्रविश्योर्ध्वं भ्रूयुगान्ते सितं शुभम् ।
द्विदलं ह्-क्ष-वर्णाभ्यां मनोऽधिष्ठितमम्बुजम् ॥

इति । पद्मं विशेषयति–**हिमकरसदृ**शमिति । चन्द्रवच्छुक्लवर्णमित्यर्थः । तथा **ध्यानधामप्रकाशं** ध्यानस्य धाम्ना तेजसा तेजोरूपशक्त्या प्रकाशो यस्येत्यर्थः । अत्र ध्यानशक्त्या धामवत् प्रकाशितावयवमित्यर्थः । वर्णानां कलाबीजत्वात् तत्र कलापदप्रयोगः । **नेत्रपत्रं** द्विदलम् । **सुशुभ्रमिति** । हक्षाभ्यां सुशुभ्रमित्यर्थः । तथाच स्वभावशुभ्र-ह्-क्ष-वर्णयोगेनाऽतिशुभ्रमिति भावः । एतेन ह्-क्ष-वर्णयोरपि शुक्लत्वं सूचितं, शुक्लयोगेनैव शुक्लस्यातिशयत्वसम्भवात् । यद्वा--आज्ञाचक्रं हिमकरसदृशं चन्द्रस्यामृतमयशीतकिरणवच्छीतकिरणं तथा सुशुभ्रञ्च हक्षाभ्यां कर्बूरवर्णाभ्यामिति बोद्धव्यम् । तदाह **ईश्वरकार्तिकेयसम्वादे--**

आज्ञाचक्रं तदूर्ध्वे तु शुक्लं द्विदलमण्डितम् ।
कर्बूर-ह्क्ष-लसितं मनोऽधिष्ठतरञ्जितम् ॥ इति ॥

एतत्कर्णिकायां हाकिनीशक्तिस्थितिमाह—**तन्मध्य** इति । **सा** हाकिनी-

आज्ञेति । तत् प्रसिद्धं भ्रूमध्ये आज्ञानाम पद्ममास्ते । कीदृशम् ? हिमकरसदृशम् । अतः प्रशस्तशुभ्रम । ध्यानधामनि प्रकाशो यस्य तत् । हकार-क्षकारोपलक्षित-दलाभ्यां परिलसितं वपुर्यस्य । कलाभ्यामिति केचित् पठन्ति । तन्मते हकारक्षकाररूपकलाभ्यां

आज्ञाचक्रमाह—आज्ञा नामेत्यादिना । गौतमीये--"आज्ञासंक्रमणं तत्र गुरोराज्ञेति कीर्त्तितम् ।" इति । चन्द्रतुल्यक्लेदजनकं ध्यानस्थानं प्रकाशस्वरूपम् । हक्षाभ्यां विशुद्धाभ्यां कलाभ्यामक्षराभ्यां युक्तं द्विपत्रमतीवशुभ्रम् । **मायातन्त्रेऽपि--** "आज्ञाख्यं द्विदलं शुभ्रम्"—इति । **दक्षिणामूर्त्तावपि—**

**तन्मध्ये हाकिनी सा शशिसमधवला वक्त्रषट्कं दधाना**
**विद्यां मुद्रां कपालं डमरु जपवटीं बिभ्रती शुद्धचित्ता ॥ ३२ ॥**

नाम्नी प्रसिद्धा । **विद्यां** पुस्तकमुद्राम् । मुद्रां वराभयरूपां, तेनास्या भुजेषु षड्विधायुदर्शनात् षड्भुजेयम् ।

केचित् तु विद्यामुद्रामित्येकविभक्तयन्तं पठित्वा विद्यायै मुद्रां विद्यामुद्रां व्याख्यामुद्रामिति व्याख्ययाऽस्याश्चतुर्भुजत्वं वदन्ति । किन्तु नानापुस्तके पृथग्विभक्त्यन्तपाठो दृश्यत इति सुधीभिर्विवेच्यम् । ध्यानान्तरेण हाकिनीं विशेषयति –

मज्जास्थां शुक्लवर्णां डमरुकरयुतामक्षसूत्रं कपालं
विद्यां मुद्रां दधानां त्रिनयनविलसद्वक्तषड्वक्त्रयुक्ताम् ।
हारिद्रान्ने प्रसक्तां मधुमदमुदितां शुक्लमब्जं सुरूढां
देवीं देवेन्द्ररत्नाकरमधुमुदितां भावयेद्धाकिनीं ताम् ॥ इति ॥

स्पष्टमन्यत् ॥ ३२ ॥

**स्वरविशिष्टाभ्यामिति । पुनः कीदृशम् ? नेत्रपत्रं द्विपत्रमित्यर्थः । एतत्पद्मे सा प्रसिद्धा हाकिनी निवसति । कीदृशी ? शशिसमधवलवर्णा षण्मुखी च । हस्तैः करणैरेतान् बिभ्रती विद्या-(ज्ञान)-मुद्रा-कपाल-डमरु-जपवटीरिति । शुद्धं चित्तं यस्याः सा तथा ॥ ३२ ॥**

आज्ञायां विद्युदाभायां शुभ्रौ हक्षौ विचिन्तयेत् ।

हाकिनीति । तन्त्रान्तरेऽपि –

आज्ञापुर शारदचन्द्रशुभ्रं हाकिन्यथोक्ता शिवगेहमेतत् ।

विद्या पुस्तकम् । मुद्रा ज्ञानमुद्रा अङ्गुष्ठतर्जनीमिलिता । तन्त्रे––

आज्ञास्थां शुक्लवर्णां डमरुकसहितामक्षसूत्रं कपालं
विद्यां मुद्रां दधानां त्रिनयनविलसदुक्तषट्कोणयुक्ताम् (?) । इति ।

सूक्ष्मञ्च तत्प्रकाशस्वरूपं चेति तत् तथा । मायातन्त्रेऽपि––

आज्ञाख्य द्विदलं शुभ्रं कर्णिकाग्रं मनोलयम् । इति ।

सिद्ध नित्यम् । सिद्धशब्दा नित्यार्थ इति वैयाकरणाः ॥ ३२ ॥

आज्ञाचक्रस्थ-मनःस्थितिस्वरूपम्

**एतत्पद्मान्तराले निवसति च मनः सूक्ष्मरूपं प्रसिद्धं**
**योनौ तत्कर्णिकायामितरशिवपदं लिङ्गचिह्नप्रकाशम् ।**

एतत्पद्मे मनः स्थितिमाह–**एतत्पद्मान्तराल** इति । **सूक्ष्मरूपम**तीन्द्रियमित्यर्थः । ननु मनसोऽतीन्द्रियत्वात् तत्सत्तायां किं प्रमाणमित्याह— **प्रसिद्धमिति** । अनादिपुरुषपरम्पराप्राप्त-प्रत्यक्षकरणत्वेन प्रसिद्धम् तथा—

सङ्कल्पञ्च विकल्पञ्च कुर्वाणा तु मनो भवेत् ।

इत्यादि-शास्त्रप्रमाणसिद्धञ्च । अत्र मानसस्थानं वक्ष्यमाणवेदादिबीजस्योर्ध्वदेशे, वक्ष्यमाणवचनात् । अतः परं शिवलिङ्गस्थितिमाह—**योनौ** तत्कर्णिकायामिति । कर्णिकान्तस्त्रिकोणे **इतरशिवपदम्** इतरनामकशिवरूपं वस्तु निवसतीति पूर्वक्रियान्वयः । **लिङ्गचिह्नप्रकाशं** लिङ्गरूपेण भासमानमित्यर्थः । इदं लिङ्गं शुक्लवर्णम् । तदाह **भूतशुद्धौ**—

तदन्तःश्वेतरं लिङ्गं स्फटिकाभं त्रिलोचनम् ।। इति ।।

लिङ्गं विशेषयति **विद्युन्मालाविलासमिति** । अत्र प्रणवस्थितिमाह— **परमेत्यादि** । कर्णिकायां वेदादिबीजं प्रणवोऽपि वसतीत्यन्वयः । बीजं विशेषयति—**परमकुलपदमिति** । कुलं शक्तिस्तदत्र त्रिकोणाकारपदं स्थानं परमं विद्युदाकारादिनोत्कृष्टं कुलं पदं यस्य तादृशमित्यर्थः । तथाच तद्बीजं त्रिकोणमध्यवर्त्तीति पर्यवस्यति ।

व्यक्तमाह—कर्णिकायां त्रिकोणस्थमात्मानं प्रणवाकृतिम् ।
ज्वलद्दीपनिभञ्चोर्ध्वं नादरूपं मनोहरम् ।
बिन्दुर्मकाररूपञ्च तदूर्ध्वं मानसालयः ।। इति ।।

**एतदिति । एतत्पद्मे सूक्ष्मरूपेण प्रसिद्धं मनो निवसति । तस्य पद्मस्य कर्णिकायां या योनिस्तस्यामितराख्यः शिव आस्ते, तस्य स्थानमित्यर्थः । कीदृशम् ? लिङ्गचिह्नेन**

इतरशिवपदम्—इं कालं तरति इतीतरं शिवस्य परिशिवस्य पदं, इतरञ्च तत् शिवपदञ्चेति तत् । लिङ्गचिह्नेन लिङ्गाकारेण प्रकाशो यस्य तत् । विद्युन्मालेव प्रकाशो यस्य तत् । **योगिनीहृदये**—

इतरश्च पुनस्तथा शरच्चन्द्रनिभं सदा । इति ।

**आनन्दलहर्यामपि**—तवाऽऽज्ञाचक्रस्थं तपनशशि-कोटिद्युतिधरं
परं शम्भुं वन्दे परिमिलितपार्श्वं परचिता ।

ताराषोढान्यासाधिकारतन्त्रे—
ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरश्च सदाशिवः ।
ततः परशिवो देवि षट् शिवाः परिकीर्त्तिताः ।।

**विद्युन्माला-विलासं परम-कुल-पदं ब्रह्मसूत्र-प्रबोधं**
**वेदानामादिबीजं स्थिरतरहृदयश्चिन्तयेत् तत् क्रमेण ॥ ३३ ॥**

नन्वत्र परमकुलपदस्य प्रणवाधारत्वेनाऽपृथक्त्वे—

मूलाधारं स्वाधिष्ठानं मणिपूरमनाहतम् ।
विशुद्धमाज्ञाचक्रञ्च बिन्दुर्भूयः कलापदम् ।
निबोधिका तथार्द्धेन्दुर्नादो नादान्त एव च ।
उन्मनी विष्णुवक्त्रञ्च ध्रुवमण्डलिकः शिवः ।
इत्येतत् षोडशाधारं कथितं योगिदुर्लभम् ॥

इति वचने षोडशाधार-गणनायां कलापदस्य पृथगभिधानं कथं सङ्गच्छत इति चेत् । न । तत्कलापदं नाऽऽज्ञाचक्रस्थं किन्तु वक्ष्यमाणमहानादोर्ध्वे शून्यदेशे स्थितमित्येतन्महानादप्रस्तावे स्फुटीकरिष्यामः ।

**ब्रह्मसूत्रप्रबोधमिति** । ब्रह्मसूत्रं चित्रिणी नाडी तस्याः प्रबोधः प्रकाशो येनेत्यर्थः । अत एव पूर्वमुक्तं "प्रणवविलसिता" इति । तदिति । प्रदर्शित-हाकिनी-मन-इतरलिङ्ग-वेदादिबीजरूपं तत् सर्वं स्थिरतरहृदयः सन् क्रमेण चिन्तयेदित्यर्थः ।

क्रमोऽत्र न ग्रन्थकारोक्तपाठक्रमः किन्तु पाठक्रमाच्छाब्दक्रमस्य बलवत्त्वात् प्रदर्शितशब्दक्रमो गृह्यते । एवञ्च पद्मकर्णिकायां हाकिनी शक्ति-

**प्रकाशो यस्य पुनः कीदृशम् ? विद्युन्माला इव प्रकाशो यस्य तत्तथा परमञ्च तत् कुलञ्चेति परमकुलं मूलाधारपद्मं तदेव पदं स्थानान्तरं यस्य । ब्रह्मसूत्रस्य प्रबोधो**

इति मूलाधारादि-विशुद्धपद्मेषु पञ्चशिवन्यासमभिधाय—

आज्ञाचक्रे च देवेशि हक्षवर्णसमन्वितम् ।
परं शिवं ब्रह्मरूपं हाकिनीसहितं न्यसेत् ॥

इत्युक्तम् । स च सहस्रारनिर्गणपरशिवस्यांशस्वरूपो अपरः शिवो ज्ञेयः । अत एव ब्रह्मशिवत्वाद् ब्रह्मस्वरूपमित्युक्तम् । न तु ब्रह्म इत्युक्तम् । **परमकुलपदम्** एतत् पर्यन्तं परमकुलपदमित्युपसंहारेणोक्तम् । तथाच **श्रीमते** —

तत्रैतद् दक्षिणं षट्कमाज्ञापूर्वं कुलोद्भवम् ॥ इति ॥

**आनन्दलहर्यामपि**—महीं मूलाधारे कमपि मणिपूरे हुतवहं
स्थितं स्वाधिष्ठाने हृदि मरुतमाकाशमुपरि ।
मनोऽपि भ्रूमध्ये सकलमपि भित्त्वा कुलपथं
सहस्रारे पद्मे सह रहसि पत्या विहरसि ॥ इति ॥

अत्र कं जलं स्वाधिष्ठाने मणिपूरे हुतवहमिति व्यत्ययेनाऽन्वयः । ब्रह्मसूत्रेति

आज्ञाचक्र-ध्यानफलम्

**ध्यानात्मा साधकेन्द्रो भवति परपुरे शीघ्रगामी मुनीन्द्रः**
**सर्वज्ञः सर्वदर्शी सकलहितकरः सर्वशास्त्रार्थवेत्ता ।**
**अद्वैताचारवादी विलसित परमापूर्वसिद्धि-प्रसिद्धो**
**दीर्घायुः सोऽपि कर्त्ता त्रिभुवनभवने संहृतौ पालने च ॥ ३४ ॥**

स्तदूर्ध्वे त्रिकोणे इतरलिङ्गं, तदूर्ध्वे त्रिकोणे प्रणवस्तदूर्ध्वे मन इत्येवं क्रमेण चिन्तयेदिति ॥ ३३ ॥

एतद्ध्यानस्य फलमाह—**ध्यानात्मेति ।** उक्तरूपेण ध्यानपरायणः **साधकेन्द्रः परपुरे शीघ्रगामी** भवतीति सर्वत्र क्रियान्वयः । **मुनीन्द्रः** मुनिर्ध्यानयोगादिसम्पन्नस्तदिन्द्रस्तच्छ्रेष्ठः । **सर्वज्ञः** पूर्वोक्तरूपेण सर्वदर्शी शास्त्रव्यवहाररीत्यनुरूपविवेकबुद्ध्या पूर्वापरदर्शी । **अद्वैताचारवादीति ।** "पादोऽस्य विश्वा भूतानि" । "तदिदं सर्वं ब्रह्मे"त्यादि श्रुतिवाक्येन—

अहं देवो न चान्योऽस्मि ब्रह्मैवास्मि न शोकभाक् ।

इत्यादिवाक्येन च ब्रह्मैवैकं सद् वस्तु तदन्यदसत्, प्रपञ्चसमुदायस्तु ब्रह्मभासया भासते इत्यवधारणमद्वैतम् । तादृशज्ञानेन य आचारो जीवात्मपरमात्मनोरैक्यचिन्तनादिरूपयोगस्तद्वादो तत्कथनशीलः । स जनोऽद्वैताचारवादी भवतीति फलितार्थः । परमापूर्वसिद्धिप्रसिद्ध इति । **परमापूर्वसिद्धि**र्महासिद्धिस्तया **प्रसिद्धः** प्राधान्येन ख्यात इत्यर्थः । **सोऽपि कर्त्ता त्रिभुवनभवने संहृतौ पालने** चेति प्रशंसापरम् । अथवा तादृशसाधकस्य देहान्ते परमात्मनि लयाद् यः सृष्टिस्थितिप्रलयकर्त्ता स एवायं भवतीति तात्पर्यम् ॥ ३४ ॥

यस्मात् । तत् मनोनिवासभूतम् ब्रह्मनाडीवर्त्मस्थितानां सर्वेषामेव तस्मादेव ज्ञानं भवतीत्यर्थः ॥ ३३ ॥

ध्यानात्मेति । एतद्ध्यानपरो जन एवं भवतीत्याह – ध्यानात्मेति । ध्याननिष्ठ इत्यर्थः । स साधकेन्द्रः परपुरे शीघ्रगामी भवति । तत्तद्दिव्यभावविषये परपुरप्रवेशनं पूर्वमेवोक्तं, तत् तु उदासीनानामेव सम्भवतीति नान्येषाम् । अद्वैताचारं वक्तुं शीलमस्येति स तथैव भवति । स साधकः कीदृशः ? प्रकृष्टासु आदिसिद्धिषु समर्थो भवति, अतो दीर्घायुर्भवत्येव । त्रिभुवननिवासिनामुत्पत्तौ संहृतौ पालने वा स कर्त्ता । अतो ब्रह्म-वि णु शिवात्मको भवतीत्यर्थः ॥ ३४ ॥

ब्रह्मसूत्रस्य ब्रह्मनाड्याः प्रबोधो यस्मात् तत् । वेदानामादिबीजं प्रणवः, तदत्र चिन्तयेत् ॥ ३३ ॥

विलसितपरमोऽपूर्वसिद्धप्रसिद्धो यस्य सः ॥ ३४ ॥

आज्ञाचक्रस्थ-प्रणवस्वरूपम्

**तदन्तश्चक्रेऽस्मिन् निवसति सततं शुद्धबुद्धयन्तरात्मा**
**प्रदीपाभ-ज्योतिः प्रणव-विरचना-रूप-वर्ण-प्रकाशः ।**

तदाज्ञाचक्रे प्रणवयोगं विवक्षुरादौ प्रणवं विशेषयति--**तदन्तरिति** अस्यार्थः--**अस्मिन् चक्रे तदन्तस्तस्य** पूर्वोक्तत्रिकोणस्यान्तर्मध्ये यः **प्रणवविरचनारूपवर्णप्रकाशः** प्रणवस्य विरचनारूपेणाऽकारोकारयोः सन्धियोगेन यस्त्रयोदशस्वरसदृशवर्णप्रकाशः सततं निवसति स शुद्धबुद्धयन्तरात्मा इत्यन्वयः । तं विशेषयति--**प्रदीपाभज्योतिरि** । ननु तर्हि किं त्रयोदशस्वरसदृशवर्णमात्रं शुद्धबुद्धयन्तरात्मा इत्यत आह--तदूर्ध्वे **चन्द्रार्द्धस्तदुपरि** विलसद्बिन्दुरूपी मकार इति । तेन तादृशवर्णोपरि अर्द्धचन्द्रबिन्दुयोगेन प्रकृतप्रणवस्वरूपः पर्यवस्यति । **तदूर्ध्वे नादोऽसाविति** प्रणवोर्ध्वेऽव्यान्तरनादोऽस्तीति । स तु **बलधवल-सुधाधारसन्तान-हासी** बलदेवस्य धवलं सुधाधारसन्तानञ्चोपहसितुं शीलं यस्येत्यर्थादतिशयशुक्लवर्णो नादः ।

**तदन्तरिति । तदूर्ध्वमस्मिन चक्रे सततमेव प्रणवविरचना प्रणवं विरचयति येनोकारेण तद्रूपाक्षरप्रकाशो निवसति । कीदृशः ? शुद्धबुद्धीनां अन्तरात्मस्वरूपः ।**

अत्रान्तरात्मा अस्तीत्याह—शुद्धबुद्धेत्यादिना । शुद्धबुद्धः शुद्धस्वभावः स चासौ अन्तरात्मा चेति सः । प्रदीपस्येव आभा दीप्तिर्यस्य ज्योतिषः एवम्भूतो ज्योतिः । प्रणवाभ्यां विरचितौ **स्वरूपवर्णौ** यस्य सः [ वर्णशब्दः ? ] । **श्रीक्रमेऽपि** --

भ्रूमध्ये अन्तरात्मानमरूपं सर्वकारणम् ।
ॐकारज्योतीरूपन्तु प्रदीपाभं जनन्मयम् ।। इति ।।

अत एव प्रकाशः **ज्योतिःस्वरूपः** । तदूर्ध्वे पूर्वोक्तान्तरात्मोर्ध्वे अर्द्धचन्द्रः, चन्द्रार्द्धे बिन्दुरूपी मकारः, तदुपरि नाद इति व्यत्ययेनाऽन्वयः । एवं नादप्राग् बोधिनी, लिखिष्यमाणयोगिनीहृदयात् ज्ञेयाः । असौ नादः अतीवशुक्ल इत्याह--वनेत्यादिना । वनं जलं तद्वद् धवलवर्णः यश्च पीयूषाधारश्चन्द्रः तत्समूहहासी तदधिकशुक्ल इति भावः । **योगिनीहृदयेऽपि--**

इन्दौ तदर्द्धे बोधिन्यां नादे नादान्त एव च ।। इति ।।

**इन्दौ बिन्दौ** । तदर्द्धे अर्द्धचन्द्रे । **स्वच्छन्दसंग्रहेऽपि—**

तत्र बिन्दोर्यथा बिन्द्वावरणे स तदूर्ध्वतः ।
सूर्यकोटिप्रतीकाशमतिदीप्तं महद्गुणम् ।।

तदूर्ध्वे चन्द्रार्द्धस्तदुपरि बिलसद्-बिन्दुरूपी मकार-
स्तदूर्ध्वे नादोऽसौ वलधवल-सुधाधारसन्तान-हासी ॥ ३५ ॥

केचित् तु तदाद्ये नादोऽसाविति पठन्ति, तदाद्ये बिन्दुरूपि-मकारस्याद्ये इति व्याख्यायन्ति च। तदसत्। "तदुपरि विलसद्-विन्दुरूपी मकार" इत्यनेन मकाराद्ये नादप्राप्तौ पुनस्तदुपादानं व्यर्थं स्यात्। परन्त्वसौ नादः प्रणवघटकीभूतनादातिरिक्तो भिद्यमानपरबिन्दोरवयवविशेषः प्रणवोर्ध्वे वर्त्तते। यदि तु विशिष्टप्रणवनिरूपणे तदङ्गप्रत्यङ्गमेव वक्तुमुचितं कथं तदतिरिक्तनादोऽप्रस्तुतः प्रस्तूयते इति चेत्? तर्हि तदाद्ये नादोऽसाविति

**यद्वा शुद्धैजनैरवगतोऽन्तरात्मा अस्य। तथा प्रदीपस्याभा इव ज्योतिर्यस्य तस्य। ओकार-स्योपरि चन्द्रार्द्धः, तदुपरि प्रकाशमानबिन्दुरूपो मकारः। एतेन आज्ञाख्यपद्मस्योपरि**

तन्मध्ये शतकोटीनां संख्या योजनपङ्कज[श्चक]म्।
तत्कर्णिकायामासीनः शान्त्यतीतेश्वरः प्रभुः॥
पञ्चवक्त्रो दशभुजो विद्युत्पुञ्जनिभाकृतिः।
निवृत्तिश्च प्रतिष्ठा च विद्या शान्तिरनुक्रमात्॥
परिवार्य स्थिताश्चैताः शान्त्यतीतेश्वरस्य च।
वामभागे समासीना शान्त्यतीता मनोन्मनी॥
पञ्चवक्त्रधराः सर्वा दशवाह्विन्दुभूषणाः।
बिन्दुतत्त्वं समाख्यातं कोटचर्बुदशतैर्वृतम्॥
अर्द्धचन्द्रस्तदूर्ध्वे तु रो[बो]धिनी तस्य चोपरि।
ज्योत्स्ना ज्योत्स्नावती कान्तिः सुप्रभा विमलापि च॥
अर्द्धचन्द्रस्थिता ह्येताः कलाः पञ्च प्रकीर्त्तिताः।
रु[ब]न्धिनी रो[ब]धिनी बोधा [रोधा]ज्ञानबो[र]धा तमोपहा॥
निबो[रो]धिका कलाः पञ्च कथिताः सुरसुन्दरि।
ब्रह्मादिपरमेशानां परप्रा[मा]प्तिनिबो[रो]धनात्॥
नि[रो]बोधिकेति सा प्रोक्ता तस्या भेदा वरानने।
बो[रो]धिन्याख्यं यदुक्तं ते नादस्तस्योपरि स्थितः॥
पद्मकिञ्जल्कसङ्काशः कोटिसूर्यसमप्रभः।
पुरैः परिवृतोऽसंख्यैर्मध्ये पञ्चकलावृतः॥
इन्धिका दीपिका चैव रेचिता मोचिका तथा।
ऊर्ध्वगा मध्यगा तासां पञ्चमी परमा कला॥

आज्ञाचक्रे प्रणवयोग-निरूपणम्

**इह स्थाने लीने सुसुखसदने चेतसि पुरं**
**निरालम्बां बद्ध्वा परमगुरुसेवासुविदिताम् ।**

पाठोऽभिमन्यते । किन्तु तस्यायमर्थः—तदाद्ये बिन्दुरूपिमकाराद्ये प्रदर्शितोऽसौ नादो बलधवल-सुधाधारसन्तान-हासीति पूर्वोक्तनादमनूद्य बलधवलेत्यादिविशेषणं विधीयते । न तु विशिष्टस्य विधानम् । अतो न पुनरुक्तिदोषः ॥ ३५ ॥

प्रणवं निरूप्येदानीं तद्योगं निरूपयति—इह **स्थान** इति । अस्यार्थः—**योगी** जनः **पुरं** बद्ध्वा कुतुकेनाऽन्तःपुरं संरुध्य तत्प्रकारेणाऽन्तःपुररोधकारणीभूतयोनिमुद्रां बद्ध्वेति यावत् । तेन पुःशब्देन योनिमुद्रा लक्ष्यते । तन्मुद्रां बद्ध्वा इह स्थाने आज्ञाचक्रे **तदभ्यासात्** तस्य प्रणवस्य पुनः पुनश्चिन्तनात् तत्र **चेतसि** प्रणवचतुर्दिक्षु लीने सति ततस्तदनन्तरं तन्मध्यान्तः प्रणवाधारत्रिकोणमध्ये अन्तरन्तरिक्षे **पवनसुहृदां** वह्नीनां कणान् वह्निकणवज्ज्योतिःस्फुलिङ्गान् पश्यति, तेषां मानसप्रत्यक्षो भवतीत्यर्थः । अत्र पुरबन्धनं विना मनसः शुद्धस्थैर्यं न सम्भवतीत्यतः पुरं बद्ध्वेत्युक्तम् । पुरबन्धनकारणयोनिमुद्रालक्षणमाह—

ततो गुह्ये वामपादपार्ष्णिन्तु विनिवेशयेत् ।
तस्योपरि महादेवि दक्षपार्ष्णिं निवेशयेत् ॥

**प्रणवप्रकारसिद्धिः, तस्योपरि असौ नादो वक्राकृतिः । कीदृशः ? जलस्य जलकणस्य धवलामृतश्रेणिरिव हासो दीप्तिस्येति स तथा ॥ ३५ ॥**

**इह स्थान इति । अत्यर्थं सुखसदने इह स्थाने चेतिसि लीने सति परमगुरुसेवा-**

चन्द्रकोटिसमप्रख्यं तन्मध्येऽर्बुदयोजनम् ।
पद्ममध्ये समासीनमूर्ध्वगामिनमीश्वरम् ।
चन्द्रायुतप्रतीकाशं पञ्चवक्त्रं त्रिलोचनम् ॥
इन्धिका[ऐन्दवा]चैरावृतं च शूलपाणिं जटाधरम् ।
तस्योत्सङ्गगतामूर्ध्वगामिनीं परमां कलाम् ॥

ध्यायेदिति शेषः ॥ ३५ ॥

निरालम्बामिति तद्वक्ष्यमाणाम् । **टीकाकारधृततन्त्रे**—

त्यजेत् शैथिल्यमङ्गानां नासाग्रे रोपयेद् दृशौ ।
मुखं विवृणुयात् किञ्चिद् दन्तैर्दन्तान् न संस्पृशेत् ॥

**तदभ्यासाद् योगी पवनसुहृदां पश्यति कणान्**
**ततस्तन्मध्यान्तः प्रविलसितरूपानपि सदा ॥ ३६ ॥**

ऋजुकायशिरोग्रीवः काकचञ्चुपुटेन च ।
आकारेण वह्निर्वायुं जठरं परिपूरयेत् ॥
अङ्गुलीभिर्दृढं बद्ध्वा करणानि समाहितः ।
अङ्गुष्ठाभ्यामुभे श्रोत्रे तर्जनीभ्यां विलोचने ॥
नासारन्ध्रे च मध्याभ्यामन्याभिर्वदनं दृढम् ।
बद्ध्वा मे प्राणमनसामेकत्वं तन्मनुं स्मरन् ॥
धारयेन्मारुतं सम्यग् योगोऽयं योगिवल्लभः ।

इति । एवं मुद्रया वायुरोधे मनसः स्थैर्यमाह श्रुतिः । एवं हंसवशान्मनो विचर्यते । इतस्ततो विषयेषु भ्रमति तत्संयमेन मनःसंयमो जायत इत्यर्थः । अथवा पुरं खेचरीमुद्रां बद्ध्वेत्यर्थः । तयापि मनःस्थैर्यं भवति । तदाह--

चित्तं चरति खे यस्माज् जिह्वा चरति खे यतः ।
तेनेयं खेचरी मुद्रा सर्वसिद्धनमस्कृता ॥ इति ॥

अत्र चित्तस्य खेचरत्वान्मनःसंयोगाभावेन विषयज्ञानरहितत्वादुन्मनी भवति । अत एवोक्तम्--

उन्मन्या सहितो योगी न योगी उन्मनीं विना ॥

इति । प्रणवस्य ज्योतिःस्फुलिङ्गवेष्टितत्वं स्पष्टमाहान्यत्र--

तदूर्ध्वे प्रणवाकारमात्मानं दीपसन्निभम् ।
स्फुलिङ्गज्योतिरिङ्गाभैर्वेष्टितं परितः शुभम् ॥

इति । स्थाने कीदृशे ? **सुसुखसदने** निरवच्छिन्नसुखस्य सदनं यत्र तादृशे । पुरं किम्भूताम् ? **निरालम्बां** निर्गतोऽवलम्बो मनसो विषयसम्बन्धो यया तादृशीमित्यर्थः । तथा **परमगुरुसेवासुविदितामिति । परमो** गुरु-परम्परा-प्राप्त-योगाभ्यास-निपुणस्तादृशो गुरुस्तस्य सेवाभिर्जातकृपयोपदेशेन सुविदितामिति फलितार्थः । अत एवोक्तम्--

**सुविदितां निरालम्बां मुद्रां बद्ध्वा सर्वदाभ्यासाद् योगी सन् पवनसुहृदां जीवबुद्धीनां कलां पश्यति । अस्य स्थानस्य चेतोलीनत्वम् । आश्चर्यं महः यदि भवति तदैव**

रसनामन्तरा कुर्यादङ्गे धारयेन्मनः ।
इयं सा परमा मुद्रा निरालम्बेति पञ्चमी ॥ इति ॥

इदं स्थाने एवं मुद्रा बद्ध्वा सदाभ्यासाद् धृतपवनात् पवनसुहृदां वह्नीनां कलाः पश्यति । तदनन्तरं तन्मध्यन्तःप्रविलसितरूपान् ज्वलद्दीपाकारान् पश्यति । पश्चात्

आज्ञाचक्रे परमशिवस्थिति-वर्णनम्

**ज्वलद्-दीपाकारं तदनु च नवीनार्कबहुल-**
**प्रकाशं ज्योतिर्वा गगनधरणीमध्यमिलितम् ।**

गुरुपदेशात् तद् गम्यं नान्यथा शास्त्रकोटिभिः ॥
इति । कणान् किम्भूतान् ? **प्रविलसितरूपान्** प्रकृष्टरूपेण भासमानानिति ॥ ३६ ॥

तादृशयोगिनां वह्निकणावान्तरप्रकारदर्शनमपि भवतीत्याह—**ज्वलद्दीपाकारमिति** । तदनु वह्निकणदर्शनमनु दर्शनानन्तरं ज्योतिः पश्यतीत्यर्थः । ज्योतिर्विशेषयति—ज्वलद्दीपेत्यादि । **गगनधरणीमध्यमिलितमिति** । गगनं "तदूर्ध्वे शङ्खिन्या निवसति शिखरे शून्यदेशे प्रकाशमि"त्यनेन प्रदर्शितशङ्खिनीनाड्यूर्ध्व-शून्यरूप-गगनं धरणी मूलाधारस्थधरामण्डलं तदुभयोर्मध्यमिलितं, मूलाधारादिसहस्रारपर्यन्तव्याप्तं ज्योतिरिति विशिष्टार्थः । **वेति** वाशब्दः समुच्चयार्थः ।

आज्ञाचक्रे सहस्रारवत् परमशिवस्थितिमाह—इह स्थान इति । भगवान् परमशिवः इह **स्थाने साक्षाद भवति** स्वयं वर्त्तत इत्यर्थः । भगवन्तं विशेषयति—**पूर्णविभव** इत्यादि । पूर्णः स्वात्मनि परिपूर्णः **सृष्टिकर्त्तृत्वाद्यशेषयोग्यतारूप-विभवो** यस्येत्यर्थः ।

अथवा—विभवोऽनन्तसृष्टिप्रपञ्चसमुदायः, पूर्णः सर्वव्यापकत्वेन स्थितस्तादृशो विभवो यस्मादित्यर्थः । "यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत् प्रयन्त्यभिसंविशन्ती"ति श्रुतेः । यद्वा—विभवो विभुत्वं, पूर्णः सर्वव्यापकत्वेन स्थितस्तादृशो विभवो यस्येत्यर्थः । यद्वा—पूर्णत्वं फलानुपहितविषयितानास्पदेच्छाकत्वं, तादृशो विभवो यस्येति निगूढम् । आत्मातिरिक्त-वस्तूनामनित्यत्वादाकाशादीनां विभुत्वं न सर्वकालव्यापकमिति विशेषः ।

**निरालम्बा मुद्रा भवति । तदनुभवो योगिभिरेव ज्ञायते । ततस्तन्मध्येऽम्बरे पदान् स्थूलान् रूपान् पश्यति ॥ ३६ ॥**

**ज्वलद्दीपाकारानिति । पदान् रूपान् किम्भूतान ? ज्वलद्दीपस्येवाकारो येषां ते तथा । तत्रैव गगनधरणीबीजयोर्मध्ये स्थितं ज्योतिरास्ते । गगनधरणीमण्डलयोरन्तः-**

नवीनसूर्यप्रकाशाकारं गगनभूमध्यमिलितं पश्यति । इह स्थाने भगवान् साक्षात्कारविषयो भवति ॥ ३६ ॥

ननु सर्वव्यापित्वादपरिच्छिन्नस्य ईश्वरस्य कथं परिच्छित्तिस्थाने अभिव्यक्ति-

**इह स्थाने साक्षाद् भवति भगवान् पूर्णविभवो-**
**ऽव्ययः साक्षी वह्नेः शशिमिहिरयोर्मण्डल इव ॥ ३७ ॥**

अत्र परमशिवस्थितिं विशेषेण व्यनक्ति **निर्वाणतन्त्रे**—

एतत्पद्मस्योर्ध्वदेशे ज्ञानपद्मं सुदुर्लभम् ।
पत्रद्वयसमायुक्तं पूर्णचन्द्रस्य मण्डलम् ॥
तथा—शम्भुबीजं हि तन्मध्ये साकारं हंसरूपकम् ।
तथा—एवं हंसो मणिद्वीपे तस्य क्रोडे परः शिवः ॥
वामभागे सिद्धकाली सदानन्दस्वरूपिणी ।

इति । "तस्य क्रोडे" इत्यस्य बिन्दुद्वयरूप-विसर्गमध्ये । तदाह सहस्रार-मुपक्रम्य—

बिन्दुद्वयं तु तन्मध्ये विसर्गरूपमव्ययम् ।
तन्मध्ये शून्यदेशे तु शिवः परमसंज्ञकः ॥

इति । एवं सहस्रारे दर्शनादत्राप्याकाङ्क्षायां तथेति । अत्रानयोः शिव-शक्त्योर्मायाबन्धनाच्छादनेन मकारात्मरूप-परंबिन्दुरूपेण स्थितिर्बोध्या । तदुक्तमाज्ञाचक्रमुपक्रम्य—

उत्कलादिमतेऽत्रैव चणकाकाररूपिणी ।
सृष्टिं करोति भूतानि अत्र स्थित्वा सनातनी ॥

इति । अत्र चणकाकाररूपः परमशिवः सदा वर्त्तते । उत्कलादिमते तु—अत्र स्थित्वा सृष्टिं करोतीत्यर्थः ।

दृष्टान्तमाह—वह्नेरित्यादि । यथाऽर्केन्द्वग्निमण्डले भगवान् वर्त्तते तथाऽत्रापीत्यर्थः । अर्कादिमण्डले भगवतोऽवस्थानं प्रसिद्धम् । यद्वा—वह्नि-शशि-मिहिर-मण्डले सहस्रकमलस्थार्केन्द्वग्निमण्डले तथा चणकाकारेण भगवान् वर्त्तते तद्वदत्रापीति । सहस्रदलेऽर्केन्द्वग्निमण्डलानि प्रदर्शयिष्यन्ते । अत एव पीठपूजायामर्केन्द्वग्निमण्डलोपरि परमात्मज्ञानात्मनोः पूजा विधीयते । परमात्मा परमशिवो ज्ञानात्मा ज्ञानशक्तिस्तदुभयाभिन्नशिवशक्त्यात्मकश्चणकाकारबिन्दुरिति ध्येयम् ॥ ३७ ॥

**स्थितं तद्बीजमिति यावत । ज्योतिः कीदृशम् ? प्रातःकालीनसूर्यस्येव प्रकाशो यस्य तत् तथा । इह स्थाने अर्थाच्चेतसि लीने श्रीभगवान् साक्षाद भवति । कीदृशः ? पूर्णो विभवो ज्ञानं यस्मात् । न व्ययतीत्यव्ययः । अतः सर्वेषां साक्षी, एतेषां तत्स्थाना-धिवासभूतत्वात् । वह्नि शशि-मिहिरणां मण्डलमिव प्रकासते, अत्यर्थतेजोमयत्वात् ॥ ३७॥**

रित्यत आह—राहुरिति । यथा अम्बरगतो राहुर्न दृश्यते किन्तु शशिसूर्ययोर्मण्डलमेव दृश्यते तथायं चिदात्मा एवम्भूतकर्मविशेषकरणादत्रैव साक्षाद् भवति ॥ ३७ ॥

आज्ञाचक्रे योगेन प्राणत्यागफलम्

इह स्थाने विष्णोरतुल-परमामोद-मधुरे
समारोप्यं प्राणं प्रमुदितमनाः प्राणनिधने ।

आज्ञाचक्रे योगेन प्राणत्यागफलमाह—इह स्थान इति । अस्यार्थः—**योगीन्द्रो** जनः **प्राणनिधने** प्राणवियोगकाले **प्रमुदितमना** आत्मानन्देन हृष्टचित्तः सन् इह आज्ञाचक्रे विष्णोर्भगवतः **स्थाने** उपदर्शित-बिन्दुरूपे **प्राणं समारोप्य** अथवा तद्बिन्दौ प्राणं समारोप्य प्राणनिधने सति परं पुरुषं प्रविशतीत्यन्वितार्थः । पुरुषं विशेषयति—नित्यमविनाशिनम् । देवं सृष्टि-स्थितिप्रलयैः क्रीडन्तम् । **अजं** जन्मरहितम् । **त्रिजगतामाद्यम्** । अनेन सर्वेषां पूर्ववर्त्तित्वात् सर्वकारणत्वं सूचितम् । **पुराणं** पुराणपुरुष इति कृत्वा यो निगद्यते स एवायमिति भावः । **वेदान्तविदितमिति** । वेदान्तो ब्रह्मनिरूपक-श्रुतिवाक्यादिस्तज्ज्ञानज्ञाप्यमित्यर्थः ।

**तदयं विष्णोः स्थाने प्राणारोपणप्रकारः** । प्राणवियोगकालं ज्ञात्वा ब्रह्मणि लीनो भवामीत्यानन्दितमना योगासनमासीनः सन् कुम्भकेन वायुं संरुध्य हृदिस्थं जीवात्मानं मूलाधारमानीय गुदमाकुञ्च्य यथोक्तविधानेन कुण्डलिनीमुत्थाप्य मूलादिब्रह्मरन्ध्रान्तं तडिदाकारमानन्दं कुण्डलिनीमयं सूत्ररूपं नादं ध्यात्वा प्राणरूपश्वासं परमात्मकहंसं तन्नादे विलाप्य जीवेन सह चक्रभेदक्रमेणाऽऽज्ञाचक्रमानीय तत्र स्थितायां कुण्डलिन्यां स्थूलसूक्ष्म-क्रमात् पृथिव्यादिप्रपञ्चसमुदायं विलाप्य तां पुनर्जीवात्मना सह तत्र स्थितशिवशक्तिमय-बिन्दुनैकीभावमापाद्य तिष्ठेत; ततो ब्रह्मरन्ध्रभेदेन देहं त्यक्त्वा ब्रह्मणि लीनो भवेदिति ।

**तदयं महावाक्यार्थनिर्णयः** । आज्ञाचक्रं द्विदलं शुक्लवर्णं कर्बूरवर्ण-हक्ष-द्वययुक्तपत्रम् । कर्णिकायां चक्राधिष्ठात्री हाकिनी शक्तिः शुक्लवर्णा

**इह स्थान इति । विष्णोरतुलपरमामोदमधुरे इह स्थाने योगी प्राणवियोगसमायोग-समये प्राणान् मनश्च समारोप्य प्रकृष्टमुदितमनाः सन् परं पुरुषमेव प्रविशति । निर्वाणमुक्तिं प्राप्नोतीति शेषः । कीदृशं परम् ? सर्वेषामन्तर्भूतम् । नित्यम् । दीव्य-**

प्राणनिधने मरणकाले इह स्थाने प्राणान् वायूनूर्ध्वगामिन्या नाड्या समारोप्य वेदान्तविदितं "नित्यं विज्ञानमानन्दं ब्रह्म"ति श्रुतिविदितं परं नित्यं देवमित्यादिविशेषितं पुरुषं प्रविशति । तथा **गीतायामपि**—प्रयाणकाले मनसाचालेन भक्त्या युक्तो योगबलेन चैव ।

**परं नित्यं देवं पुरुषमजमाद्यं त्रिजगतां**
**पुराणं योगीन्द्रः प्रविशति च वेदान्तविदितम् ॥ ३८ ॥**

आज्ञाचक्रोर्ध्वे महानाद-दर्शनफलम्

**लयस्थानं वायोस्तदुपरि च महानादरूपं शिवार्द्धं**
**सिराकारं शान्तं वरदमभयं शुद्धबुद्धि-प्रकाशम् ।**

रक्तषड्वक्त्रा त्रिनेत्रा षड्भुजा वराभयाक्षमाला-कपाल-डमरु-पुस्तक-धरा शुक्लपद्मोपरि स्थिता । तदूर्ध्वे त्रिकोणे इतरलिङ्गः शुक्लवर्णो विद्युदाकारः । तदूर्ध्वत्रिकोणे प्रणवाकृतिरन्तरात्मा प्रदीपाभज्योतिः । तस्य चतुर्दिक्ष्वन्तरिक्षे ज्योतिःस्फुलिङ्गबिम्बैर्वेष्टितो ज्वलद्दीपसदृशेन स्वतेजसा मूलादिब्रह्मरन्ध्रान्तप्रकाशकः । तदूर्ध्वे सूक्ष्मरूपं मनः । तदूर्ध्वे चन्द्रमण्डले हंसक्रोडे परमशिवः सशक्तिक इति ।। इति षष्ठप्रकरणम् ।। ३८ ।।

इदानीमाज्ञाचक्रोर्ध्वे सहस्रदलकमलाधःस्थानवर्त्ति-कारणावान्तरशरीरं निरूपयितुमिच्छन्नाह--**लयस्थानं वायोरिति** । अस्यार्थः--यदा यस्मिन् काले योगी जनो **गुरुचरणयुगाम्भोजसेवासुशीलो** गुरुचरणयुगाम्भोजस्य सेवया सुशोभनं दृढतरैकाग्रमनोऽभिनिवेशेन सर्वाङ्गसुन्दरं शीलं योगानुष्ठानरूपसद्वृत्तं यस्य तादृशः सन् **तदुपरि** आज्ञाचक्रोर्ध्वे **महानादरूपं** महानादस्य स्वरूपं **पश्येत्**, तदा तस्य योगिनः करकमल-तले सदा सर्वस्मिन् काले वाचां सिद्धिः वाक्यसिद्धिर्भूयादेवेत्यन्वितार्थः । नादं विशेषयति--**लयस्थानं वायोरिति** । अत्र महानादे वायोर्लयः, यस्मादुत्पत्तिस्तत्र लयनियमात् ।

तीति देवम् । न जायते इत्यजम् । त्रिजगतामाद्यम् । पुराणं सृष्टिस्थितिप्रलयकारणम् । वेदान्तविहितं वेदान्तमतमेतदिति ।। ३८ ।।

लयस्थानमिति । एतत् स्थानं वायोर्विरामभूतम् । तदुपरि महानादरूपं योगी

भ्रुवोर्मध्ये प्राणमावेश्य सम्यक् स तं परं पुरुषमुपैति दिव्यम् ।। इति ।। ३८ ।।

लयस्थानं वायोरिति । तदुपरि पूर्वोक्तनादोपरि । चकारात् नादस्यापि लयस्थानम् । यत्र वायुर्नादश्च अथैनं जगदधरीकृत्य ब्रह्मरन्ध्रस्यादिस्थाने प्रलीयते तद् वायोर्नादस्यापि लयस्थानं नादान्तमिति यावत् । अत्र अर्द्धनारीश्वरोऽस्तीत्याह--महानन्दमित्यादिना । महान् आनन्दो यत्र तं महानन्दस्वरूपम् । शिवार्द्धं शिवाया अर्द्धं शिवस्याकारम् अर्द्धनारीश्वरमित्यर्थः ।

**यदा योगी पश्येद् गुरु-चरणयुगाम्भोज-सेवासुसील-**
**स्तदा वाचां सिद्धिः करकमलतले तस्य भूयात् सदैव ॥ ३६ ॥**

यद्यपि भूतशुद्धयादौ स्पर्शतत्त्वे वायोर्लयस्तस्य च व्योम्नि लयो दृश्यते तथापि कदाचिन् नादेऽपि वायोर्लयो भवतीति । अत्र--

"पृथिवीकाराद्रसवती रसादजायत ककारात् सर्वाणि जलानि तीर्थानि रेफाद् वह्नितत्त्वं नादाद् वायुः सर्वप्राणमयः, बिन्दोर्गगनं सर्वशून्यं शब्दमयं, तेभ्यः पञ्चविंशतिगुणमयतत्त्वं सर्वमिदं विश्वं ब्रह्मकाण्डं कालिकामयमि"ति--

श्रुतिवाक्येन कालीमन्त्रवर्णस्य सूक्ष्मे संहरणकाले नादे वायोर्लयो भवतीति ध्येयम् ।

**शिवाद्र्धमिति** । शिवस्याऽर्द्धनारीश्वरत्वात् तदर्द्धं शक्तिस्तद्रूपं नादमित्यर्थः । **सिराकारमिति** । दन्यादि-सिरो लाङ्गलं तदाकारमित्यर्थः ।

तदूर्ध्वे तु महानादो लाङ्गलाकृततिरुज्ज्वलः ।

इति **कार्त्तिकेयेश्वरसंवादवाक्यात्** । यद्यपि "कृषिको लाङ्गलं हलं गोदारणञ्च सीरश्चे"त्यमरकोषे लाङ्गलवाचक-सीरशब्दस्य चतुर्थस्वरयोगित्व, तथाप्यत्र वचनान्तरैकवाक्यतानुरोधेन तृतीयस्वरयुक्त-सिरःपदेनापि लाङ्गलं प्रतीयते इति । अथवा--शिवाकारमिति । तेन शिवशक्तिमयोऽयं नादः । तदुक्तं **प्रयोगसारे--**

नादात्मना प्रबुद्धा सा निरामयपदोन्मुखी ।
शिवोन्मुखी यदा शक्तिः पुंरूपा सा तदा स्मृता ॥ इति ।

अत एव "तस्या एव शक्तेर्नादबिन्दू सृष्ट्युपयोगावस्थरूपा"विति राघवभट्टनाप्युक्तम् ।

अन्यत्र--सा तत्त्वसंज्ञा चिन्मात्र-ज्योतिषः सन्निधेस्तदा ।
विचिकीर्षुर्घनीभूता क्वचिदभ्येति बिन्दुताम् ॥

इति । तथा श्रीमदाचार्यवाक्यम्--'नाद एव घनीभूतः क्वचिदभ्येति बिन्दुताम्" इति । अत्र सकलवचनपर्यालोचनया शक्तिरेव नादबिन्दुरूपेणा-

जनो यदा पश्येत्, तदा तस्य वाक्सिद्धिरपि करपद्मतले सदैव भूयात् । कीदृशम् ?

तथा च श्रीक्रमे--चेतसा संप्रपश्यन्ति नादान्ते वृषभध्वजम् ।
तमर्द्धदेहं वरदं कारणत्रयमातरम् ।
पुटद्वयविनिष्क्रान्तो वायुर्यत्र प्रलीयते ॥

ऽविर्भूता सुवर्णकूण्डलमिव । नादबिन्दुः पुनरेकाकारैवेति निष्कर्षः । अभयवरदमभयवरदातारमित्यर्थः ।

अथ समाधिरूपयोगानुशीलनसाधकानां—

समाधिकालात् प्रागेवं विचिन्त्याऽतिप्रयत्नतः ।
स्थूलसूक्ष्मक्रमात् सर्वं चिदात्मनि विलापयेत् ।।

इत्यार्यवचनेन समाधेः पूर्वं स्थूलसूक्ष्मरूप-सृष्टिप्रपञ्चसमुदाय-चिन्तन-विधानात् तज्ज्ञानस्यावश्यकत्वादत्र वदन्ति । तत्र तावत् पृथिव्यादि-पञ्च-स्थूलरूपाणि मूलादिविशुद्धान्तचक्रे उक्तानि । तदाश्रितत्वात् मूलाधारे भूमण्डले पाद-घ्राणेन्द्रिय-गन्धतत्त्वेति त्रिः । जलमण्डले पाणि-रसनेन्द्रिय-रसतत्त्वेति त्रिः । वह्निमण्डले पायु-चक्षुरिन्द्रिय-रूपतत्त्वेति त्रिः । वायु-मण्डले उपस्थ-त्वगिन्द्रिय-स्पर्शतत्त्वेति त्रिः । नभोमण्डले वाक्-श्रोत्रेन्द्रिय-शब्दतत्त्वेति त्रिरिति समुदायेन पञ्चदशतत्त्वानि वर्त्तन्ते । पृथिव्यादिना मिलित्वा विंशतितत्त्वानि स्थूलानि बोद्धव्यानि । इदानीं सूक्ष्मरूपाणि विधीयन्ते । तत्राज्ञाचक्रे सूक्ष्मरूपं मनः स्वयं प्रदर्शितम् । अपराण्याह कङ्कालमालिनीतन्त्रे आज्ञाचक्रमुपक्रम्य—

मनश्चात्र सदा भाति हाकिनीशक्तिरञ्जितम् ।
बुद्धिप्रकृत्यहङ्कारालङ्कृतं तैजसं परम् ।।

इति । अत्र बुद्धिप्रकृत्यहङ्कारात्मक-सूक्ष्मरूपत्रयाणां स्थितिः प्रतीयते । तत्राहङ्कारस्य न पाठक्रमात् स्थितिः । मूलाधारादिषु सर्वत्र पृथिव्यादि-जनकस्य तत्तद्विलयाधारस्य च जन्यविलाप्ययोरधःस्थितिदर्शनात् पाठक्रमा-च्छाब्दक्रमस्य बलत्त्वाच्च अत्रापि तथा स्थितिः कल्प्यते । तेन "अहङ्कारे हरेद् व्योम सशब्दं तन्महत्यपी"ति वचनाद् व्योम्नो विलयार्थं तद्विलया-धिकरणस्याऽहङ्कारस्य प्रथमोपस्थितत्वादादावहङ्कारस्तदूर्ध्वे बुद्धि-प्रकृत्योः स्थितिः । एतेषां जन्यजनकभावमाह **शारदायाम्** —

मूलभूतात् ततोऽव्यक्ताद् विकृतात् परवस्तुनः ।
आसीत् किल महत्तत्त्वं गुणान्तःकरणात्मकम् ।।

शिवो हकारस्तदाकारणम । शिवदेव्योरर्द्धमङ्गस्वरूपं यस्य, हरगौर्यात्मकत्वात् ।

स्वच्छन्दसंग्रहेऽपि—हलाकारस्तु नादान्तो[न्ते] भित्त्वा सर्वमिदं जगत् ।
अधःशक्त्या विनिर्भेद्य ऊर्ध्वशक्त्यवसानकः ।।
नाड्यां ब्रह्मविले लीनस्त्वव्यक्तो ध्वनिलक्षणः ।
अतो ब्रह्मविलं ज्ञेयं रुद्रकोट्यर्बुदैर्युतम् ।।

अभूत् तस्माहङ्कारस्त्रीविधः सृष्टिभेदतः ॥

इति । 'विकृतादि'ति । इदं परवस्तुनः प्रतिबिम्बत्वेन विकृतिरूपं, महत्तत्त्वादीनां प्रकृतित्वात् प्रकृतिनामकञ्च । अत एवोक्तम्--

प्रकृतिः परमाः शक्तिर्विकृतिः प्रतिबिम्बता ॥ इति ॥

तथा "परंब्रह्मात्मप्रकृतिः प्रतिबिम्बस्वरूपिणी"ति प्रागुपदर्शितम् । शारदावचने 'महत्तत्त्वमि'ति । यदेव महत्तत्त्वं सैव बुद्धिः । तदाह **ईशानशिवेन**--

बोद्धव्यलक्षणा सैव प्रकृतिः शक्तिजृम्भिता ।
बुद्धितत्त्वं भवेद् व्यक्तं सात्त्विकं गुणमाश्रिता ॥
सैव बुद्धिर्महन्नाम तत्त्वं सांख्यैः प्रगीयते ।

इति । महत्तत्त्वन्तु गुणान्तःकरणात्मकम् । गुणाः सत्त्वरजस्तमोरूपाः । अन्तःकरणमाह **शारदायाम्** "अन्तःकरणमात्मनः । मनोबुद्धिरहङ्कारश्चित्तञ्च परिकीर्त्तितम् ।" इति एतत्समुदायत्मकं महत्त्वम् । ननु मनसो महत्तत्त्वान्तर्गतत्वे "तदन्तश्चक्रेऽस्मिन् प्रविलसति मनः सूक्ष्मरूपमि"त्यनेन पृथगभिधानं कथं सङ्गच्छत इति चेत् । न । तन्मनो न महत्तत्त्वान्तर्गतं किन्तु तदहङ्कारजन्यमतिरिक्तम् । तदाह—

"यच्चापरं मनस्तत्त्वं ससङ्कल्पविकल्पकम् ।
तैजसादेव तज्जातम्......................॥"

इति **राघवभट्टः** । एवञ्चाज्ञाचक्रस्थमनःपर्यन्तानां क्रमेण स्थितेर्विहितत्वात् तदूर्ध्वेऽहङ्कारादीनां स्थितिर्बोध्या । ततश्चाज्ञाचक्रे हाकिनीतरलिङ्ग-प्रणव-मनोऽहङ्कार-बुद्धि-प्रकृतीनामव्यवहितोर्ध्वोर्ध्वक्रमेण स्थितिनिरूपणात् स्थानविशेषानभिहितस्य पूर्वदर्शितचन्द्रमण्डलस्य तेषामूर्ध्वे स्थितिरिति । ननु तेषामधः कथं न स्थीयते इति चेत् । न । "इन्दुर्ललाटदेशे च तदूर्ध्वे बोधिनी स्वयमि"ति सम्मोहनतन्त्रवचनेन वक्ष्यमाणाज्ञाचक्रोर्ध्ववर्त्तिन्योः समनियतयोरिन्दु-बोधिन्योरधोभागे स्थितिबोधनात् तयोरव्यवधानाय सर्वोर्ध्वे एव तस्य स्थितिरिति । अथाज्ञाचक्रोर्ध्वे कारणरूपमाह **सम्मोहनतन्त्रे** –

इन्दुर्ललाटदेशे च तदूर्ध्वे बोधिनी स्वयम् ।
तदूर्ध्वे भाति नादोऽसावर्द्धचन्द्राकृतिः परः ॥

**शान्तं सौम्यमूर्त्तिम् । वरान् ददाति अभयमपि । शुद्धबुद्धीनां प्रकाशो**

तत्र ब्रह्मशिवो ज्ञेयः शशाङ्कशतसन्निभः ।
दशबाहुस्त्रिनेत्रश्च पञ्चवक्त्रेन्दुशेखरः ॥

तदूर्ध्वे च महानादो लाङ्गलाकृतिरुज्ज्वलः ।
तदूर्ध्वे च कला प्रोक्ता आञ्जीति योगिवल्लभा ।
उन्मनी तु तदूर्ध्वे च यद् गत्वा न निवर्त्तते ॥

इति । 'तदूर्ध्वे बाधिनी'त्यत्र तदूर्ध्वे ललाटोर्ध्वे, आज्ञाचक्रोर्ध्वे इति यावत् । बोधिन्यधःस्थले बिन्दुस्थितिमाह **भूतशुद्धितन्त्रे**--

बिन्दुर्मात्रार्द्धतो देवि तदूर्ध्वे नादसंज्ञितम् ।
लयस्थानं तथा वायोर्महानादं तदूर्ध्वतः ॥ इति ॥

'मात्रार्द्धा' शक्तिः, बालसूर्यप्रतिकाशमासीद् बिन्दुमदक्षरम् ।
तदूर्ध्वे चार्द्धमात्रा तु गान्धाररागमनाश्रिता ॥

इति **बृहत्त्रिविक्रमसंहिता**वचनेनाऽर्द्धमात्रायाः शक्तिवाचकत्वप्रतीतेः । अत्र द्वयोर्वचनयोरेकवाक्यतया याऽर्द्धमात्रा सैव बोधिनीति बोध्यम् । बिन्दु-बोधिनी-नादेति त्रयं बिन्दुमयपरशक्तेः रूपविशेषः । तदाह **शारदायाम्**—

सच्चिदानन्दविभवात् सकलात् परमेश्वरात् ।
आसीच्छक्तिस्ततो नादो नानाद् बिन्दुसमुद्भवः ॥
परशक्तिमयः साक्षात् त्रिधाऽसौ भिद्यते पुनः ।
बिन्दुर्नादो बीजमिति तस्य भेदाः समीरिताः ॥
बिन्दुर्नादात्मको बीजं शक्तिर्नादस्तयोर्मिथः ।
समवायः समाख्यातः सर्वागमविशारदैः ॥

इति । 'परशक्तिमयः' परः शिवस्तेन शिवशक्तिमयो बिन्दुः । अयं ललाटोर्ध्वे स्थितिः । 'बिन्दुर्नादात्मकः' शिवात्मकः । 'बीजं शक्ति'र्बोधिनीरूपमित्यर्थः । नादस्तयोः समवायः सम्बन्धः क्षोभ्यक्षोभकरूपस्तेनाऽयं क्रियाशक्तिरूपः । एतत्त्रयोर्ध्वे महानादः पूर्वोपदर्शितः । 'तदूर्ध्वे च कला प्रोक्ता' इति । कला शक्तिः । आञ्जीति तिर्यग्-रेखारूपमात्राकारेत्यर्थः । इयं शक्तिः **सृष्ट्या-दावाविर्भूता** । तदुक्तं **पञ्चरात्रे**—

यस्मात् । योगी कीदृशः ? **गुरुचरणसेवासुशील** इति । **गुरुचरणस्यैतदुपदेश**

ब्रह्माणी त्वं परा शक्तिः ब्रह्मणोत्सङ्गगामिना ।
द्वारं सा मोक्षमार्गस्य रोधयित्वा व्यवस्थिता ॥ इति ॥

एवमालोक्य सर्गादौ सच्चिदानन्दरूपिणीम् ।
समस्ततत्त्वसंघातां सृष्टयधिष्ठातृरूपिणीम् ।
व्यक्तां करोति नित्यां तां प्रकृतिं परमः पुमान् ।। इति ।।

अन्यत्र—शिवशक्तिसमायोगादव्यक्तात् परमेश्वरात् ।
आद्या भगवती देवी सैव त्रिपुरसुन्दरी ।।
आसीच्छक्तिस्ततो नादो नादाद बिन्दुसमुद्भवः ।

इति । 'उन्मनी तु तदूर्ध्वे चे'ति । तल्लक्षणमाह—

यत्र गत्वा तु मनसो मनस्त्वं नैव विद्यते ।
उन्मनी सा समाख्याता सर्वतन्त्रेषु गोपिता ।।

इति । ततश्च मनोवृत्तिमद्विषयावलम्बनचेष्टाकालीनविषयावलम्बनसामान्याभावसम्पादकत्वमुन्मनीत्वमिति । सा च द्विविधा सहस्राराधारा निर्वाणकलारूपा, एतत्स्थानस्थिता वर्णावलीरूपा च । तथा च **कङ्कालमालिनीतन्त्रे**—

सहस्रारकर्णिकायां चन्द्रमण्डलमध्यगा ।
सर्वसङ्कल्परहिता कला सप्तदशी भवेत् ।
उन्मनी नाम तस्या हि भवपाशनिकृन्तनी ।। इति ।।

तथा—उन्मनीञ्च मालावर्णं स्मरणान् मोक्षदायिनी ।।

इति 'मालावर्णं' वर्णावलीरूपमित्यर्थः । उन्मन्यधः समनीमाह **भूतशुद्धौ**—

ततो हि व्यापिका शक्तिराञ्जीति यां विदुर्जनाः ।
समनीमूर्ध्वतस्तस्या उन्मनीं तु तदूर्ध्वतः ।।

इति । इदमपि परशक्तेरवान्तररूपम् । ततश्चाज्ञाचक्रोर्ध्वे द्वितीयबिन्दुः शिवस्वरूपः । तदूर्ध्वे अर्द्धमात्राकारा बोधिनीशक्तिस्तदूर्ध्वे शिवशक्तिसमवायरूपाऽर्द्धचन्द्राकृतिर्नादस्तदूर्ध्वे लाङ्गलाकृतिर्महानादस्तदूर्ध्वे आञ्जीरूपा व्यापिका शक्तिस्तदूर्ध्वे समनी तदूर्ध्वे उन्मनीति क्रमेण सप्त कारणरूपाणि वर्त्तन्ते । अलमतिविस्तरेण प्रकृतमनुसरामः ।। ३९ ।।

**इत्यर्थः ।। ३९ ।।**

हलाकारो लाङ्गलसदृशः । 'देवीस्थानं सहस्रारं प्रविशेदकुलं प्रिये ।' इति **श्रीक्रमात्** ।। ३९ ।।

सहस्रारपद्मस्वरूपम्

**तदूर्ध्वे शङ्खिन्या निवसति शिखरे शून्यदेशे प्रकाशं**
**विसर्गाधः पद्मं दशशतदलं पूर्णचन्द्रातिशुभ्रम् ।**

सहस्रदलपद्मं निरूपयन्नाह—**तदूर्ध्वं** इति दशभिः । **तदूर्ध्वं** प्रागुपदर्शित-सवषामूर्ध्वे । पूर्वोपदर्शित-शङ्खिनीनाड्याः **शिखरे** मस्तके । शून्यदेशे नाड्य-नावृतस्थाने । तेन सुषुम्णाया अप्यूर्ध्वं इति सूचितम् । **विसर्गस्याधः** दशशत-दलं सहस्रदलं पद्मं **निवसतीत्यन्वयः** । विसर्गन्तु ब्रह्मरन्ध्रस्योर्ध्वभागे—

तस्मिन् रन्ध्रे विसर्गञ्च नित्यानन्दं निरञ्जनम् ।

इत्यादि-वक्ष्यमाणवचनाद् । पद्मं विशेषयति—**पूर्णचन्द्रेत्यादि** । **ल-काराद्यवर्णैः प्रविलसितवपुरिति** । अत्र ल-कारग्रहणं न विलोमेन वर्णचिन्तनार्थं, किन्तु ( ल-कारग्रहणं ) क्ष-कारपरित्यागार्थम् । तत्त्यागबीजं हि वर्णानां सहस्रदले स्थितिरावर्त्तनेनैव घटते । एवञ्च क्ष-कारसहितैकपञ्चाशद्-वर्णानां विंशत्यावर्त्तनेन विंशत्यधिक-सहस्रसंख्या भवन्ति । ऊनविंशत्या-वर्त्तनेन त्वेकत्रिंशन्न्यूनसहस्रसंख्या भवन्ति । अतः क्षकारपरित्यागेन तत् समाधीयते । तेन अ-कारादि-ल-कारान्त-पञ्चाशद्वर्णा अनुलोमेन विंशत्या-वर्त्तनेन सहस्रदले चिन्तनीया इति ध्येयम् । अनुलोमेन वर्णचिन्तनं व्यक्त-माह **कङ्कालमालिनीतन्त्रे**—

**तदूर्ध्व इति । तस्य महानादस्योर्ध्वे शङ्खिन्याश्च शिखरसमदेशे शून्यदेशे निरालम्बे विसर्गस्याधः प्रकाशरूपं सहस्रदलपद्मं निवसति । अत्यर्थपूर्णचन्द्र इव शुभ्रम् । अधो-**

अकुलाख्यसहस्रारपद्ममाह – तदूर्ध्वे इत्यादिना । शङ्खिन्या नाड्याः शिखरे अग्रे शून्यदेशे चित्रिण्या मेरुदण्डस्य च शून्यदेशे । तेन सहस्रारं न मेरुदण्डस्य मध्ये न वा चित्रिण्या ग्रथितम् । **मायातन्त्रेऽपि**—

मूलादिषट्सरोजातं चित्रिणाग्रथितं प्रिये ।
लिङ्गाधोर्ध्वनाभिवक्षःकण्ठभ्रूमध्यदेशजम् ॥ इति ॥

अत एव **स्वच्छन्दसंग्रहे**—

द्वादशावर्णं ललाटोर्ध्वं रूपेणार्द्धावसानकम् ।
द्व्यङ्गुलोर्ध्वशिरोदेशं परं व्योम प्रकीर्त्तितम् ॥ इति ॥

**श्रीक्रमे**—आसव्यकर्णाद् देवेशि शङ्खिनी च शिरोपरि ।

हलाद्यनन्तरम् —शङ्खिनीनालं संप्राप्य चास्थिशून्यं बिभर्त्ति यः ।
अमृतं यत् त्रिकूटस्थं परमानन्दलक्षणम् ॥
सहस्रारं महापद्मं रक्तकिञ्जल्कशोभितम् ।
द्रुतहेमाम्बुजं जातधारपातप्रवर्षणम् ? ॥
विसर्गाधः पद्ममिति सर्गः शक्तिर्निशाकरः ॥

**अधोवक्त्रं कान्तं तरुणरविकला-कान्तिकिञ्जल्कपुञ्जं**
**लकाराद्यैर्वर्णैः प्रविलसित-वपुः केवलानन्द-रूपम् ॥ ४० ॥**

सहस्रारं महापद्मं शुक्लवर्णमधोमुखम् ।
अ-कारादि-क्षकारान्तैः स्फुरद्वर्णैर्विराजितम् ॥

इति । अत्र 'क्ष-कारान्तै'रित्यत्राऽन्तशब्दस्याऽवसानार्थकत्वात् क्ष-कारोऽन्तेऽवसाने यस्येति बहुव्रीहिणा क्ष-कारं विहाय ल-कारान्त-पञ्चाशद्वर्णयोगः । अथवा—ल-काराद्यैरिति लकारान्त-पञ्चाशद्-वर्णानामकथादित्रिरेखावद् वामावर्त्तेन यथायोग्यावर्त्तनेन विन्यासः । **कङ्कालमालिनी**वचनन्तु दक्षिणावर्त्तेन वर्णविन्यासविधायकमिति वचनद्वयाविरोधः । अत्र पञ्चाशद्-वर्णानां रूपविशेषानभिधानात् तद्वर्णमय्या मातृकायाः शुक्लवर्णत्वदर्शनात् तेऽप्यत्र शुक्लत्वेनैव चिन्तनीया इति ध्येयम् । ललाटाद्यैर्वर्णैरिति पाठे तु ललाटशब्देन मातृकान्यासोक्त-ललाटवर्णोऽकारस्तदाद्यैर्वर्णैरित्यर्थः । एतत्पक्षे लकारं विहाय अकारादिक्षकारन्त-पञ्चाशद्वर्णयोगो बोध्यः; सर्वत्र पञ्चाशद्वर्णग्रहणे अन्त्यलकारत्यागदर्शनात् ।

अत्र केचित् **प्रविलसिततनुरिति** पठन्ति । तत्र "वा पुंसि पद्ममि"ति दर्शनात् पुंसि विशिष्टस्य पद्ममित्यस्य विशेषणता तनुरित्यस्यापि पुंस्त्वमिति व्याख्यायन्ति च । तन्न । एतच्श्लोकस्थ-निवसति-क्रियायाः कर्त्तृत्वेन पद्ममिति बिन्द्वन्तनिर्देशात् क्लीबलिङ्गप्रयोग एव प्रतीयते, न तु पुंलिङ्गप्रयोगस्तथात्वे विसर्गान्तो भवितुमर्हति; अतस्तद्विशेषणस्य तनुशब्दस्य क्लीबत्वमवश्यं वाच्यम् । तथात्वे बिन्द्वन्तता न भवति, निर्बिन्दुत्वे छन्दःपातस्तस्माद् वपुरित्येव पाठः । स्पष्टमन्यत् ॥ ४० ॥

**वक्त्रम् । कान्तम् । तरुणरविकला इव कान्तं किञ्जल्कपुञ्जं यस्य । ललाटाद्यै**र्ललाटादिविन्यस्तैरकारादिपञ्चाशद्वर्णैर्विंशतिप्राकारेण परिलसिततनुः केवलानन्दस्वरूपमिति ॥ ४० ॥

इति नारदोक्तेन विसर्गस्याधः सहस्रारपद्मधारिण्या ऊर्ध्वस्थितायाः शक्तेरधः पद्मम् ।
निर्वाणपद्धत्यामपि—कुलरूपं भवेच्छक्तिः विसर्गमण्डलं प्रिये ।
सहस्रारं महापद्मं रक्तकिञ्जल्कशोभितम् ॥ इति ॥

**सारसमुच्चयेऽपि** "सहस्रारपद्मं विसर्गादधस्तात्" इति पूर्णपूर्णेन्दुशुभ्रं पूर्णं पीयूषपूर्णं तच्च पूर्णेन्दुशुभ्रञ्चेति तत् । बालसूर्यरश्मिसमः केसरसमूहो यस्य तत् । पद्मन्तु शुक्लवर्णम् ।

यथा **मायातन्त्रे**—महाशून्ये सहस्रारं निशाकरसहोदरम् ।
अधोवक्त्रं कर्णिकायाश्चन्द्रोर्ध्वे शक्तिरूपिणी ॥ इति ॥

ललाटाद्यैरकाराद्यैः समस्तमातृकाक्षरैर्युक्तम् ॥ ४० ॥

सहस्रदलकर्णिकास्थ-चन्द्रमण्डल-स्वरूपम्

**समास्ते तस्यान्तः शशपरिरहितः शुद्धसम्पूर्णचन्द्रः**
**स्फुरज्ज्योत्स्नाजालः परमरसचयस्निग्धसन्तानहासी ।**

सहस्रदलकमलकर्णिकायां चन्द्रमण्डलस्थितिमाह—**समास्त** इति । **तस्यान्तस्तत्र** पद्मे अन्तर्मध्ये शुद्धो निर्मलोदयविशिष्टः । चन्द्रं विशेषयति—स्फुरदित्यादि । **परमरसचय-स्निग्धसन्तानहासीति** । **स्निग्धः** आर्द्रसदृशभावस्तस्य सन्तानो विस्तारो यत्रेत्यर्थः । ततश्च परमामृतरसचयेनोत्तापहीनतया स्निग्ध-सन्तानयुक्तो हासवदानन्दमयकिरणविशिष्ट इत्यर्थः । अथ चन्द्रमण्डलस्याध ऊर्ध्वे अन्तरात्मादीनां स्थितिमाह **कङ्कालमालिनीतन्त्रे** सहस्रारमुपक्रम्य—

तत्कर्णिकायां देवेशि अन्तरात्मा ततो गुरुः ।
सूर्यस्य मण्डलं चैव चन्द्रमण्डलमेव च ॥
ततो वायुर्महानामा ब्रह्मरन्ध्रं ततः स्मृतम् ।
तस्मिन् रन्ध्रे विसर्गञ्च नित्यानन्दं निरञ्जनम् ॥
तदूर्ध्वे शङ्खिनी देवी सृष्टिस्थित्यन्तकारिणी ।

इति । **यस्यान्तश्चन्द्रमण्डलमध्ये सततं** निरन्तरं **विद्युदाकाररूपं त्रिकोणं स्फुरतीति । तदन्तःशून्यमिति ।** अन्तर्मध्ये शून्यं यस्य तदन्तःशून्यं परंबिन्दुशरीरं, तस्मिन् त्रिकोणे अन्तःशून्यं तदन्तःशून्यं त्रिकोणमध्यवर्त्ति परंबिन्दु-

**समास्त इति । तस्य पद्मस्याऽन्तर्मध्ये शशरहितोऽत्यर्थदीप्तिमान् सम्पूर्णचन्द्रः समास्ते । कीदृशः ? स्फुरन्ति ज्योत्स्नाजालानि यस्य स तथा । परमरसचयेन शिवसम्बन्धाय परमामृतसमूहेन अत्यर्थस्निग्धहासो दीप्तिर्यस्य । तस्य चन्द्रस्य मध्ये त्रिकोणं**

तन्मध्ये पूर्णचन्द्रः । स्निग्धसन्तानं हसतीति स्निग्धसन्तानहासी । तस्यान्तश्चन्द्रमण्डलस्य मध्ये त्रिकोणम् । तत् तु अकथादित्रिरेखात्मकम् । तत्त्रिकोणे हलक्षवर्णत्रयम् । तदन्तस्त्रिकोणमध्ये शून्यं परलिङ्गं परलिङ्गस्य तेजोवर्णत्वात् शून्यं शून्याकारमिति यावत् । तथाच **गौतमीये** —

सहस्रारे हिमनिभे सर्ववर्णविभूषिते ।
अकथादित्रिरेखासु हलक्षत्रयभूषिते ॥
तन्मध्ये परबिन्दुञ्च सृष्टिस्थितिलयात्मकम् ॥ इति ॥

**योगिनीहृदये**—सूक्ष्मरूपं समस्तार्णवृतं परमलिङ्गकम् ।
बिन्दुरूपं परमानन्दकन्दं नित्यसदोदितम् ॥ इति ॥

त्रिकोणं तस्यान्तः स्फुरति च सततं विद्युदाकाररूपं
तदन्तःशून्यं तत् सकलसुरगणैः सेवितं चातिगुप्तम् ॥ ४१ ॥

सहस्रदलकर्णिकास्थ-परमशिवस्थिति-स्वरूपम्

सुगुप्तं तद् यत्नादतिशय-परमामोद-सन्तान-राशेः
परं कन्दं सूक्ष्मं सकल-शशिकला-शुद्धरूपप्रकाशम् ।

रूपं शून्यं स्फुरतीति क्रियान्वयः । यद्वा तदन्तस्त्रिकोणमध्ये शून्ये परंबिन्दुरूपं स्फुरति । अत एवोक्तं **तोडलतन्त्रे** षष्ठोल्लासे—

निराकारं परं ज्योतिर्बिन्दुञ्चाव्ययसंज्ञकम् ।
बिन्दुशब्देन शून्यं स्यात् तथा च गुणसूचकम् ॥

इति । अत्र "आहारनिर्हारविहारयोगाः सुसंवृता धर्मविदा तु कार्या" इति वचनाद् योगस्य गोपनेनाऽनुष्ठानविधानात् तदन्तःशून्यमतिगुप्तं यथा स्यात् तथा **सकलसुरगणैः सेवितमा**राधितमित्यर्थः ॥ ४१ ॥

**सुगुप्तमिति** । अस्यायमर्थः--वक्ष्यमाणकेशाग्रकोटिभागैकरूपत्वादतिगुप्तं **तत्** शून्यं यत्नात् चिरनिरन्तरध्यानाद्यनुष्ठानात् **सकलशशिकलाशुद्धरूपप्रकाशं** कला निर्वाणकला तया सह वर्त्तमाना या शशिनश्चन्द्रस्य षोडशी कला तया निर्मलरूपप्रकाशो यस्य तदित्यर्थः । तथा चातिसूक्ष्ममपि त्रिकोणान्तर्वर्त्त्यमाकलानिर्वाणकलासहित-परंबिन्दुरूपान्तःशून्यं ध्यानेन प्रकाशितं भवतीति भावः । **परमामोदसन्तानराशेर्मोक्षस्य परं कन्दं** प्रधानमूलमित्यर्थः । सुगुप्तमित्यत्र सुगोप्यमिति पाठे यत्नादित्यस्य उभयत्राऽन्वय इति ध्येयम् ।

सर्वदैव स्फुरति । विद्युदाकार इव रूपं यस्य त्रिकोणान्तर्मध्ये तत् शून्याकारं विलसति । सकलसुरगणैः सेवितम् । शून्यत्वादतिगुह्यम् ॥ ४१ ॥

सुगुप्तमिति । सुगोप्यं तत् शून्याकारशिवलिङ्गं यत्नाद् गोप्यं गोपनीय कस्मैचित् यावत्तावन्न कथनीयम् । कीदृशम् ? अतिशयपरमामोदसन्तानजनकामृतराशेः प्रकृष्ट-

व्याख्यातञ्च **अमृतानन्दस्वामिना** यथा परलिङ्गस्य पर तेजोरूपत्वादवर्णत्वं सूक्ष्मरूपम्, अतीन्द्रियगोचरम्, अत एव बिन्दुरूपं समस्तार्णवृतम् । नित्यत्वञ्च मातृकाया उत्पत्तिविनाशरहितत्वात् । पदात् पदं प्राप्य उदितं प्रकाशितम् । तदेवाह--परमामोदसन्तानराशेः परं कन्दं सूक्ष्ममिति । शशिसमस्तकलाशुद्धरूपम् ॥ ४१ ॥

"नित्यं विज्ञानमानन्दं ब्रह्म" इति श्रुतिबोधितो यः परशिवः स द्विधा भूत्वा परमशिवाख्यः सगुणः शिवः प्रकाशात्मा अत्र परबिन्दुचक्रे निवसति इत्याह--इह

**इह स्थाने देवः परमशिवसमाख्यानसिद्धः प्रसिद्धः**
**खरूपी सर्वात्मा रसविरसमितोऽज्ञानमोहान्धहंसः ॥ ४२ ॥**

केचित् तु त्रिकोणान्तःशून्यं शून्यस्थानम्। तत् तु कीदृशम् ? सकलशशिकलाशुद्धरूपप्रकाशम्। शशिनश्चन्द्रस्य सकलकलाः समस्तकलाः षोडशकलास्तस्याः शुद्धं शुक्लं यद् रूपं तदेव प्रकाशो यस्य तादृशपूर्णचन्द्रप्रकाशमित्यर्थं इति व्याख्यायन्ति। तच्चिन्त्यम्। तत्त्रिकोणस्य पूर्णचन्द्रमण्डलमध्यवर्त्तित्वकथनेनैव त्रिकोणमध्यस्थानस्य पूर्णचन्द्रतुल्यप्रकाशप्राप्तौ पुनस्तत् कथनं व्यर्थं स्यात्। किञ्च सकलसुरगणैः सेवितमित्यनेन शून्यस्थानस्य सेवनं न युज्यते किन्तु त्रिकोणान्तर्बिन्दोरेव सेव्यत्वमिति। यदि तु तच्छून्यस्थानस्य परंबिन्दोरधिष्ठानात् सेव्यत्वमित्युच्यते, तदा तत् शून्यस्थानमेव नो भवतीति सुधीभिर्भाव्यम्।

सहस्रदलकर्णिकायां परमशिवस्थितिमाह--इह **स्थान** इति। इह **स्थाने** कर्णिकायामित्यर्थः। **परमशिवसमाख्यानसिद्धः** परमशिवनाम्ना ख्यातो **देवः**, वर्त्तत इति शेषः। देवं विशेषयति--खरूपीति। ब्रह्मरूपी ब्रह्ममयमिति यावत्। **सर्वात्मा** सर्वेषां जीवानामात्मा जीवात्मस्वरूपः, जीवात्म-परमात्मनोर्वस्तुतो भेदाभावात् य आत्मा स एव जीवः। अत एवोक्तम**ध्यात्मरामायणे**--

जीवात्मा परमात्मा च पर्यायो नात्र भेदधीः।
आचार्यशास्त्रोपदेशादैक्यज्ञानं यदा भवेत्।
आत्मनोर्जीवपरयोर्मूलाऽविद्या तदैव तु॥

इति। श्रुतिरपि--"तत्त्वमसी"ति वाक्येन तत्-त्वं-पदयोरेकार्थत्वं दर्शयति। **रसविरसमित** इति। **रसः** परमानन्दरसः, विरसस्तद्वैलक्षण्येन शिवशक्ति-

मूलं, तस्मादेव परमामृतं क्षरति। सूक्ष्ममलक्ष्यम्। शशिनः सकलकलैवांशरूपं प्रकाशो यस्य। इह स्थान एव परमशिवत्वेन सिद्धः सर्वैर्विदितः। प्रसिद्धः योगिनां हृदये स्थाने इत्यादिना। परशिवसमाख्यानसिद्धप्रसिद्धं यस्य सः। तदुक्तं **सङ्केतपद्धत्याम्**--

अकारः सर्ववर्णाग्र्यः प्रकाशः परमः शिवः।
हकारोऽन्त्यकलारूपो विमर्शाख्यः प्रकीर्त्तितः।
अनयोः सामरस्यं यत् परस्मिन् महसि स्फुटम्॥ इति॥

तत्र अमृतानन्दस्वामिनः--"अ इति ब्रह्म" इति श्रुत्या अकारवाच्यः परशिवस्तस्यांशित्वेन परमशिवोऽप्यकारवाच्यः प्रकाशरूपब्रह्मांशित्वात्। विमर्शाख्यः विमर्शिनी [सा] शक्तिरित्यन्तेनाहुः। सर्वात्मा "पुरुष एवेदं सर्वं यद्भूतं यच्च भव्यम्" इति

**सुधाधारा-सारं निरवधि विमुञ्चन्नतितरां**
**यतेः स्वात्मज्ञानं दिशति भगवान् निर्मलमतेः।**

योगजन्य-सामरस्यानन्दरूपः, तदुभयरसमितः प्राप्त इत्यर्थः। अथवा--**रसः** प्रथमोपस्थितत्वेन विषयरसस्तस्मिन् **विरसा** हेयताबुद्धिर्येन रसेन स परमानन्दरसस्तमित इत्यर्थः। **अज्ञानमोहान्धहंसः** अज्ञानमोहान्धकारनाशकत्वाद् हंसः सूर्यरूप इत्यर्थः॥ ४२॥

**सुधाधारासारं निरवधि विमुञ्चन्नतितरामिति**। **निरवधि** निरन्तरमतितरामतिशयं यथा स्यात् तथा **सुधाधारारूपसारं विमुञ्चन्नि**त्यर्थः। अथवा--सुधाया आधारश्चन्द्रस्तस्मादास्त्रियते निःस्त्रियते, तत् सुधाधारासारं शुक्लवर्णामृतकिरणं विमुञ्चन् प्रकाशयन्नित्यर्थः। एतद्विशेषणेन विशेष्यस्य चन्द्रवत् शुक्लवर्णत्वं सूचितम्। यद्वा - आसार्यते निःसार्यते उच्चार्यते इति यावत्, आसारं वाक्यं, सुधाधारया सह आसारं सुधाधारासारं सुधामयवाक्यमित्यर्थः। ततश्च **निरवधि** सर्वस्मिन् काले **अतितरां** मोहनाशायाऽतिप्रबलतरां सुधामयवाक्यं विमुञ्चन्नुच्चरन् सन् यतेरुपास्यदेवतायां नियतमनसः स्वात्मज्ञानं स्वं जीवात्मा तेन सह आत्मा परमात्मा ज्ञायतेऽनेनेति। अत्राऽपृथक्साहित्येन जीवात्माभेदेन परमात्मज्ञानकारणं तारकब्रह्ममन्त्रमुपदिशतीति समुदायार्थः। अथवा--सुधा कृपामृतं तद्धारया युक्तं सारं ब्रह्ममन्त्रात्मक-सारवाक्यमुच्चरन् स्वात्मज्ञानं दिशतीत्यर्थः। एतद्विशेषणेन तारकमन्त्रोपदेशकत्वज्ञापनात्तु विशेष्यगुरुत्वं सूचितम्। एवञ्चेतद्विशेषणं, पूर्वश्लोकोक्त-परमशिवस्यैव गुरुत्वात्। अत एव **ललितारहस्ये** गुरुतत्त्वनिरूपणे--

**प्रकाशनपरः। खरूपी शून्याकारः। सर्वेषामात्मा। रसविरसमितः परमरसेनाच्छादितः। अज्ञानेन यो मोहान्धकारस्तत्र हंसः सूर्यसदृशः॥ ४२॥**

**सुधाधारासारमिति। स भगवान् शिवो निर्मलमतेर्योगिनो जनस्यात्मविषयस्य**

श्रुतेः। रसो द्रव्यविशेषः पर इति प्रसिद्धस्तस्य विसरः समूहस्तद्वत् सितः शुक्लः। 'सन्दोहविसरव्रजाः'' इत्यमरः। अज्ञानमोहान्धस्य हंसः सूर्यः॥ ४२॥

सुधाधारासारमतितरां विमुञ्चन् यतेः स्वात्मज्ञानं स्वस्य शिवाभेदज्ञानं दिशति। भगवान् ऐश्वर्यादियुक्तः स परमशिवः परमहंस इत्याह--समास्ते इत्यादिना। सकलसुखसमूहस्य लहरी तरङ्गः तस्य परीवाहः। "जलोच्छ्वासाः परीवाहः"

**समास्ते सर्वंशः सकल-सुख-सन्तान-लहरी-**
**परीवाहो हंसः परम इति नाम्ना परिचितः ॥ ४३ ॥**

ख्यातोऽयं पुरुषश्रेष्ठः सर्वदात्मरतिप्रियः ।

इत्यादिना गुरुं वर्णयित्वा--

तेजोरूपा प्रिया तस्य ब्रह्मवर्त्मसुदुर्लभा ।
परमं ब्रह्म यत्पादपङ्कजद्युतिवैभवम् ॥

इत्युक्त्या शोभाधिक्येन पदपङ्कजयोः परब्रह्मरूप-परमशिवस्य हृत्पद्मादिति व्याख्यातम् (?)। तेजोरूप-गुरुप्रियायाः पादद्वयारोहणं गुरुहृदय एव न त्वन्यपुरुषस्येति। अतो यः परमशिवः स एव गुरुरिति तात्पर्यम्। निर्वाणतन्त्रे--

शिरः पद्मे महादेवस्तथैव परमो गुरुः ।
तत्समो नास्ति देवेशि पूज्यो हि भुवनत्रये ॥
तदंशं चिन्तयेद् देवि बाह्ये गुरुचतुष्टयम् ।

इति। अयं परमशिवः कर्णिकान्तस्त्रिकोणस्य बहिरधः कथ्यमानहंसः इत्यस्योपरि वर्त्तते। पूर्वोक्तकङ्का**लमालिनीतन्त्रे** –

तत्कर्णिकायां देवेशि अन्तरात्मा ततो गुरुः ।
सूर्यस्य मण्डलं तत्र चन्द्रमण्डलमेव च ॥

इत्यादिनाक्रमेण महाशङ्खिनीशक्तिपर्यन्तस्थितिमभिधाय--

तस्याऽधस्ताच्च देवेशि चन्द्रमण्डलमध्यगम् ।
त्रिकोणं तत्र सञ्चिन्त्य क्षयहीनात्मिका कला ॥
तन्मध्ये कुटिला निर्वाणाख्यसप्तदशी कला ॥

इति वचनेन चन्द्रमण्डलान्तस्त्रिकोणेऽमाकलादीनामेव स्थितेरुक्तत्वात्। गुरोस्तु तदधोऽन्तरात्मन उपरि स्थितिरुवाच।

ननु कङ्कालमालिनीवचनेऽन्तरात्मन उपरि गुरोः स्थितिरुक्ता, तत् कथं हंसस्योर्ध्वे गुरोः स्थितिरुच्यते इति चेत्। न। हंसान्तरात्मनोरेकार्थत्वात्। तथा हि **कङ्कालमालिनीतन्त्रे** गुरुध्यानं यथा—सहस्रदल-मध्यस्थमन्तरात्मानमुत्तमम्।

**परमात्मनि ज्ञानं दिशति। कीदृशम्? सुधाधारासारम् अमृतधाराया आसारमिव।**

इत्यमरः। परम इति नाम्ना समुचितः परमहंस इत्यर्थः। स च मायावच्छिन्नः। **तथाच तन्त्रान्तरे** –

तस्योपरि नादबिन्दोर्मध्ये सिंहासनोज्ज्वलम् ।
तस्मिन् निजगुरुं नित्यम् ........ ... .. ।। इत्यादि ।।

**तथान्यत्र**—हंसपीठे मन्त्रमये स्वगुरुं शिवरूपिणम् ।
अमुकानन्दनाथान्तं स्मरेत्तन्नामपूर्वकम् ।। इति ।।

**तथाऽन्नदाकल्पे**—शिरः पद्मे शुक्ले दशशतदले केसरगते
पतत्रीणां तल्पे परमशिवरूपं निजगुरुम् । इति ।।

एतेषां वचनानां पर्यालोचनया हंसान्तरात्मनोरभेदः प्रतीयते । एवं '**परमशिवरूपं निजगुरुमि**'त्यनेन परमशिव एव गुरुरिति भाव्यम् । यत् तु सहस्रदलमुपक्रम्य--

तन्मध्ये तु त्रिकोणं स्याद् विद्युदाकाररूपकम् ।
बिन्दुद्वयञ्च तन्मध्ये विसर्गरूपमव्ययम् ।
तन्मध्ये शून्यदेशे तु शिवः परमसंज्ञकः ।।

इति वचनं परमशिवस्य त्रिकोणमध्ये स्थितिबोधकम्, तत्, मतभेदेन सहस्रदल - कमलाभिन्नतत्कर्णिकाधोवर्त्त्यूर्ध्वमुख-द्वादशदल - कर्णिकान्तस्त्रिकोणे गुरुस्थितिबोधकम् । एतत् **पादुकापञ्चकस्तोत्रे** स्पष्टीकृतम् । न तूर्ध्वसहस्रदलकर्णिकात्रिकोणे गुरुस्थितिबोधकम्; मध्यत्रिकोणस्याऽधस्तन-त्रिकोणान्तरे तद्रूपेण स्थितेः । अन्यथा **कङ्कालमालिनीतन्त्रवचन**विरोधात् ।

**समास्ते सर्वेश** इति । अत्र कर्णिकायां सर्वेषामीश्वरः समास्ते इत्यर्थः । नन्वत्र परमशिवस्थितिकथनेनैव ईश्वरस्थितिरुक्ता, तत् कथं पुनः सर्वेशस्थितिरुच्यते इत्यतः सर्वेशं विशेषयति—हंस इति । अयं सर्वेशो हंसो हंस इत्यानुपूर्विक-मन्त्राकारः । तदुक्तं **प्रपञ्चसारे**--

सा तत्त्वसंज्ञा चिन्मात्रा ज्योतिषः सन्निधेस्तदा ।
विचिकीर्षुर्घनीभूता क्वचिदभ्येति बिन्दुताम् ।।

**यद्वा--अमृतधारासारं निरवधि अतितरामत्यर्थं विमुञ्चन्निति भगवतो विशेषणम् ।**

सरोरुहमधोमुखं प्रविलसत् सहस्रच्छदं
क्रमादरुणकेसरप्रकरभास्वरनिर्मलम् ।
तदन्तरपि चिन्तयेदमृतरोचिसो मण्डले ।
पुराणपुरुष पर परिगतं महामायया ।। इति ।।

कालेन भिद्यमानस्तु स बिन्दुर्भवति त्रिधा ।
बिन्दुर्दक्षिणभागश्च वामभागो विसर्गकः ॥
तेन दक्षिणवामाख्यौ भागौ पुं-स्त्रीविशेषितौ ।
स हङ्कारः पुमान् प्रोक्तः स इति प्रकृतिः स्मृता ॥
बिन्दुः पुरुष इत्युक्तो विसर्गः प्रकृतिः स्मृता ।
पुं-प्रकृत्यात्मको हंसस्तदात्मकमिदं जगत् ॥ इति ॥'

सुव्यक्तमाह **महाकालीतन्त्रे** प्रथमपटले--

सहस्रारान्तरे शून्ये दिव्यतोरणशोभिते ।
चन्द्रमण्डलमध्ये तु हंसवर्णद्वयोपरि ।
शुद्धस्फटिकसङ्काशं शुद्धक्षौमविराजितम् ॥

इत्यादि । 'अत्र हंसवर्णद्वयोपरी'ति सुव्यक्तम् । अथवा **हंसः परम** इति **नाम्ना परिचितः** हंसः इति नाम्ना परम इति नाम्ना च परिचितो विख्यात इत्यर्थः । अत एव ग्रन्थकारेणोनपञ्चाशच्छ्लोके 'केचिद्धंसाख्यमेतदि'त्यनेन हंसनामकत्वं स्वमुक्तम् । यद्वा--हंसोऽन्ते यस्य स हंसोऽन्तः, हंसोऽन्तश्चासौ परमश्चेति कर्मधारयेण शाकपार्थिवादित्वान् मध्यपदलोपे हंसःपरम इति सिद्धम् । तेन परमहंस इति नाम्ना परिचित इत्यर्थः । अतएवोक्तमागम-**कल्पद्रुमे**—

असौ परमहंसाख्यो युक्तस्थावरजङ्गमः ॥

इति । **सकलसुखसन्तानलहरीपरीवाह** इति । सर्वप्रकारसुखं सकलसुखं तस्य सन्तानो विस्तारः, स एव लहरी श्रेणी परि सर्वतोभावेनोह्यते उत्तरोत्तरकालस्थायित्वेन प्रकाश्यते यस्मिन्नित्यर्थः । ततश्च श्रेण्याकारेण सर्वव्यापक-सर्वप्रकार-सुखविशिष्ट इति यावत् । अयं हंसः परमशिवस्याबोवर्त्तीत्युक्तं प्राक् ॥ ४३ ॥

एवंभूतः सर्वेशः शिवः सर्वेषां सुखसमूहलहरीबहिर्भूतः सन् समास्ते । कीदृशः ? नाम्ना परमहंस इति परिचितः ॥ ४३ ॥

मायोपाधिविनिर्मुक्तं शुद्धमित्यभिधीयते ।
मायासम्बन्धतश्चेशो जीवोऽविद्यावशस्तथा ॥

इति वेदान्तोक्तेः ॥ ४३ ॥

सहस्रारकर्णिकायाः सर्वदेवस्थानत्व-वर्णनम्

**शिवस्थानं शैवाः परमपुरुषं वैष्णवगणा**
**लपन्तीति प्रायो हरिहरपदं केचिदपरे।**
**पदं देव्या देवीचरणयुगलाम्भोजरसिका**
**मुनीन्द्रा अप्यन्ये प्रकृतिपुरुषस्थानममलम् ॥ ४४ ॥**

एतत्कर्णिकायां सर्वदेवतामय-हंसादीनामधिष्ठानात् शैवशाक्तादि-सकलोपासकानामुपास्यदेवतास्थानमित्याह--**शिवस्थानमिति** । **शैवाः** शिवोपासका एतत्पद्मं **शिवस्थानं लपन्ति** वदन्तीत्यर्थः। **परमपुरुष** परम-पुरुषस्य विष्णोः स्थानम्, इदमर्थतद्धितप्रत्ययेन सिद्धम्। **केचिदिति**। ये हरिहरोपासकास्ते शैवा वैष्णवाश्च ते केचित्। अपरे केवलशिवविष्णू-पासकेतरा **हरिपदं लपन्ति**। अतः सर्वे शैवा वैष्णवाः केवलशिवस्थानं केवलविष्णुस्थानं न वदन्तीत्यभिप्रायेणेत्युक्तम्। **अन्ये** युगलभजनशीलाः। यद्वा—**अन्ये** हंसमन्त्रोपासका **मुनीन्द्राः प्रकृतिपुरुषस्थानं** हंसस्य प्रकृति-पुरुषोभयरूपत्वात् तदधिष्ठितस्थानं लपन्तीत्यर्थः। एतत्प्रदर्शनमात्रं तत्स्थाने सर्वदेवतामय-परमबिन्दोरधिष्ठानात्, यो तद्देवतोपासकः स तद्देवतास्थानं वदतीति बोध्यम् ॥ ४४ ॥

शिवस्थानमिति। एतत् परमशिवस्थान शैवा जनाः शिवस्थानमिति लपन्ति। वैष्णवाः परमपुरुषं परा प्रकृष्टा मा लक्ष्मीर्यस्य एवम्भूतपुरुषं वदन्ति। अपरे केचित् प्रायो हरिहरपदमिति लपन्ति। अन्ये देवीचरणयुगलानन्दरसिका देव्याः पदं लपन्ति। वस्तुतस्तु नानाप्रकारभावनाया एको निरञ्जन एवं निर्वाच्यः। अतएव "ऋजुकुटिल-नानापथजुषां नृणामेको गम्य" इति पुष्पदन्तोक्तं साधु संगच्छते ॥ ४४ ॥

शिव इत्यादि स्पष्टम्। परमपुरुषमिति भारते—

अव्यक्तं मन इत्याह शरीरं परमुच्यते।
अव्यक्तके पुरे शेते पुरुषस्तेन चोच्यते ॥ इति ॥ ४४ ॥

सहस्रार-ज्ञान-फलम्

इदं स्थानं ज्ञात्वा नियतनिजचित्तो नरवरो
न भूयात् संसारे पुनरपि न बद्धस्त्रिभुवने।

सहस्रारज्ञानफलमाह--**इदं स्थानमिति**। साङ्गोपाङ्गरूपेणैतत्स्थानज्ञानं भवतीति भावः। **नियतनिजचित्त** इति। **नियतं** तत्र निजचित्तं येनेत्यर्थः। **न भूयात् संसारे** मुक्तो भवतीति भावः। यतः क्वचिदपि न **बद्धस्त्रिभुवने** इति हेतुगर्भविशेषणम्। बद्धः पुण्यपापरूप-मायापाशबद्धः तदुक्तं **भागवते**--

कर्मणि क्रियमाणे तु गुणैरात्मनि मन्यते।
तदस्य संसृतिर्बन्धः पारतन्त्र्यञ्च तत् स्मृतम्॥

इति। **भगवद्गीतायामपि**--

स्वभावजेन कौन्तेय निबद्धः स्वेन कर्मणा॥

इति। ततश्च पुण्यपाप-भोगार्थं शरीरधारणाद् बन्धः। स च स्वर्गे पुण्यभोगार्थं पाताले पापभोगार्थं मर्त्ये उभयभोगार्थं भवतीति। तत्त्वज्ञानिनान्तु बन्ध-हेतुभूत-पुण्यपापानुदयात् सञ्चित-पुण्यपापक्षयाच्च क्वचिदपि कस्मिन् कालेऽपि त्रिभुवने स्वर्गमर्त्य-पाताले न बद्धो न शरीरी भवति। सोऽयं प्रारब्धकर्मभोगपर्यन्तं जीवन्मुक्तः सन् तिष्ठति देहान्ते मुक्तो भवतीति भावः। यस्य पुण्यपापानुदयमाह **कुलार्णवे**--

अश्वमेधशतेनापि ब्रह्महत्याशतेन च।
पुण्यपापैर्न लिप्यन्ते येषां ब्रह्म हृदि स्थितम्॥

इति। तथा **भगवद्गीतायाम्**--

नैव तस्य कृतेनार्थो नाकृतेनेह कश्चन।
न चास्य सर्वभूतेषु कश्चिदर्थव्यपाश्रयः॥

इति। 'तस्य' प्रकान्त-तत्त्वज्ञानिनः 'कृतेन' कर्मणा पुण्यं नास्ति, न चा'कृतेन' नित्यकर्मणा कश्चन प्रत्यवायोऽस्तीति **सुबोधिनी**व्याख्यानम्। सञ्चित-

**इदं स्थानमिति। इह एवं शास्त्रे एतत् स्थानं ज्ञात्वा नियतं संयतं निजचित्तं येन सः परमात्मचिन्तापरः नरवरः संसारे न भूयात् क्वचिदपि त्रिभुवने बद्धो न भवति। संयतमनसस्तस्य कृतिनः समस्ता शक्तिः स्यात्। तदेवाह--सर्वदैव कर्तु**

खगतिः खेचरः स्यात्। यद्वा खे ब्रह्मणि गतिः स्यात्। "खं ब्रह्म" इत्याद्युर-

समग्रा शक्तिः स्यान्नियममनसस्तस्य कृतिनः
सदा कर्त्तुं हर्त्तुं खगतिरपि वाणी सुविमला ॥ ४५ ॥

अमाकला-स्वरूपम्

अत्रास्ते शिशुसूर्य-सोदरकला चन्द्रस्य सा षोडशी
शुद्धा नीरज-सूक्ष्म-तन्तु-शतधाभागैकरूपा परा ।

पुण्यपाप-क्षयमाह श्रुतिः--"तस्मिन् मनसि लीने गते सङ्कल्पे दग्धे पुण्यपापे सदाशिवः शक्त्यात्मा शान्त" इति । भगवद्गीतायामपि—"ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुते तथा ।।" इति । तस्य समग्रा सर्वकार्यसाधिका शक्तिः स्यात् । शक्तिकार्य दर्शयति--**सदा कर्त्तुमिति** । अभीष्टकार्यं कर्त्तुं तथा हर्त्तुमनिष्टं कर्त्तुं संहर्त्तुं च शक्तिः, खगतिराकाशपथगमनं, **सुविमला** मधुरगद्यपद्यमयी वाणी स्यादिति सर्वत्राऽन्वयः ॥ ४५ ॥

अथाऽत्र पूर्वं 'तदन्तःशून्यं तदि'त्यनेन 'सकलशशिकला-शुद्धरूपप्रकाशमि'त्यनेन च सहस्रारकर्णिकान्तस्त्रिकोणे अमाकला-निर्वाणकला-परंबिन्दू-नामधिष्ठानं छलेनाभिहितम् । इदानीं तेषां स्वरूपेण इतरभेदकविशेषणेन च स्पष्टयितुमिच्छन्नादावमाकलास्वरूपमाह–अत्रास्त इति । **शिशुसूर्यसोदरे**-त्यनेन कलाया रक्तवर्णत्व ज्ञापितम् । **चन्द्रस्य सा** षोडशीत्यनेन इयममा-

हर्त्तुं स क्षमो भवति । खगतिराकाशगतिरपि भवति । अपि वाणी सर्वाह्लादिनी सुविमलशक्तिरूपा भवतीति ।। ४५ ।।

अत्रास्त इति । अत्रैव पद्मे चन्द्रस्य सा प्रसिद्धा अमानाम्नी षोडशी कला आस्ते । कीदृशी ? प्रातःकालीनसूर्यस्येव कला दीप्तिर्यस्याः सा तथा । शुद्धा निर्विकारत्वात् ।

निषत् ।। ४५ ।।

ऊर्ध्वशक्तिरूपां कलामाह--तत्रास्ते इत्यादिना । प्रातःसूर्यतुल्या चन्द्रस्य षोडश-कला अमा नाम्नीति यावत् ।

अमा षोडशभागेन देवि प्रोक्ता महाकला ।
संस्थिता परमा माया देहिनां देहधारिणी ।।

विद्युत्कोटि-समान - कोमल - तनूर्विद्योतिताऽधोमुखी
नित्यानन्द - परम्पराऽतिविगलत् - पीयूषधारा - धरा ॥ ४६ ॥

कलेति ज्ञापितम् । **नीरज**[सूक्ष्म]तन्तुर्मृणालसूत्रं तस्य शतभागो दीर्घकालेनेति बोध्यम् । **शुद्धा** कलङ्करहिता । **परा** चिच्छक्तिरूपा, चिच्छक्तेरेवेदं रूपम् । अत एवाक्तं **प्रभासखण्डे**--

संस्थिता परमा माया देहिनां देहधारिणी ॥

इति । अमाविशेषणं--नित्यानन्द**परम्परेति** । ब्रह्मपरम्परोत्पन्नेत्यर्थः । **अतिविगलत्पीयूषधाराधरा** अतिशयामृतस्राविणीत्यर्थः । यद्वा--**नित्यानन्दपरम्परातिविगलत्पीयूषधाराधरे**त्येकविशेषणम् । अस्यार्थः--परं बिन्दुरूपं शिवः, परा प्रकृतिः शक्तिः, आनन्देन समरसानन्देन परम्पराभ्यां शिवशक्तिभ्यामतिविगलन्ती या पीयूषधरा परामृतधारा नित्यं निरन्तरं तादृशधारामिव धारां धारयतीत्यर्थः । स्पष्टमन्यत् ॥ ४६ ॥

**मृणालतन्तोः सूक्ष्मशतभागस्येव एकरूपं यस्याः । परा प्रकृष्टा । अथवा पश्यन्ती-मध्यमा-वैखरी-समष्टिरूपा । पुनः कीदृशी ? विद्युद्दामसमानकोमलं तनुर्यस्याः । नित्योदिता, क्षयोदयरहितत्वात् । अधोमुखी । पूर्णानन्दपरम्परयाऽतिप्रकाशमाना या पीयूषधारा तदाश्रया, परम्पराक्रमेण शिव-सम्बन्धिपीयूष धाराधरेत्यर्थः ॥ ४६ ॥**

इति वचनात् । सूक्ष्मत्वात् शतधाविभक्तमृणालतन्तुभागैकरूपा क्षयोदरहितत्वान्नित्या । अधोमुखी सृष्टयन्मुखी । पूर्णानन्दसमूहो यस्याम् । या अभिगलत्पीयूषधारा तस्या धरा ।

स्वच्छन्दसंग्रहे--ब्रह्मणी त्वं परा शक्तिः ब्रह्मणोत्सङ्गगामिनी ।
द्वारं सा मोक्षमार्गस्य रोधयित्वा व्यवस्थिता ॥
तां भित्त्वा तु वरारोहे ऊर्ध्वशक्तिं परां शिवाम् ।
शक्तितत्त्वात्मिकां देवीं प्रसुप्तभुजगाकृतिम् ॥
शक्तितत्त्वं समाख्यातं भुवनैराश्रितं महत् ।
शक्ति तत्त्वात्मिकामूर्ध्वशक्तेरुपरि संस्थिताम् ॥ इति ॥

योगिनीहृदयेऽपि--शक्तौ पुनर्व्यापिकायां समनोन्मनीगोचरे ॥ इति ॥ ४६ ॥

निर्वाणकला-स्वरूपम्

**निर्वाणाख्यकला परा परतरा साऽऽस्ते तदन्तर्गता**
**केशाग्रस्य सहस्रधा-विभजितस्यैकांशरूपा सती।**
**भूतानामधिदैवतं भगवती नित्यप्रबोधोदया**
**चन्द्रार्द्धाङ्ग-समान-भङ्गुरवती सर्वार्कतुल्यप्रभा ॥ ४७ ॥**

निर्वाणकलास्वरूपमाह--**निर्वाणाख्यकलेति** । **सा परा** परतरा पराऽमा कला अस्या अपि **परतरा** श्रेष्ठा । परादिति पाठे सर्वश्रेष्ठेत्यर्थः । सा **तदन्तर्गता** अमाकलायाः क्रोडे स्थिता ; "तन्मध्ये कुटिला निर्वाणाख्यसप्तदशी कले"ति पूर्वोक्तवचनात् । केशाग्रस्येत्यादि । केशाग्रस्य सहस्रभागैकभागरूप-सूक्ष्मा सती आस्ते इत्यन्वयः । **भूतानां** सर्वप्राणिनाम**धिदैवतं** हार्दचैतन्यस्वरूपेत्यर्थः । **नित्यप्रबोधोदया** तत्त्वज्ञानसम्पादयित्री । **चन्द्रार्द्धाङ्गसमानभङ्गुरवती** चन्द्रार्द्धाङ्गरूपामाकलावत् कुटिलाकारेत्यर्थः । **सर्वार्कतुल्यप्रभा** एकदा द्वादशसूर्योदये यादृक् प्रकाशस्तादृशप्रकाशमाना रक्तवर्णा च ॥ ४७ ॥

**निर्वाणाख्येति । सा निर्वाणनाम्नी कला अमाकलान्तर्गता सती आस्ते । कीदृशी ? परात् परतराप्रकृष्टादपि प्रकृष्टतरा । सहस्रप्रकारेण विभजितस्य केशाग्रस्यैकांशरूपा । सती शोभना । पुनः कीदृशी ? भूतानामधिदेवतास्वरूपा भगवतीस्वरूपा च । नित्यः प्रबोधोदयो यस्याः सा तथा । चन्द्रलेखेन भङ्गुरं वक्राकारं वपुर्यस्याः सा तथा, द्वादशादित्यप्रभा इत्यर्थः ॥ ४७ ॥**

व्यापिनीतत्त्वं शक्तितत्त्वस्वरूपमाह--निर्वाणाख्य इत्यादिना । सूक्ष्मत्वात् सहस्रधा विभजितस्य केशभागस्यैकभागतुल्या । अर्द्धचन्द्रवत् कुटिला । सर्वार्कतुल्यप्रभा द्वादशादित्यप्रभा । परात् षोडश्याः कलायाः परतः । तदन्तर्गता चन्द्रमण्डलान्तर्गता न तु षोडश्याः कलाया अन्तर्गता । यथा **सारसमुच्चये** षोडशीं कलामभिप्रेत्य—

एतस्याः परतः स्थिता भगवती भूताधिदेवाधिपा ।
निर्वाणाख्यकलार्द्धचन्द्रकुटिला सा षोडशान्तर्गता ।
वालाग्रस्य सहस्रधा विभजितस्यैकेन भागेन या
सूक्ष्मत्वात् सदृशी त्रिलोकजननी या द्वादशार्कप्रभा ॥ इति ॥

**स्वच्छन्दसंग्रहे**—षोडशान्तमिति ख्यातं व्योमस्थानेन्दुमण्डलम् ॥ इति ॥

**तत्रैव**—आधारं भुवनानाञ्च प्रवक्ष्यामि समासतः ।
सूक्ष्मा चैव सुसूक्ष्मा च तथा चैवामृता मृता ॥
चतुर्दिक्षु स्थितास्तासां मध्यस्था व्यापिनी स्मृता ।
पञ्चवक्त्रा त्रिनेत्रा च सुतेजस्का च पञ्चमी ॥इति॥ ४७ ॥

## परंबिन्दु-स्वरूपम्

**एतस्या मध्यदेशे विलसति परमाऽपूर्वनिर्वाणशक्तिः**
**कोट्यादित्यप्रकाशा त्रिभुवनजननी कोटिभागैकरूपा ।**

परंबिन्दुस्वरूपमाह--एतस्या इति । एतस्या निर्वाणकलाया **मध्यदेशे** कोडे **अपूर्वा** सृष्टेरादावाविर्भूतत्वात् किञ्चिदपि नास्ति पूर्वं यस्यास्तादृशी **परमा** परंब्रह्मशक्तिरूपा **निर्वाणशक्तिर्विलसती**त्यर्थः । निर्वाणशक्तिं विशेषयति--**कोट्यादित्यप्रकाशे**ति । **त्रिभुवनजननी** स्वर्ग-मर्त्त्य-पातालादि-प्रपञ्चसमुदायस्योत्पत्तिस्थानरूपेत्यर्थः । यतः केशाग्रस्य **कोटिभागैकभाग-रूपा** अतोऽतिसूक्ष्मा । **निरवधिविगलत्प्रेमधाराधरे**ति । **प्रेम** आनन्दार्द्रभाव-प्रफुल्लता । सामरस्यानन्दार्द्रभावप्रफुल्लताजनिता या परामृतधारा **निरवधि** निरन्तरं विगलन्ती तादृशधारां धारयतीत्यर्थः । **सर्वेषां** जीव-भूतेति । एतस्या अंश एव जीवः । तदुक्तं यथा—

ज्वलदग्नेर्यथा देवि स्फुरन्ति विस्फुलिङ्गकाः ।
तस्याश्च्युतं परंबिन्दुर्यदा भूमौ पतत्यपि ।
तदैव सहसा देवि संज्ञायुक्तो भवत्यपि ॥

इति । 'तस्याः' शिवशक्तयात्मकपरंबिन्द्वन्तर्गतशक्तयाः । 'संज्ञायुक्तो' जीवनामा भवतीत्यर्थः । स्पष्टमन्यत् । इयं निर्वाणक्तिर्निर्वाणकलाधःस्थाने नादरूपनिबोधिकोपरि वर्त्तते ।

**एतस्या इति । एतस्याः कलाया मध्यदेशे परमापूर्वनिर्वाणशक्तिर्विलसति । कीदृशी ? कोट्यादित्य इव प्रकाशो यस्याः । त्रिभुवनजननी, सर्वेषामाधारभूतत्वात् । केशाग्रस्यापि कोटिभागैकभागरूपा, अतिसूक्ष्मत्वात्; अतो गुह्या । निरवधि विलसत्प्रेम-**

**समनापदमाह**—एतस्या इत्यादिना । परं उत्तरकालं मातीति परमा ध्वंसरहिता नित्येत्यर्थः । सूक्ष्मत्वात् केशाग्रस्य कोटिभागैकभागरूपा अतः अतिगुह्या । निरवधि विलसन्ती या अमृतधारा तस्या धरा । मुनिमनसि लसिततत्त्वबोधं शिवाभेदज्ञानं वहन्ती ।

अहन्तेदन्तयोरैक्यमिति विद्या निगद्यते ॥

इति पराप्श्चाशिका वचनाद् ब्रह्मणोऽतिनैकटचेन तथोक्तम् । तथा—

समनान्तर्वरारोहे पाशजालमनन्तकम् ।

**केशाग्रस्याऽतिसूक्ष्मा निरवधि विगलत्प्रेमधाराधरा सा**
**सर्वेषां जीवभूता मुनिमनसि मुदा तत्त्वबोधं वहन्ती ॥ ४८ ॥**

तद् यथा—निर्वाणाभ्य(ख्या)न्तरगता वह्निरूपा निबोधिका ।
नादोऽव्यक्तस्तदुपरि कोटचादित्यसमप्रभा ।
निर्वाणशक्तिः परमा सर्वेषां योनिरूपिणी ॥
अस्यां शक्तौ शिवो ज्ञेयो निर्विकारो निरञ्जनः ।
अत्रैव कुण्डली शक्तिर्विहरेत् परमात्मना ॥

इति । 'निबोधिका'ऽव्यक्तनादात्मिका वह्निरूपा । तथा हि नादस्य त्रिविधावस्था । "तमोगुणाधिक्येन केवलध्वन्यात्मकोऽव्यक्तनादः । रज-आधिक्येन किञ्चिद्वर्णबद्धन्यासात्मकः । सत्त्वाधिक्येन बिन्दुरूपः" इति राघवभट्टः । ततश्च नाद-बिन्दु-निबोधिका अर्केन्दु-वह्निरूपाः, "संज्ञानेच्छाक्रियात्मानो वह्नीन्द्वर्कस्वरूपिणः ।" इति शारदावचनात् । तस्मादत्र बह्निरूप-निबोधिकोपरि स्थितिकथनात् सूर्यचन्द्रवह्निमण्डलोपरि निर्वाणशक्तेः स्थितिरिति सुधीभिर्भाव्यम् । व्यक्तमाह **कुलार्णवोक्त-परं**ब्रह्मध्याने—
बिन्दुरूपं परं ब्रह्म सहस्रदल-संस्थितम् ।
इत्युपक्रम्य—कर्णिकान्तस्त्रिकोणान्तर्मण्डलत्रयमण्डितम् ॥
इति । 'मण्डलत्रयेण' सूर्यचन्द्रवह्निमण्डलेन मण्डितमित्यर्थः । इयं निर्वाणशक्तिः परबिन्दुरूपेति स्फुटीकरिष्यामः ॥ ४८ ॥

**धाराधरा सा शक्तिः सर्वेषां जीवभूता सती मुदा हर्षेण मुनिमनसि तत्त्वज्ञानं वहन्तीति ॥ ४८ ॥**

इति वचनात् अत्रापि पाशजालम् । एतस्या निर्वाणकलाया मध्यदेशे इति । समीप्ये सप्तमी । तथा च मध्यदेशसमीपे किञ्चिदुपरीत्यर्थः तथाच **स्वच्छन्दसंग्रहे** —
चिदानन्दस्वरूपा तु परा शक्तिस्तदूर्ध्वतः ।
समना नाम सा शक्तिः सर्वकारणकारणम् ॥
सर्वाण्डा[न्ता]नि बिभर्त्तीयं शिवेन समधिष्ठिता ।
अत्र रूढः स भगवान् शिवः परमकारणम् ।
शिवः सर्वस्य कर्तेयं शक्तिः कारणमुच्यते ॥ इति ॥ ४८ ॥

निर्वाणशक्तिमध्यस्थ-परब्रह्म-स्थानम्

**तस्या मध्यान्तराले शिवपदममलं शाश्वतं योगिगम्यं**
**नित्यानन्दाभिधानं सकलसुखमयं शुद्धबोधस्वरूपम् ।**

निर्वाणशक्तिमध्ये परब्रह्मस्थानमाह---**तस्या मध्यान्तराल** इति । **तस्याः** परंबिन्दुरूप-निर्वाणशक्तचा मध्यान्तराले मध्यस्थशून्ये **अमलं** मायामल-रहितं **शिवपदं** ब्रह्मस्थानं **लपन्ति**, तत्त्वज्ञा इति शेषः । **योगिगम्यं** सूक्ष्माति-सूक्ष्मतमत्वात् वाङ्मनसोरगोचरत्वाच्च योगिनां ज्ञानमात्रगम्यमिति भावः । केचिद् वैदान्तिका ब्रह्माभिधानं ब्रह्मेति नाम्ना लपन्ति । अथवा हंसनामकमिति यथाश्रुतार्थः । अन्ये सुकृतिनः **किमपि** अनिर्वचनीयमात्म-प्रबोधम् आत्मसाक्षात्कारस्थानं लपन्तीत्यर्थः । **मोक्षमिति ।** मुच्यते माया-प्रपञ्चाद् बहिर्भूयते यत्र तन्मोक्षरूपमित्यर्थः ।

अत्रेदमवधीयताम्---सहस्रदलकर्णिकान्तस्त्रिकोणे मायाबन्धन-च्छादित-प्रकृति-पुरुषात्मक-परंबिन्दुः । तदुक्तम्---

सत्यलोके निराकारा महाज्योतिःस्वरूपिणी ।
माययाच्छादितात्मानं चणकाकाररूपिणी ॥
हस्त-पादादि-रहिता चन्द्र-सूर्याग्नि-रूपिणी ।
मायाबन्धनमुत्सृज्य द्विधा भित्वा यदोन्मुखी ॥
शिवशक्तिविभागेन जायते सृष्टिकल्पना ॥

**अस्या इति । अस्याः शक्तेर्मध्यदेशान्तराले निर्मलं शिवपदमास्ते । नित्यानन्दं शाश्वतम्, अत्यन्तासक्तत्वात् । योगि-प्राप्यम्, अत्यन्तज्ञानसाध्यत्वात् सकलानां सुख-**

उन्मनीपदमाह--तस्या मध्यान्तराले इत्यादिना । तस्याः समनाया मध्यान्त-राले । अत्र समीप्ये सप्तमी । शिवतनुप्राप्तिस्थानम् उन्मनीति यावत् । **स्वच्छन्द-संग्रहे**-- शिवतनुं समाख्यातं तदूर्ध्वं शक्तितनुतः ॥ इति ॥

तथा तत्रैव--शिवशक्तिद्वयञ्चैव शिवतनुं प्रकीर्त्तितम् ।

सूक्ष्मार्थशक्तचवच्छिन्नं शिवतनुमित्यर्थः । तथाच तत्रैव--

यावत् सा समना शक्तिस्तदूर्ध्वे उन्मनी स्मृता ।
नात्र कालकलाभावः[नं] न तत्वं न च देवताः ॥

**केचिद् ब्रह्माभिधानं पदमिति सुधियो वैष्णवं तल्लपन्ति**
**केचिद्धंसाख्यमेतत् किमपि सुकृतिनो मोक्षमात्मप्रबोधम् ॥ ४९ ॥**

इति । 'सत्यलोके' सहस्रारे इत्यर्थः । तथा—

निर्गुणो बिन्दुरूपश्च सिद्धिकारणमेव हि ।
केचिद् वदन्ति स ब्रह्मा कैश्चिद् विष्णुः प्रकथ्यते ॥
कैश्चिद् रुद्रो महापूर्ण एको देवो निरञ्जनः ।
आद्याशक्तियुतो देवश्चणकाकाररूपकः ॥

इति । अस्य बिन्दोः केशाग्र-कोटिभागैकभागरूप-सूक्ष्मतेजोंऽशो निर्वाण-शक्तिर्मध्यशून्यभागो ब्रह्मपदमिति ग्रन्थकारमतम् । तथाऽन्यत्र—

तन्मध्ये परबिन्दुञ्च सृष्टिस्थितिलयात्मकम् ।
शून्यरूपं शिवः साक्षाद् बिन्दुः परमकुण्डली ॥
तथा—वृत्तं कुण्डलिनीशक्तिर्गुणत्रयसमन्वितम् ।
शून्यभागं महेशानि शिवशक्तयात्मकं प्रिये ॥ इति ।

अयं बिन्दुः सर्वकारणरूप ईश्वर इति केचित् । पौराणिकास्तु महा-विष्णुरूपोऽयमिति वदन्ती । अन्ये तु ब्रह्मपुरुषोऽयम् । तदाह—

नाहो न रात्रिर्न वियन्न पृथ्वी नासीत् तमो ज्योतिरभून्नवान्यत् ।
श्रोत्रादिबुद्धयाऽनुपलभ्यमेकं प्राधानिकं ब्रह्म पुमांस्तदासीत् ॥इति॥
निर्गुणः सगुणश्चेति शिवो ज्ञेयः सनातनः ।
निर्गुणः प्रकृतेरन्यः सगुणः सकलः स्मृतः ॥

**मयम् अथवा सकलं कलया सह वर्त्तमानं तत् सुखमयञ्चेति तत् तथा । शुद्धबुद्धीनां प्रबोधो ज्ञानं यस्मात् । एतत् पदं केचित् परंब्रह्माभिधानमिति वदन्ति । अन्ये सुधियो**

सुनिर्वाणं परं शुद्धं रुद्रवक्त्रं तदुच्यते ।
शिवशक्तिरिति ख्याता निर्विकल्पा निरञ्जना ॥ इति ॥

"तत्त्वातीतं वरारोहे" —इत्यादि अग्रे लिखिष्यते । मनः सहितत्वात् समना । "यतो वाचो निवर्त्तन्ते अप्राप्य मनसा सह" इति श्रुत्या मनोऽतीतत्वादुन्मनीत्य-मृतानन्दस्वामिनः ।

शक्तिमध्यगतोः नादः समनान्तं प्रसर्पति ॥

इति शारदावचनात् तन्मध्येऽयं सगुणब्रह्मरूपः। वस्तुतस्त्वेकमेव मतभेदान्नानाविधनाम्ना गायन्तीत्यलं विस्तरेण।

**तदयं महावाक्यार्थनिर्णयः।** सुषुम्णानाड्यूर्ध्वे सहस्रदलपद्मं शुक्लवर्णमधोमुखं रक्तकिञ्जल्कशोभितमकारादि-लकारान्त-पञ्चाशद्वर्णैः शुक्लाभैर्विंशत्यावर्त्तनेन सहस्रसंख्याकैर्युक्तं सहस्रदलम्; एतत्कर्णिकायां हंसः। ततः परमशिवरूप-गुरुः। ततः सूर्यमण्डलं चन्द्रमण्डलम्। ततो महावायुः। ततो ब्रह्मरन्ध्रम्। ततो महाशङ्खिनी। चन्दमण्डले विद्युदाकारत्रिकोणम्। तन्मध्ये मृणालसूत्र-शतभागैकभागरूप-सूक्ष्मा चन्द्रस्य षोडशी कलाऽधोमुखी रक्तवर्णा। तत्क्रोडे केशाग्रसहस्रभागैकभागरूप-सूक्ष्मा निर्वाणकला रक्तवर्णाऽधोमुखी। तदधस्तादव्यक्तनादात्मक-निबोधिकाख्य-वह्निः। तदुपरि निर्वाणकलाक्रोडे परंबिन्दुः शिवशक्तयात्मकः। अस्य केशाग्रकोटिभागैकभागरूपसूक्ष्मतेजो हंसरूपा निर्वाणशक्तिः। अस्यां हंसो जीवः। बिन्दोर्मध्ये शून्यं ब्रह्मपदमिति।

**आगमकल्पद्रुमपञ्चशाखादिमते** सहस्रदलपद्मकर्णिकामध्ये चन्द्रमण्डले अकथादित्रिकोणम्। तन्मध्ये त्रिकोणसमीपे त्रिबिन्दुः। तस्याधो बिन्दुर्हकारः पुरुषात्मकः। ऊर्ध्वबिन्दुद्वयरूप-विसर्गः सकारः प्रकृतिरूपः। एतदुभयात्मको हंसस्त्रिबिन्दुरूपेण प्रकाशते। तन्मध्ये अमाकला। तत्क्रोडे निर्वाणशक्तिः। तस्या मध्ये शून्यं परं ब्रह्म इति।

**वैष्णवं पदं लपन्ति। केचित् सुधियो मोक्षं मोक्षस्वरूपं हंसाख्यमिति वदन्ति। एतेन ब्रह्मविष्णुशिवशक्तिस्वरूपं तत् पदमित्यायातम्, हंसाख्यत्वात्। तथाच ज्ञानार्णवे—**

> **हकारे बिन्दुरूपेण ब्रह्माणं विद्धि पार्वति।**
> **सकारे सर्गबिन्दुभ्यां हरिश्चाहं महेश्वरि।**
> **अविनाभावसम्बन्धाल्लोके हरिहराविति॥**

इति **स्वच्छन्दसंग्रहात्** नात्र कालकलांशस्य भानम्। परमकुलपदमिति परमुम्मन्याः परं अकुलपदम् अकुलाख्यपरशिवात्मकपदं विश्वस्य विश्रामस्थानत्वात्। पदमिति अमलं सत्त्वादित्रिगुणमु(यु)क्तम्। शाश्वतं नित्यम्। योगेन प्राप्तं नित्यानन्दमभिधानं यस्य तत्। "नित्यं विज्ञानमानन्दं ब्रह्म" इति श्रुतेः। शुद्धबोधस्य शुद्धबोधस्य प्रकाशो यस्मात्। तथाच टीकाकारधृततन्त्रे "उन्मन्यन्ते परशिवः" इति। **स्वच्छन्दसंग्रहे** उन्मनीमभिधाय—तत्त्वातीतं वरारोहे वाङ्मनो नैव गोचरम्। "यतो वाचो निवर्त्तन्ते" इत्यादि श्रुतेः। तत्त्वं "तत्त्वमसि" इति श्रुतेः।

> स्वाभाविके परे धाम्नि विवरं तत्त्वसंज्ञकम्॥

तद् यथा--अथ शुभसहस्रारे पूर्णेन्दुमध्यविस्फुरत् ।
त्रिकोणं तडिदाभासमकथादिहलक्षयुक् ।।
तदन्तरे परं शून्यं विसर्गाधो व्यवस्थितम् ।
बालादित्यप्रभा तत्र कला षोडश्यधोमुखी ।।
स्रवन्ती सौधधारां वै चन्द्रार्द्धाङ्गविभङ्गुरा ।
तदन्तरे परा शक्तिः कोटयादित्यप्रभामयी ।।
बिसतन्तुसहस्रांशभागरूपा चिदात्मिका ।
तदन्तः सच्चिदानन्दो वेदादीतो निरञ्जनः ।।
बिन्दुः पुरुष इत्युक्तो विसर्गः प्रकृतिर्मता ।
पुं-प्रकृत्यात्मको हंसः स्वप्रकाशेन भासते ।। इति ।।

एतन्मतमाश्रित्य परंबिन्दोरूर्ध्वे हंसघटकविसर्गोपरि गुरुस्थितिरिति वदन्ति । तन्न समीचीनम् । **निर्वाणतन्त्रे** परंबिन्दुरूप-शक्तिसमीपे तस्याः पूजाध्यानपरायणस्य निजगुरोः स्थितिकथनात् । पूजार्थोपवेशनं त्वधःस्थले सम्मुख एव युज्यते, न तूर्ध्वस्थले पश्चाद्देशे । तद्यथा **निर्वाणे**--

सत्यलोके बीजकोषे चिन्तामणिगृहे शुभे ।
ध्यायेन् निरञ्जनां देवीं रत्नसिंहासनोपरि ।
तस्याऽन्तिके निजगुरुं पूजाध्यानपरायणम् ।।

इत्यादि । किञ्च पूर्वप्रदर्शिते **महाकालीतन्त्रवचने** हंसवर्णद्वयोपरि गुरु-स्थितिः सुव्यक्ता । अत्र मूलादिसहस्रदलपर्यन्तोक्तप्रकार-विपरीतप्रकार-बोधकानि तथा तदतिरिक्तबोधकानि च यानि वचनानि दृश्यन्ते, तानि मतभेदेन प्रकारान्तरविधायकानीति बोध्यम् ।। इति सप्तमप्रकरणम् ।।४९।।

**स्वरं विना उच्चरितुमशक्यत्वात् शक्तिरपि तत्र स्फुटा । कीदृशम् ? आत्मनः परमात्मनः प्रबोधो यस्मात् तत् तथेति ।। ४६ ।।**

इति **शिवतन्त्रात्** । श्रीमते--

अकुलेश्वरदेवस्य सम्बन्धः प्रथमः स्थितः ।
रूपातीतः परो बिन्दुः शक्त्या वेष्टितभास्वरः ।
अतो नादो विरोधी च अर्द्धचन्द्रसमुत्क्रमात् ।।
एतत् तु पञ्चमप्रोक्तं ज्ञानरत्नं महोदयम् ।
तत्र तद्दक्षिणं षट्कमाज्ञापूर्वं कुलोद्भवम् ।। इति ।। ४९ ।।

कुण्डलिन्युत्थापनप्रकारः

**हूङ्कारेणैव देवीं यम-नियम-समभ्यास-शीलः सुशीलो**
**ज्ञात्वा श्रीनाथवक्त्रात् क्रममिति च महामोक्षवर्त्मप्रकाशम् ।**

अथेदानीं सहस्रदलपर्यन्तं चक्रं निरूप्य तत्र कुण्डलिनीयोगं कथयिष्यन्नादौ कुण्डलिन्युत्थापनप्रकारमाह—**हूङ्कारेणेति** । अस्यायमर्थः--**स** योगित्वेन प्रसिद्धो जनः **गुरुवक्त्रात् क्रमं** ज्ञात्वा येन क्रमेण प्रकारेण हृदाद्याकुञ्चनादि पवनदहनयोराक्रमणं कुण्डलिन्युत्थापनादिकं भवति, तत्प्रकारक्रमं श्रीनाथस्य गुरोर्वक्त्राज् ज्ञात्वा **पवनदहनयोराक्रमेण** हूमिति कूर्चबीजोच्चारणेन च कुण्डलिनीमुत्थाप्य तल्लिङ्गरूपं भित्त्वा स्वयम्भुलिङ्गच्छिद्रं प्रस्फोटयित्वा तां देवीं कुण्डलिनीं **ब्रह्मद्वारस्य मध्ये** चित्रिणीनाडीमुखमध्ये **विरचयति** प्रापयतीत्यर्थः । हूङ्कारेणेति ।

ततो हंसमुपस्मृत्य शनैराकुञ्चयेद् गुदम् ।

**इत्याद्यागमकल्पद्रुमवचने** हंसमन्त्रस्योच्चारणे कुण्डलिनीचालनविधानात् । "हूं हंस इति मन्त्रः कुण्डलिनीचालने विनियुक्त" इति ललितारहस्यकारः । किन्तु हंसस्मरणपूर्वकतदाकुञ्चनविधानाद् हंस इति मनुमनुस्मृत्य जीवात्मानं हृदयस्थं दीपकलिकाकारं मूलाधारमानीय तेन सार्द्धं कुण्डलिनीं चालयेदित्यभिप्रायः । अत एवा**गमकल्पद्रुमे**—

आरोप्यारोप्य शक्तिं कमलजनिलयादात्मना साधकेन्द्रः ।

इति । परवचने 'आत्मना' जीवात्मना सार्द्धं चालनमुक्तम् । **कालीकुलामृतेऽपि**--

हृदयाद्धंसमनुना नीत्वा जीवं मुखाम्बुजे ।
हूङ्कारेण समुत्थाप्य कुण्डलीं परदेवताम् ॥

हूङ्कारेणेति । इदानीं भूतशुद्धिः कथ्यते । तां देवीं कुण्डलिनीं यमनियमसमभ्यासशीलः स जनः श्रीनाथवक्त्राद् गुरुमुखात् महामोक्षपथप्रकाशं क्रमञ्च ज्ञात्वा हूङ्कारेण तत् स्वयम्भूलिङ्गं भित्वा ब्रह्मद्वारस्य मध्ये विरचयति । जनः कीदृशः ? शोभनं शीलं

यमनियमसमभ्यासशीलः [ नियतनिजचित्त ] इति । **गौतमीये**—

अहिंसा सत्यमस्तेयं ब्रह्मचर्यं दयार्जवम् ।
क्षमा धृतिर्मिताहारः शौचञ्चेति यमा दश ॥

**ब्रह्मद्वारस्य मध्ये विरचयति स तां शुद्ध-बुद्धि-स्वभावो**
**भित्त्वा तल्लिङ्गरूपं पवन-दहनयोराक्रमेणैव गुप्तम् ॥ ५० ॥**

इति । **कङ्कालमालिनीतन्त्रे**—

आकृष्य प्रणवेनैव जीवात्मानं नगेन्द्रजे ।
कुण्डलिन्या सह प्राणं गन्धमादाय साधकः ।
सोऽहन्तु मनुना देवीं स्वाधिष्ठाने प्रवेशयेत् ॥

इति । ततश्च हंसेन प्रणवेन वा हृदयाज्जीवं मूलाधारमानीय केवलकूर्च-बीजेन कुण्डलिनीमुत्थापयेदिति सुधीभिर्भाव्यम् ।

स जनः कीदृशः ? **यमनियमसमभ्यासशीलः** । यम-नियम इति योग-प्रतिबन्धककामक्रोधादिनाशक - तदनुकूलशरीरान्तर्वायुरेचन - मनःस्थैर्यादि-साधकाङ्गयोगप्रदर्शकम् । तैरेव प्रकृतयोगनिष्पत्तेः, न तु केवल-यमनियम-मात्रेण । अत एव ग्रन्थकृता चतुःपञ्चाशच्छ्लोके 'योगि यमाद्यैर्युत' इत्यत्र 'यमाद्यै'रिति बहुवचनान्तत्वेन प्रयुक्तम् । अयन्तु यमाद्यभ्यासः कामाद्या-कुलितचित्तानामेव । यदि तु जन्मान्तरीयादृष्टवशात् स्वभावतो वा क्रोध-कामादिरहितस्तदा तद्योगाभ्यासं विनापि प्रकृतयोगे शक्तो भवतीति बोध्यम् ।

**सुशील** इति । यतो यमाद्यभ्यासशीलः, अत एव सुशील इति । **श्रीनाथवक्त्रादिति** । गुरूपदेशं विना क्रमज्ञानं न भवतीति भावः । अत एवोक्तम्—

गुरूपदेशतो ज्ञेयं न तु शास्त्रार्थकोटिभिः ॥ इति ॥

**यस्य स तथा । शुद्धबुद्धेर्हेतुः प्रभावो यस्य स तथा । नन्वत्र सुप्तां तां कीदृक्प्रकारेणा-क्रम्य नयति । इत्याह पवनदहन योरिति । तयोराक्रमणेन; अर्थात् पवनयोगेन दहनस्य उर्ध्वगतिस्ततः प्रबुद्धा सर्पाकृतिः सा ऊर्ध्वगतिर्भवत्येव । तथाच—**

जपः सन्तोष आस्तिक्यं दानं देवस्य पूजनम् ।
सिद्धान्तश्रवणञ्चैव ह्रीर्मतिश्च तपो हुतम् ।
दशैते नियमाः प्रोक्ता योगशास्त्रविशारदैः ॥ इति ॥

क्रमं विशेषयति—**महामोक्षवर्त्मप्रकाशमिति**। मोक्षवर्त्म चित्रिणी-नाडीमध्यच्छिद्ररूपवर्त्म तस्य प्रकाशः प्रस्फोटनं येन क्रमेणेत्यर्थः। **शुद्ध-बुद्धिस्वभाव** इति। शुद्धबुद्धौ ब्रह्मणि स्वभावो यस्य अथवा शुद्धबुद्ध्या स्वस्मिन् आत्मनि भावो यस्येत्यर्थः। गुप्तं यथा स्यात् तथेति क्रिया-विशेषणम्। अथवा तल्लिङ्गरूपं गुप्तं मुद्रितमुखत्वेनाऽव्यक्तम्, अप्रकाशित-मुखमिति यावत्। अथात्र कुण्डलिन्युत्थापनप्रकारं विशेषेणाह **आगमकल्प-द्रुम-पञ्चमशाखायाम्**—

पद्मासने निवेश्याऽङ्के ततः पाणिद्वयं न्यसेत्।
ततो हंसमुपस्मृत्य शनैः शङ्कोचयेद् गुरुम्॥
वायुमुत्तोलयेत् तेन वर्त्मना स पुनः पुनः।
उत्तोल्य भेदयेच्चक्रं तस्याऽनुष्ठानमुच्यते॥
मूलाधारसरोजे तु त्रिकोणमतिसुन्दरम्।
कामो भवति तन्मध्ये बालार्ककोटिसन्निभम्।
तदूर्ध्वे कुण्डलीशक्ति स्वयम्भूलिङ्गवेष्टिनीम्।
तथा—कामाग्निना कूर्चयोगात् परंहंसाभिलाषिणीम्॥ इति॥

तथा भूतशुद्धौ—

हृदिस्थां कुञ्चिकां कृत्वा गत्वा तदुपरे शिवे।
कण्ठाद्यं समनुप्राप्य द्वारं कुञ्चिकया हठात्॥

मूलाधारे स्मरेद्दिव्यं त्रिकोणं तेजसो निधिम्।
तस्याग्निरेखामानीय अध ऊर्ध्वव्यवस्थिताम्॥

इत्यूर्ध्वाम्नायवचनात्।

प्रज्वलद्भुजगाकारा पद्मतन्तुनिभा शुभा।
सर्वेषां जननी प्रोक्ता सूर्यकोटिसमप्रभा॥

तथाच एतद्द्वयाभ्यासशीलः श्रीनाथवक्त्राद् गुरुवक्त्राद् मोक्षवर्त्मप्रकाशं क्रमं ज्ञात्वा हुङ्कारेण मूलाधारस्थितवह्निपवनयोराक्रमेण तप्तां कुण्डलिनीं कृत्वा ब्रह्मद्वारस्य

उद्घाटच परमेशानि पवनेन प्रदीपयेत् ।
हुताशनप्रतप्तां तु तापेन भृशमूर्ध्वताम् ॥
प्रसुप्तां नागिनीं लिङ्गे योनिवक्त्रे प्रबोधयेत् ।
ततः प्रचालयेद् वायुं यावन्नाडचन्तरेषु च ॥
गुरुदिष्टेन मार्गेण सकृद् वा कुम्भकेन वै ।
आक्रम्यैवं ततो जीवं सुगुप्तेन पथा भृशम् ॥
ऊर्ध्वोच्छासैरूर्ध्वमुखान् कारयेत् पङ्कजान् शिवे ।
प्रोबोधयन् शनैर्भानुं मेरुश्रृङ्गं नयेत् सुधीः ॥ इति ॥

तदयं सकलवचन-पर्यालोचनासिद्धः क्रमोऽवधीयताम् । योगी जनः विहितासने उपविश्य स्वाङ्के उत्तानौ करौ कृत्वा खेचरीमुद्रया स्थिरचित्तः सन् देहान्तर्वायुमापूर्य कुम्भकं कृत्वा हृदयमाकुञ्चयेत् । तेन ऊर्ध्वोच्छ्वासोत्सरणनिवृत्तिः । ततो देहान्तरस्थ-वायोरुदरकण्ठादिव्यापकतया नाडीच्छिद्रप्रस्फोटनेनाऽधोगमनमनुभूय गुदमाकुञ्चयाऽपानं संरुध्य वायुमुत्तोल्य मूलाधारकमलकर्णिकान्तस्त्रिकोणस्थकामं वाममावर्त्तयेत् । तेनोद्दीप्तेन तत्र स्थितेन कामाग्निनोत्तप्तां कुण्डलिनीं हूङ्कारेण चेतयित्वा परमशिवसामरस्याभिलाषिणीं तां स्वम्भूलिङ्गमुखं स्फोटयित्वा तच्छिद्रेण चित्रिणीनाडीमुखमध्यं प्रापयेदिति समुदितार्थः ॥ ५० ॥

**प्रबुध्य वह्नियोगेन मनसामन्धता हता ।**
**सूचीव गुणमादाय व्रजत्यूध्वं सुषुम्णया ॥**
**उद्घाटयेत् कवाटन्तु यथा कुञ्चिकया हठात् ।**
**कुण्डलिन्या तथा योगी मोक्षद्वारं प्रभेदयेत् ॥**

**इति गोरक्षसंहितोक्तत्वाच्च ॥ ५० ॥**

मध्ये तां रचयति । **रुद्रयामले—**

हुङ्कारेण समुत्थाप्य शक्ति स्वाधारसंस्थिताम् ॥ इति ॥ ५० ॥

कुण्डलिनीयोगप्रकारः

**भित्त्वा लिङ्गत्रयं तत् परमरसशिवे सूक्ष्मधाम्नि प्रदीपे**
**सा देवी शुद्धसत्त्वा तडिदिव विलसत्तन्तुरूपस्वरूपा ।**

इदानीं कुण्डलिनीयोगप्रकारमाह--**भित्त्वेति** । संरुद्धवर्त्मनि वर्त्मकरणं भेदः । अस्यार्थः--सा देवी कुण्डलिनी **तल्लिङ्गत्रयं** स्वयम्भू-बाणेतराख्य-लिङ्गत्रयं **भित्त्वा** तैर्लिङ्गैः संरुद्धवर्त्मनि वर्त्म कृत्वा ब्रह्माख्यायाः शिरायाः चित्रिणीनाडीसम्बन्धि तद्ग्रथितमिति यावत् । ग्रथितं **तत् सकलसरसिजं** प्राप्य तत्र **देदीप्यते**, ततः **सूक्ष्मतालक्षणेन** सूक्ष्मभावस्वरूपेण सूक्ष्मभावेनेति यावत् । तेन भावेन **विलसत्तन्तुरूपस्वरूपा** सती **परमरस-शिवे** परमरसः परमानन्दस्तन्मये शिवे सहस्रदलकर्णिकास्थ परंबिन्दुरूपशिव-समीपे अर्थाद् गत्वा**मोक्षाख्यानन्दरूपम्** अर्थात् साधकस्य नित्यानन्दरूप-मुक्ति सहसा घटयतीत्यर्थः । लिङ्गत्रयमिति । तत् पूर्वोक्तं [लिङ्गत्रयं] षट्चक्रं पञ्चशिवञ्चेति चतुर्दशग्रन्थीन् भित्त्वेति बोध्यम् । तदुक्तं **शाक्तानन्दतरङ्गिण्याम्**--

गच्छन्तीं ब्रह्मरन्ध्रेण भित्त्वा ग्रन्थींश्चतुर्दश ॥

इति । तत्र लिङ्गशिवयोर्भेदप्रकारमाह **स्वतन्त्रतन्त्रे**--

षट्चक्रस्थान् शिवान् भित्त्वा देवी गच्छति निष्कलम् ।
चक्राधिष्ठानतो रूपं धृत्वा तत्तन्मनोहरम् ॥
मोहयित्वा　महेशानमानन्दाप्लुतविग्रहम् ।
रमित्वा तत्र तत्रैव यावत् प्राप्नोति शाश्वतम् ।
मोहितः परया यस्मात् तस्माद् भिन्न उदाहृतः ॥

तथा **मायातन्त्रे**--

भित्त्वा लिङ्गत्रयं देवी शक्तिमार्गेण गच्छति ।
तत्तद्रूपेण चक्रेषु निष्कलं प्राप्य निर्वृता ॥

इति । 'तत्तद्रूपेणे'ति वैखरी-मध्यमा-पश्यन्ती-भावेन । तदुक्तम्--

प्रथमे वैखरीभावो मध्यमा हृदये स्थिता ।
भ्रूमध्ये पश्यन्तीभावः पराभावस्तु बिन्दुनि ॥

भित्त्वेति । इदानीं तस्या गतिप्रकारमाह । सा देवी तल्लिङ्गत्रयं स्वयम्भू-बाणेत-राख्यलिङ्गान् भित्त्वा ब्रह्माख्यनाड्याः सकलसरसिजान् प्राप्य परमरसशिवे देदीप्यते

ततः सा प्रबोधिता तल्लिङ्गत्रयं स्वयम्भूबाणेतरलिङ्गत्रयं भित्त्वा भेदं

**ब्रह्माख्यायाः शिरायाः सकलसरसिजं प्राप्य देदीप्यते तन्**
**मोक्षाख्यानन्दरूपं घटयति सहसा सूक्ष्मतालक्षणेन ॥५१॥**

अस्यार्थः—परा पश्यन्ती मध्यमा वैखरीति चतस्रः शब्दोत्पादिकाः शक्तयः कुण्डलिन्यभेदरूपाः। ततः सहस्रारे कुण्डलिनीगमनकाले प्रथमे स्वयम्भूलिङ्गसमीपे वैखरीभावेन तं मोहयित्वा एवं हृदये बाणलिङ्गं मध्यमाभावेन भ्रूमध्ये इतरलिङ्गं पश्यन्तीभावेन मोहयित्वा परंबिन्दुनिकटे पराभावमाप्नोतीत्यर्थः। **चक्रभेदप्रकारमाह**—

चित्रिणीविवरे रक्तमेदपङ्कसमुद्भवान्।
सव्यदक्षपार्श्वयोश्च नालस्थान् वाहयेच्च तान्॥
पद्मान् नाडीमध्यवर्त्मरोधितान् परमेश्वरि।
नालं वामं विशेत् पद्मं तेन भेदः प्रजायते॥
यथा शिल्पवतीं रश्मिवाहीं लालयति प्रभुः।
भेदयित्वा तथा चक्रं षड् जीवेन नयेच्च ताम्॥ इति॥

तथा—षट्चक्रसन्धिमार्गेण सुषुम्णावर्त्मना तथा।
हंसेन मनुना देवीं सहस्रारं समानयेत्॥

इति। परमरस-शिवं विशेषयति—**सूक्ष्मधाम्नः प्रदीप इति**। सूक्ष्मधाम निर्वाणशक्त्यात्मक-परंबिन्दोस्तेजो हंसस्तन्मध्ये दीप्यमाने इत्यर्थः। देवीं विशेषयति—**शुद्धसत्त्वेति**। सत्त्वाऽतिसत्त्व-परमसत्त्व-शुद्धसत्त्व-विशुद्धसत्त्वेति पञ्चविधं शरीरावच्छिन्नचैतन्यमुत्तरोत्तरप्रकृष्टं तत्रेयं शुद्धसत्त्वा तुरीयेति यावत्। केन प्रकारेण मोक्षाख्यानन्दं घटयतीत्याकाङ्क्षायामुच्यते। तत्र परंबिन्दौ तां कुण्डलिनीं विलाप्य केषांचित् साधकानां शिवात्मनोरभेदेन तद्बिन्दुचिन्तनेन केषांचित् तथा शक्त्यात्मकचिन्तनेन केषांचित् परमपुरुषमयचिन्तनेन तथा केषांचित् केवलशिवशक्तिसामरस्यचिन्तनेन सा देवी मोक्षं घटयतीति। तदुक्तं **मायातन्त्रे**—

ऐक्यं जीवात्मनोराहुर्योगं योगविशारदाः।
शिवात्मनोरभेदेन प्रतिपत्तिं परे विदुः॥

**भृशं दीप्तं कुर्वती सहसा सूक्ष्मतालक्षणेन मोक्षानन्दरसं घटयति च अर्थात् शिव-**

**कृत्वा तच्छिद्रेण ब्रह्माखयाया इति ल्यब्लोपे पञ्चमी ब्रह्मनाडीमारुह्य सकलसदनं**

शक्त्यात्मकं तथा ज्ञानं जगुरागमवादिनः ।
पुराणपुरुषस्यान्ये ज्ञानमाहुर्विशारदाः ॥
शिवशक्त्योः सामरस्यात्मकं प्रकृतिनोऽपरे ॥ इति ॥

'ऐक्यं जीवात्मनो'रिति समाधिविषयम् । 'योग'मिति । युज्यते परमात्मना एकीभूयते अनेनाऽसौ योगः, तं योगमित्यर्थः । समाधिमुक्त्वा ध्याने योगभेदमाह—'शिवात्मनो'रित्यादि । **'सामरस्यात्मकमि'ति** ।

स्त्रीपुंयोगे तु यत् सौख्यं सामरस्यं प्रकीर्त्तितम् ।

इति । तच्चिन्तनप्रकारमाह **बृहच्छ्रीक्रमे**—

कलां कलङ्करहितां चिदानन्दमुपेयुषीम् ।
बिम्बरूपनिदानञ्च शुद्धस्फटिकसन्निभम् ॥
पराविराजिवामोरुमदालसवपुःस्त्रियम् ।
नादोपरि महादेवं पश्यन्ति ज्ञानचक्षुषा ॥ इति ॥

'कलां' कुण्डलिनीम् । 'चिदानन्दं बिन्दुरूपशिवम् । 'उपेयुषीं' प्राप्तवतीमित्यर्थः । 'बिम्बरूपनिदानं' परशिवम् । **तथान्यत्र**—

शून्यरूपं परशिवं प्रापयित्वा तु कुण्डलीम् ।
ततः सामरसीभूतां पाययित्वा परामृतम ।
पुनस्तेन पथा देवीं प्रापयेत् कुलगह्वरम् ॥ इति ॥

यथा—साङ्गत्यं तु तयोः कृत्वा सामरस्यं विभाव्य च ।
तदुद्भूतरसेनैव तर्पयेद देहदेवताम् ॥ इति ॥

प्रकारान्तरमाह **गन्धर्वमालिकायाम्**

सहस्रारं शिवपुरं रम्यं दुःखविवर्जितम् ।
सर्वतोऽलङ्कृतैर्दिव्यैर्नित्यपुष्पफलद्रुमैः ॥
सदाशिवपुरं रम्यं कल्पवृक्षसुशोभितम् ।
पञ्चभूतात्मकं ब्रह्म [ वृक्षं ] गुणत्रयसमन्वितम् ॥
चतुःशाखचतुर्वेदनित्यपुष्पफलान्वितम् ।
पीतं कृष्णं तथा श्वेतं रक्तपुष्पञ्च पार्वति ॥
हरितञ्च विचित्रञ्च नानापुष्पं मनोहरम् ।
एवं कल्पद्रुपं ध्यात्वा तदधो रत्नवेदिकाम् ॥

**लिङ्गस्य । सा कीदृशी ? शुद्धसत्ता चतुर्विंशतितत्त्वसम्बन्धा । पुनः कीदृशी ? विद्युदिव प्रकाशतन्तुरूपमिव स्वरूपं यस्याः सा तथा । शिवे किम्भूते ? सूक्ष्मधाम्नि सूक्ष्मं धाम प्राप्य परमरस-युक्तशिवे परमशिवे प्रदीपाभे देदीप्यते ॥ ५१ ॥**

तत्रोपरि सुपर्यङ्कं नानारत्नोपशोभितम् ।
मन्दारपुष्परचितं नानागन्धानुमोदितम् ॥
तत्रोपरि महादेवः सदा तिष्ठति सुन्दरि ।
ध्यायेत् सदाशिवं देवं शुद्धस्फटिकसन्निभम् ॥
बहुरत्नसमाकीर्णं दीर्घबाहुं मनोहरम् ।
सुखप्रसन्ननयनं स्मेरास्यं सततं प्रिये ॥
श्रवणे कुण्डलोपेतं रत्नहारेण शोभितम् ।
शोण [गले] पद्मसहस्रेण मालया शोभितं वपुः ॥
अष्टबाहुं त्रिनयनं शिवं पद्मदलेक्षणम् ।
पादयोर्नूपुरं रम्यं शब्दब्रह्ममयं वपुः ॥
एवं स्थूलवपुस्तस्य भावयेत् कमलेक्षणे ।
पद्ममध्ये स्थितं देवं निरीहं शब्द[व]रूपवत् ।
शब्द[व]रूप-महादेव-कृत्यं नास्ति कदाचन ॥ इति ॥

तथा—ध्यायेत् कुण्डलिनीं देवीं स्वयम्भूलिङ्गवेष्टिनीम् ।
हंसेन मनुना देवीं सहस्रारं समानयेत् ॥
सदाशिवो महादेवो यत्रास्ते परमेश्वरि ।
देवीं रूपवतीं कामसमुल्लासविहारिणीम् ॥
मुखारबिन्दगन्धेन मोदितं परमं शिवम् ।
प्रबोध्य परमेशानि तत्रैवोपविशेत् प्रिये ॥
शिवस्य मुखपद्मं हि चुचुम्बे कुण्डली शिवे ।
सदाशिवेन देवेशि क्षणमात्रं रमेत् प्रिये ॥
अमृतं जायते देवि तत्क्षणात् परमेश्वरि ।
तदुद्भवामृतं देवि लाक्षारससमायुतम् ॥
तेनाऽमृतेन देवेशि तर्पयेत् परदेवताम् ।
षट्चक्रदेवतास्तत्र सन्तर्प्याऽमृतधारया ॥
आनयेत् तेन मार्गेण मूलाधारं पुनः सुधीः ।
यातायातक्रमेणैव तत्र कुर्यान्मनोलयम् ॥
एवमभ्यस्यमानस्तु अहन्यहनि पार्वति ।
जरामरणदुःखाद्यैर्मुच्यते भवबन्धनात् ॥

इति । एवं प्रकारान्तरस्तन्त्रान्तरे अनुसन्धेयः ॥ ५१ ॥

**यस्य । प्रदीप्ते प्रकृष्टदीप्तिं कुर्वति ॥ ५१ ॥**

**नीत्वा तां कुलकुण्डलीं लयवशाज् जीवेन सार्द्धं सुधी-**
**र्मोक्षे धामनि शुद्धपद्मसदने शैवे परे स्वामिनि ।**

कुण्डलिनी-ध्यानयोगमुक्त्वा समाधियोगमाह—**नीत्वेति** । अस्या-यमर्थः—**समाधौ यतः योगीन्द्रः सुधीस्तां** पूर्वोक्तोत्थापनक्रमेण ब्रह्मद्वारं प्राप्तवतीं भगवतीं कुण्डलिनीं **जीवेन सार्द्धं लयवशाद्** लयक्रमेण **शुद्ध-पद्मसदने** सहस्रारमध्ये **परे** परंबिन्दुरूपे **शैवे** शिवपदे **स्वामिनि** स्वामि-निकटे नीत्वा **इष्टफलप्रदामिष्टदेवता**रूपां तां स्वामिरूप-परंबिन्दुना सहैकीभावं प्रापय्य परां परंबिन्दुस्वरूपां ध्यायेत् । **चैतन्यरूपामिति** । तदनन्तरं परंबिन्दुमपि तन्मध्यशून्यमध्ये चिदात्मनि विलाप्य शुद्धचैतन्य-रूपां ध्यायेदिति समुदायार्थः । ततः सोऽहम्भावेन जीवात्म[परमात्म]-नोरैक्यं ज्ञात्वा तत्र चित्तं विलाप्य सर्वव्यापकसम्पूर्ण-ज्ञानात्मना स्थिरचित्तः सन् तिष्ठेदिति शेषः । तदुक्तं श्रीमदा**चार्यस्वामिना**—

मकारं कारणं प्राज्ञश्चिदात्मनि विलापयेत् ।
चिदात्माऽहं नित्यशुद्धबुद्धमुक्तसदद्वयः ॥
परमानन्दसन्दोहो वासुदेवोऽहमोमिति ।
ज्ञात्वा विवेचकं चित्तं तत्साक्षिणि विलापयेत् ॥
चिदात्मनि विलीनं चेत् तच्चित्तं नैव चालयेत् ।
पूर्णबोधात्मना तिष्ठेत् पूर्णाचलसमुद्रवत् ॥ इति ॥

इति । 'मकारमि'ति प्रणवपक्षे । अत्र 'कारणं' परंबिन्दुः । 'वासुदेवोऽहमि'ति "वैष्णवं तल्लपन्ती"त्यनेनैकवाक्यतया वैष्णवपक्षे । तेन यो यद्देवतोपासकः, स सोऽहमिति ज्ञात्वा । ॐ इति प्रणवोपासनायाम् । अन्यत्र तत्तन्मन्त्रमय-कुण्डलिनीस्वरूपं ज्ञात्वेति बोध्यम् । **तन्त्रान्तरे** –

किरणस्थं तदग्निस्थं चन्द्रभास्करमध्यगम् ।
महाशून्य[मूल्य]मयं कृत्वा पूर्णस्तिष्ठति योगिराट् ॥

इति । **जीवेन सार्द्धं नीत्वेति** । पूर्वप्रदर्शितवचनाद् हंस इति जीवात्मानं हृदयस्थं दीपकलिकाकारं हंस इति मन्त्रेण मूलाधारमानीय तेन सार्द्धं कुण्डलिनीं नयेत् । **लयवशादिति** । लयक्रममाह—

**नीत्वेति । तस्यास्तु साधकाय ओमित्याह—नीत्वेति । सुधीः जनस्तां कुलकुण्ड-लिनीं जीवेन जीवात्मना सार्द्धं लयवशात् लीनां कृत्वा शैवे शिवसम्बन्धीयमोक्षे धामनि**

ततः सा शुद्धस्वभावा सूक्ष्मतालक्षणेन तडिदिव लसत्तन्तुरूपा तन्मोक्षानन्दं

ध्यायेदिष्टफलप्रदां भगवतीं चैतन्यरूपां परां
योगीन्द्रो गुरुपादपद्म-युगलालम्बी समाधौ यतः ॥ ५२ ॥

त्रिकोणाख्ये तु देवेशि लङ्कारं चिन्तयेत् ततः ।
ब्रह्माणं तत्र सञ्चिन्त्य कामदेवञ्च चिन्तयेत् ॥
जीवं तत्रैव निश्चिन्त्य प्रणवोच्चारणेन च ।
पदे च गमनं पत्यौ विसर्गनाशिकामिनि ॥
घ्राणं संचिन्त्य देवेशि महेशि प्राणवल्लभे ।
डाकिनीं परमाराध्यां शक्तिञ्च भावयेत् ततः ॥
एतानि गिरिजे मातः पृथ्वीं नीत्वा गणेश्वरि ॥

तथा—ततश्च पृथिवीं धन्यां गन्धे[न्धं] नीत्वा महेश्वरि ।
आकृष्य प्रणवेनैव जीवात्मानं नगेन्द्रजे ॥
कुण्डलिन्या सह प्राणं गन्धमादाय साधकः ।
सोऽहं तु मनुना देवि स्वाधिष्ठाने प्रवेशयेत् ॥
तथा—तत्कर्णिकायां वरुणं तत्रापि भावयेद् हरिम् ।
युवानं राकिणीं शक्ति चिन्तयित्वा वरानने ॥
रसनेन्द्रियकूपस्थं जलञ्च कामलालसे ।
एतानि गन्धञ्च शिवे रसं नीत्वा वरानने ।
जीवात्मानं कुण्डलिनीं रसञ्च मणिपूरके ॥

तथा—तत्कर्णिकायां सुश्रोणि वह्निं संचिन्त्य साधकः ।
तत्र रुद्रः स्वयं कर्त्ता संहारे सकलस्य च ॥
लाकिनीशक्तिसंयुक्तं भावयेत् तं मनोहरम् ।
तत्र चक्षुरिन्द्रियञ्च ध्यात्वा तेजोमयं शिवे ॥
एतद्रसानि सुभगे रूपे नीत्वा महाभगे ।
जीवात्मानं कुण्डलिनीं रूपञ्चाऽनाहते नयेत् ॥
तथा—तत्कर्णिकायां वायुञ्च जीवस्थाननिवासिनम् ।
तत्र योनिमण्डलञ्च बाणलिङ्गविराजितम् ॥

नीत्वा ध्यायेदिति । "अपानः कर्षति प्राणं प्रणोऽपानश्च कर्षति" इत्येतत्क्रमेण यदा प्राणो जीवात्माकर्षयति तदैव जीवात्मना सार्द्धं तस्या आनयनम् । कीदृशे ? शुक्लपद्मे

घटयति । नयवशात् नीतिवशात् । समाधौ यतो योगीशः तां कुलकुण्डलिनीं जीवात्मना सार्द्धं मोक्षधाम्नि परमशिवे सच्चिदानन्दरूपे भगवतीं चैतन्यरूपां ध्यायेत् ।

काकिनीशक्तिसंयुक्तं तत्र वायुं त्वगिन्द्रियम् ॥
एतानि रूपं संयुज्य स्पर्शे त्वमलकारिणि ।
जीवं कुण्डलिनीं स्पर्शं विशुद्धे स्थापयेत् ततः ॥

तथा--तत्कर्णिकायामाकाशं शिवञ्च शाकिनीयुतम् ।
वाचः श्रोत्रञ्च आकाशे संस्थाप्य नगनन्दिनि ॥
एतानि स्पर्शं शब्दे वै नीत्वा शङ्करि मत्प्रिये ।
जीवं कुण्डलिनीं शब्दञ्चाज्ञाचक्रे निधापयेत् ॥

इत्यन्तं कङ्कालमालिन्याम् । 'त्रिकोणाख्ये' प्रकान्तमूलाधारत्रिकोणे । तन्मध्ये लङ्कारचिन्तनमिति । एवं प्रणवोच्चारणेन जीवानयनमिति मतान्तरम् । विसर्गनाशिकामिनीति । विसर्ग उपसर्गः, कामोद्वेग इति यावत्, तं नाशयितुं शीलं यस्याः सा कुण्डलिनी । पत्यौ पदे सहस्रदल-कमलस्थ-बिन्दुमयशिवे गमनं साधकेन कार्यमिति शेषः । एतानि लङ्कार-ब्रह्म-कामदेव-डाकिनीशक्ति-घ्राणेन्द्रियाणि पृथ्वीं नीत्वा पृथिव्यां विलाप्य पृथिवीं गन्धतत्त्वे विलाप्य जीवात्मानं कुण्डलिनीं गन्धतत्त्वं प्रणवेनाकृष्य सोऽहंमन्त्रेण स्वाधिष्ठाने समानयेदिति शेषः । एवं सर्वत्र बोध्यम् । जीवं कुण्डलिनीं शब्दतत्त्वमाज्ञाचक्रे नीत्वा शब्दतत्त्वं तत्रस्थाहङ्कारे अहङ्कारं महत्तत्त्वे महत्तत्त्वं हिरण्यगर्भाख्यसूक्ष्मप्रकृतौ प्रकृतिं परबिन्दौ विलापयेत् । तदुक्तं **मन्त्रतन्त्रप्रकाशे**--

अहङ्कारे हरेद् व्योम सशब्दं तन्महत्यपि ।
महच्च सर्वशक्तीनामव्यक्ते कारणे परे ॥
सच्चिदानन्दरूपं यद् वैष्णवं कारणं परम् ।
पृथिव्यादिक्रमात् सर्वं तत्र लीनं विचिन्तयेत् ॥

इति । सर्वशक्तीनामव्यक्ते हिरण्यगर्भाख्य-सूक्ष्मप्रकृतौ महद्धरेत् । प्रकृतिञ्च परे परबिन्दुरूपकारणे हरेदित्यर्थः । अत्र—

सहस्रारपद्मे सदनं स्थानं यस्य । परे उत्कृष्टे । अथवा परे स्थानस्वामिनि सर्वेषाम-धिकारिणी, संहारकारणत्वात् । तां कीदृशीम् ? इष्टफलं प्रददातीति इष्टफलप्रदाम् ।

तन्त्रान्तरे— ध्यै चिन्तायां स्मृतो धातुश्चिन्तातत्त्वेन निश्चला ।
एतद्ध्यानमिह प्रोक्तं सगुणं निर्गुणं द्विधा ।
सगुणं वर्णभेदेन निर्गुणं केवलं तथा ॥

समाधिकालात् प्रागेवं विचिन्त्याऽतिप्रयत्नतः ।
स्थूलसूक्ष्मक्रमात् सर्वं चिदात्मनि विलापयेत् ॥

इत्याचार्यविधानात् स्थूलानां सूक्ष्मे लयः । पृथिव्यादिकमनाहतपर्यन्तं, तेषामुक्तक्रमेण लये पृथिव्याश्रितत्वेन पादघ्राणेन्द्रिययोः पृथिवीप्रपञ्च-समुदायस्य च पृथिवीस्थाने विलापनम् । एवं जलस्थाने पाणि-रसनेन्द्रिय-जलप्रपञ्चानाम् । वह्निस्थाने पायु-चक्षुरिन्द्रिय-वह्निप्रपञ्चानाम् । वायु-स्थाने उपस्थ-त्वगिन्द्रिय-वायु-प्रपञ्चानाम् । आकाशस्थाने वाक्श्रोत्रेन्द्रिया-काशप्रपञ्चानां लयः । आज्ञाचक्रे सूक्ष्ममहदहङ्कारादिकं तेषामुक्तक्रमेण कारणे लयः । ततः क्षकाराद्यकारान्तवर्णान् विलोमेन विलाप्य 'स्थूलसूक्ष्म-क्रमात् सर्वमि'त्यत्र सर्वमित्युपादानाद् ब्रह्ममात्रावस्थितये आज्ञाचक्राध्वं-स्थित-पूर्वोपदर्शित-बिन्दुबोधिन्यादि-सकलकारणशरीरमपि विलोमेनाऽऽदि-कारणे परंबिन्दौ विलापयेदिति । तत्प्रकारमाह—

सङ्कल्प्यैवं ततो न्यासस्थानाद् वर्णांश्च संहरेत् ।
प्रतिलोमे ले क्ष-लयो लकारस्य हकारके ॥
ह-लयश्च सकारे च सलयश्च षकारके ।
क्रमेणैव-म-पर्यन्तं लयमुत्पाद्य यत्नतः ॥ इति ॥

तथा—तदर्णौं संहरेद बिन्दौ कलायां तं नियोजययेत् ।
तां नादेनान्तरं नादं नादान्ते संहरेत् पुनः ॥
तमुन्मन्यां समायोज्य विष्णुवक्त्रे नयेच्च ताम् ।
तं पुनर्गुरुवक्त्रे तु योजयेत् साधकोत्तमः ॥
ततश्च योजयेद् वर्णान्निलयेत् परमे शिवे ॥ इति ॥

'विष्णुवक्त्रे' पुंबिन्दौ ।

सूर्यबिन्दुर्मुखं प्रोक्तमधस्तादिन्दुपावकौ । इत्यादि—
बिन्दुः पुरुष इत्युक्तो विसर्गः प्रकृतिः स्मृता ।

इत्यादि-वचनयोरेकवाक्यतया तस्यैव वक्त्रत्वात् ।

नीत्वा तां पुंसि बिन्द्वात्मनि तमथ परात्मन्यथो कालतत्त्वे
तद्वै शक्तौ चिदात्मन्यपि च नयतु तां केवले धाम्नि शान्ते ।

**भगवतीं श्रीकाममाहात्म्यवतीम् । चैतन्यरूपां चेतनास्वरूपम् परां प्रकृष्टाम् । गुरो**

अन्यत्रापि—मज्जीवब्रह्मणोरैक्यं सोऽहमस्मी[हं स्यादि]ति वेदनम् ।

इति केशवाचार्यवचनैकवाक्यत्वाच्च । अत्र स्वस्वकारणे संहरणदर्शनात् नादान्तस्य व्यापकशक्तौ, तामुन्मन्यां, तां समन्यां, तां विष्णुवक्त्रे इति बोध्यम् । एवं प्रकारेण वर्णानां संहरणे षट्चक्राणां, संहारः, पद्मदलानां वर्णमयत्वात् । तदुक्तं **विश्वसारे**--

आदिवर्णात्मकं पत्रं पद्मानां परिकीर्त्तितम् ॥

इति । अथ वर्णपद्मोभयसंहरणप्रकारमाह **सम्मोहनतन्त्रे**--

वादि-सान्तान् दलस्थार्णान् संहरेत् कमलासने ।
तं षट्पत्रमये पद्मे बादिलान्ताक्षरान्विते ॥
स्वाधिष्ठाने समायोज्य बोधयेदाज्ञया गुरोः ॥ इत्यादि--
द्विपत्रे हक्षलसिते योजयित्वा ततः सुधीः ।
तदर्णौ संहरेद् बिन्दौ तं कलायां नियोजयेत् ॥

इत्यन्तवचनम् । ततश्च मूलकमले चतुर्वर्णं संहृत्य तत्पद्मं स्वाधिष्ठाने संहरेत् । एवंक्रमेणाऽऽज्ञाचक्रस्थ-हक्षपर्यन्तं संहृत्य तत्पद्मं बिन्दौ, बिन्दुं बोधिन्याम् एवं पूर्ववत् सर्वं परंबिन्दौ विलापयेदिति । एवञ्चाऽऽज्ञाचक्र-संहरणे तत्कर्णिकास्थ-हाकिनीतरलिङ्ग-प्रणवादीनां निराधारस्थित्य-सम्भवात् प्रकृतिपर्यन्त-संहरणानन्तरं तानपि परंबिन्दौ संहरेत् । शुद्धपद्म-सदने किम्भूते ? **मोक्षे धामनि** मुक्तिसम्पादकस्थाने इत्यर्थः । योगीन्द्रं विशेषयति--**गुरुपादपद्मयुगलालम्बीति** । गुरूपदेशेनैव सर्वसिद्धिरित्य-तस्तत्पदाश्रितः सन्निति भावः । **समाधौ यत** इति । समाधिलक्षणमाह **कुलार्णवे**--

यदत्र नात्र निर्भासः स्तिमितोदधिवत् स्मृतम् ।
स्वरूपशून्यं यद् ध्यानं तत् समाधिर्विधीयते ॥
तथान्यत्र--समत्वभावना नित्यं जीवात्म-परमात्मनोः ।
समाधिमाहुर्मुनयः प्रोक्तमष्टाङ्गलक्षणम् ॥ इति ॥

"योगश्चित्तवृत्तिनिरोधः" इति **पातञ्जलसूत्रम्** । तस्मिन् यतः तदभ्यास-युक्त इत्यर्थः ॥ ५२ ॥

**पादपद्मयुगलालम्बी योगीशः एवंक्रमेण भावयेदिति सम्बन्धः । समाधौ ध्यानधारणादौ यतः ॥ ५२ ॥**

तन्निर्गुणमिदम् । इत्यादि ॥ ५२ ॥

कुण्डलिन्या मूलाधारे प्रत्यावर्त्तनप्रकारः

**लाक्षाभं परमामृतं परशिवात् पीत्वा पुनः कुण्डली**
**नित्यानन्दमहोदयात् कुलपथान्मूले विशेत् सुन्दरी ।**

उक्तप्रकार-सकलयोगचिन्तनान्तरं यत् कर्त्तव्यं तदाह—**लाक्षाभमिति** । अस्यार्थः—कुण्डलिनी सुन्दरी **परशिवात् परमामृतं पीत्वा** नित्यानन्दमहोदयान्निःसृत्य कुलपथात् चित्रिणीनाडीमध्यस्थ-ब्रह्मपथं प्राप्य मूले मूलाधारे पुनः प्रविशेदित्यन्वयः । **पीत्वेति** पूर्वोक्त-तत्तद्ध्यानानन्तरं शिवशक्तयोः सामरस्यं विभाव्य सामरस्यानन्देन परशिवादुत्पन्नपरमामृतेन कुण्डलिनीं तर्पयेत् । तत् तर्पणामृतं पीत्वेत्यर्थः ।

**लाक्षाभमिति । इदानीमस्या आगमनं स्वस्थाने इति तदाह । सा कुण्डलिनी पूर्णा-**

ततो लाक्षाभं रक्तवर्णं परमामृतं कुण्डलिनी पीत्वा पूर्णानन्दमहोदयात् परशिवात् शिवसकाशात् प्राक्प्रतिपादितोन्मयादिसृष्टिमार्गेण कुलपथात् कुलपथमारुह्य ब्रह्मारुह्य मूलाधारे स्वस्थाने प्रविशेत् । ततो योगी तद्दिव्यामृतधारया योगपरम्पराप्राप्तया ब्रह्माण्डस्थितं शरीरस्थं दवतं डाकिन्यादिकं प्रीणयेत् । श्रीनाथवक्त्रादिति यदुक्तं तत् **गोरक्षसंहितादौ** स्पष्टीकृतम् । यथा—

प्रबुद्धा वह्नियोगेन मनसा मरुता हुता ।
सूचीव गुणमादाय ब्रजत्यूर्ध्वं सुषुम्णया ॥
ज्वलन्ती भुजगाकारा पद्मतन्तुनिभा शुभा ।
उद्घाटयेत् कवाटञ्च यथा कुञ्चिकया दृढम् ॥
कुण्डलिन्या तथा योगी ब्रह्मद्वारं प्रभेदयेत् ॥

कृत्वा संपुटितौ करौ दृढतरं बद्ध्वा तु पद्मासनं
गाढं वक्षसि सन्निधाय चिबुकं ध्यानञ्च तच्चेतसि ।
वारं वारमपानमूर्ध्वमनिशं प्रोत्सारयन् पूरयन्
प्राणं मुञ्चति मोक्षमेति शनकैः शक्तिप्रभावाद् यतः ॥

कुञ्चिकया कुलुपकारीत्याख्यया । **निर्वाणपद्धत्यामपि**—

आदौ पूरकयोगेन स्वाधारे योजयेन् मनः ।
गुदमेढ्रान्तरे योनिस्तामाकुञ्च्य प्रबोधयेत् ॥
भ्रमद्योनिगतं ध्यायेत् कामं बन्धूकसन्निभम् ।
ज्वलत्कालानलप्रख्यं तडित्कोटिसमप्रभम् ॥
तदूर्ध्वे तु शिखा सूक्ष्मा चिद्रूपा परमा कला ।
तया सहितमात्मानमेकीभूतं विचिन्तयेत् ॥

**तद्दिव्यामृतधारया स्थिरमतिः सन्तर्पयेद् दैवतं**
**योगी योगपरम्पराविदितया ब्रह्माण्डभाण्डस्थितम् ॥ ५३ ॥**

साङ्गत्यं तु तयोः कृत्वा पाययित्वा परमामृतम् ।

इति पूर्वोक्तवचने 'पाययित्वे'त्यनेन पानकार्यप्रेरणबोधनात् ।

अमृतं विशेषयति-**लाक्षाभमिति**। अलक्तरसवद्रक्ताभमित्यर्थः । **नित्यानन्दमहोदयादिति** । नित्यानन्दस्य महोदये महाप्रकाशो यत्र तस्मादित्यर्थः । मूले--**विशेदिति** । येन प्रकारेणोत्तानन पुनस्तेन प्रकारेण मूलाधारे आनयनम् । तेन यदा लिङ्गादिभेदक्रमेणोर्ध्वं गच्छति तदा तद्रूपेणैव पुनराधारमायाति । यदुक्तं **श्रीमदाचार्यस्वामिना**—

**नन्दस्य महान् उदयो यस्मात् परमशिवात् सदाशिवात् परमामृतं पीत्वा तेनैव कुलपथेन**

गच्छन्ती ब्रह्ममार्गेण लिङ्गभेदक्रमेण तु ।
अमृतं यद्विसर्गस्थं परमानन्दलक्षणम् ॥
द्रुतरक्तं तेजसाढ्यं धारापातप्रवर्षणम् ।
पीत्वा कुलामृतरसं पुनरेव कुलं विशेत् ॥

सा च प्राणः समाख्यातस्तन्त्रेऽस्मिन् परमेश्वरि ।
एवमभ्यस्यमानस्य अहर्निशनिबन्धनात् ।
चतुर्विधा तु या सृष्टिरस्यां योनौ प्रजायते ॥

पुनः प्रलीयते तस्यां कालाग्न्यादिशिवान्तिकम् ।
योनिमुद्रा परा सा तु बन्धस्तस्याः प्रकीर्त्तितः ॥

चतुर्विधेति **नैयायिकमते** पुरुषात् **सांख्यमते** प्रकृतिपुरुषाभ्यां **पातञ्जलमते** प्रकृतितः **मीमांसामते** अदृष्टात् सृष्टिः । तत्र योगो द्विविधः । यथा **शारदायाम्**—

पिण्डं भवेत् कुण्डलिनी शिवात्मा पदञ्च हंसः सकलान्तरात्मा ।
रूपं भवेद् बिन्दुरमन्दकान्तिरतीतरूपं शिवसामरस्यम् ॥
पिण्डादियोगं शिवसामरस्यात् सबीजयोगं प्रवदन्ति सन्तः ।
शिवे लयं नित्यगुणाभियुक्तं निर्बीजयोगं फलमव्यपेक्षम् ॥ इति ॥

तथान्यत्र--दिक्कालादिविवर्जिते परशिवे चैतन्यमात्रात्मके ।
इत्यादि । **स्वच्छन्दसंग्रहेऽपि** —

पिण्ड कुण्डलिनी शक्तिः पदं हंसः प्रकीर्त्तितः ।
रूपं बिन्दुरिति ख्यातं रूपातीतस्तु चिन्मयः ॥

**तन्त्रान्तरेऽपि**--पिण्डे युक्ताः पदे युक्ता रूपे युक्ता षडाननः ।
रूपातीते तु ये युक्तास्ते मुक्ता नात्र संशयः ॥

मतभेदे अनेकानि पद्मान्याह **स्वच्छन्दसंग्रहेऽपि** —

अधश्चोर्ध्वं सुषुम्णायाः सहस्रदलसंयुतम् ।
रक्तं श्वेतञ्च साहस्रदलस्थं शक्तिसंयुतम् ॥

सुधाधारासारैश्चरणयुगलान्तर्विगलितैः
प्रपञ्चं सिञ्चन्ती पुनरपि रसाम्नायमहसा ।
अवाप्य स्वां भूमिं भुजगनिभमध्युष्टबलयं ।
स्वमात्मानं कृत्वा स्वपिषि कुलकुण्डे कुहरिणी ॥

इति । अत्र श्लोके--रसाम्नायमहसे'ति । आम्नायते कथ्यते विधीयत इति यावत्, तेनाम्नायो विधानम् । महः प्रकाशः । पुन'रित्यनेन पूर्वरूपरस-विधानप्रकाशेन स्वां भूमिं मूलाधारमवाप्य इत्यर्थात् तथा प्रतीयते । लय-क्रमेण गमने तु पुनः सृष्टिक्रमेणाऽऽगमनम् ।

तदुक्तं यथा--ततः सा कुण्डली शक्तिर्मुद्राकारा सुरेश्वरी ।
पुनस्तेन प्रकारेण गच्छत्याधारपङ्कजे ॥

**मूले मूलाधारपद्मे । सा कीदृशी ? सुन्दरी । अमृतं कीदृशम् ? लाक्षाभं रजःसम्बन्धात्,**

ऊर्ध्वाधो मुखमूलन्तु कर्णिकाकेशरान्वितम् ।
शक्तिरूपं महादेवि कुलाकुलमयं शुभम् ॥
पङ्कजद्वयमीशानि स्थित शाश्वतमव्ययम् ।
तयोर्मध्ये सुषुम्णान्तस्त्रिशदाधारपङ्कजम् ॥
शक्तिरूपं शिवाकारं सर्वाध्यासं निजालयम् ।

नीत्वेति शेषः । तथा कियत् कियदूर्ध्वे पङ्कजानि । तदाह तत्रैव--

आधारपङ्कजस्योर्ध्वे सार्द्धद्वयङ्गुलकोपरि ।
तैजसं साष्टपत्रञ्च पीतकर्णिकया युतम् ॥
हृल्लेखा कर्णिकामध्ये स्थिता लिङ्गादिदेवता ।
एतस्माद् द्वयङ्गुलस्योर्ध्वे स्वाधिष्ठानं षडस्रकम् ॥
आप्यञ्च राकिणीशक्ति-पूर्वाभिः शक्तिभिर्युतम् ।
ततश्च भावयेद् देवि नाभिमष्टाङ्गुलोपरि ॥
तत् पद्मं मणिपूरञ्च दशपत्रं सुशोभितम् ।
लाकिनीपध्यगं तच्च तामर्थादाभिरावृतम् ॥
चतुर्दशाङ्गुलादूर्ध्वे मणिपूराख्यपङ्कज त् ।
पङ्कजं काकिनीमध्यं वायव्यं द्वादशारकम् ॥
तत्रस्थकालरात्र्यादिशक्तिभिश्च समावृतम् ।
तत्रस्थसूर्यबिम्बे च नादो यानादिपीठकम् ॥
एकादशाङ्गुलादूर्ध्वं विशुद्धं षोडशच्छदम् ।
मध्यगा शाकिनी बाह्यपत्रेषु परमेश्वरि ॥
अमृताद्यक्षरान्तास्था चन्द्रबिम्बं तदूर्ध्वगा ।
कण्ठोर्ध्वे परमेशानि लम्बिका चतुरङ्गुली ॥

इति । तथा **भूतशुद्धिप्रकरणे**—

परात्मनः पृथिव्यादि तद्वत् तत्त्वानि च क्रमात् ।
जीवं कुण्डलिनीं चापि स्वस्थानं प्रापयेत् क्रमात् ॥ इति ॥

विशेषस्तु—प्रकाशमाना प्रथम-प्रयाणे प्रतिप्रयाणेऽप्यमृतायमाना ॥इति॥ तदनन्तरं **तद्दिव्यामृतधारया** पूर्वदर्शित-शिवशक्तिसामरस्योत्पन्न-परमामृतस्य ब्रह्मरन्ध्राद् मूलाधारपर्यन्त-गलितधारया । अत एवोक्तं तृतीयश्लोके—"ब्रह्मद्वारं तदास्ये प्रविलसति सुधाधारगम्यप्रदेशम्" इति । **स्थिरमतिः** स योगी । दैवतमिष्टदैवतं षट्चक्रस्थडाकिन्यादिदैवतं च संतर्पयेदित्यर्थः ।

**ईदृशी भावनैव कर्त्तव्या, महाग्रन्थोक्तत्वात् । अतो योगी ध्यानपरम्पराक्रमेण ज्ञातया**

आज्ञाचक्रं द्विपत्राब्जं हक्षद्विदलसंयुतम् ।
हंसवती क्षमा पार्श्वद्वये मध्ये तु हाकिनी ॥

तन्त्रान्तरे ब्रह्मणः स्वाधिष्ठानमुक्तं यथा—

स्वाधिष्ठानं षड्दलोपेतमुद्यद्विद्युत्प्रेक्षं वादिलान्तैश्च वर्णैः ।
युक्तं सावित्रीसहितं विरिञ्चि ध्यायेदस्मिन् राकिणीं देवताञ्च ॥

**योगिनीहृदये**—एताश्चतस्रः शक्तयस्तु का पू जा उ इति क्रमात् ।
पीठाः कन्दे पदे रूपे रूपातीते क्रमाद् विदुः ॥

एतास्तत्र पूर्वोक्ता अम्बिकादयश्चतस्रः कामरूपादिपीठत्वेन परिणताः तथा च मूलाधारे कामरूपं, हृदि पूर्णगिरिः भ्रूमध्ये जालन्धरः, सहस्रारे उड्डीयानः । न च 'एकमेवाद्वितीयं ब्रह्म" इत्यादि श्रुत्या ब्रह्मण एकत्वमभिहितम् । शक्तिस्तावत् केति चेत् ? तद्ब्रह्मशिवशक्तिसामरस्यपरत्वमेव । यथा **कुलार्णवे**—

अद्वैतं केचिदिच्छन्ति द्वैतमिच्छन्ति चापरे ।
मम तत्त्वं न जानन्ति द्वैताद्वैतविवर्जितम् ॥

**स्वच्छन्दसंग्रहेऽपि**—अनयोः सामरस्यं यत् परस्मिन् महसि ध्रुवम् ।

**कुर्मपुराणे** ईश्वरगीतायां शिववाक्यम्—

एकया मम सायुज्यमनादिनिधनं स्फुटम् ।
पुंसोऽभूदन्यया भूतिमन्यया तत्तिरोहितम् ॥

एकया मायात्मिकया शक्त्या विशिष्टस्य मम अनादिनिधनं सायुज्यं सहयोगं अर्द्धनारीश्वरात्मकमभूत् । अन्यया आद्यया ज्ञानात्मिकयेति यावद् विशिष्टपुंसो भूतिमुत्पत्तिं जानीहि । अन्यथा चिच्छक्त्या तत्तिरोहितं, तयैव क्षणे तिरोहितम्, ब्रह्माविनाभूतम् । अत एव **तैत्तिरीयवाक्यम्**—

यत् तु मे निष्कलं रूपं चिन्मात्रं केवलं शिवम् ।
सर्वोपाधिविनिर्मुक्तमनन्तमपरं परम् ॥

**कलिकापुराणेऽपि**—चितिशक्तिं निराकारां परंब्रह्मस्वरूपिणीम् ॥

तेनाऽमृतेन देवेशि तर्पयेत् परदेवताम् ।
षट्चक्रदेवतास्तत्र संतर्प्याऽमृतधारया ।।

इति पूर्वोक्तवचनात् । अमृतधारायां विशेषयति—**योगपरम्पराविदितयेति** । योगस्य गुरूपदेशपरम्पराप्राप्तत्वाद् योगपरम्परेत्युक्तिरिति भावः । तेन गुरूपदेशपरम्पराविदितयेति फलितार्थः । अमृतं विशेषयति-**ब्रह्माण्डभाण्डस्थित**मिति । ब्रह्माण्डस्य भाण्डमाधारपात्रं कुण्डलिनी, तस्याः सर्वेषां योनिरूपत्वात् तत्र स्थितं कुण्डलिनीपात्रस्थितमित्यर्थः ।। ५३ ।।

**तद्दिव्यामृतधारया स्थिरमतिः सन् ब्रह्माण्डभाण्डस्थितं सर्वदैवतं सन्तर्पयेत्** ।। ५३ ।।

जन्मखण्डे राधिकां प्रति कृष्णवाक्यम्—

यदा तेजःस्वरूपोऽहं तेजोरूपाऽसि त्वं तदा ।
न शरीरी यदाहञ्च तदा त्वमशरीरिणी ।।

तन्त्रेऽपि——न शिवेन विना शक्तिः न शक्त्या रहितः शिवः ।
अतस्तयोरभेदश्च चन्द्रचन्द्रिकयोरिव ।।

वेदान्तेऽपि "चिच्छक्तिर्ब्रह्माश्रिता ।" तथा——

मायोपाधिविनिर्मुक्तं शुद्धमित्यभिधीयते ।
मायासम्बन्धतश्चेशो जीवोऽविद्यावशस्तथा ।।

इत्युक्तम् । तदेव सामरस्यं परंब्रह्म सगुणशिव-शक्त्यादिनानारूपेण परिणमते । यथा

**विश्वसारे**—कालेन प्रेरयेन् मायां सृष्टेरुत्पत्तिहेतवे ।
या मूलप्रकृतिः प्रोक्ता सा माया परिकीर्त्तिता ।।
योऽयं सदाशिवः प्रोक्तः स एव पुरुषः परः ।
एकं ब्रह्म द्विधा भूत्वा सृष्टिरेषा विधीयते ।।
अर्द्धेन वनिता भूत्वा अर्द्धेन पुरुषस्तथा ।
तावुभौ च समौ कृत्वा सृष्टिव्यक्तिं नयेत् सुधीः ।।

मायावच्छिन्नेश्वरस्य षडङ्गन्याह **कूर्मपुराणादौ**——

सर्वज्ञता तृप्तिरनादिबोधः स्वतन्त्रता नित्यमलुप्तशक्तिः ।
अनन्तशक्तिश्च विभोर्विधिज्ञाः षडाहुरङ्गानि महेश्वरस्य ।। ५३ ।।

नारायणो वैदिकश्च भट्टाचार्यः समीरितः ।
तस्यात्मजो वामदेवभट्टाचार्यस्तथैव च ।
तस्यात्मजो विश्वनाथस्तेनेयं रचिता मुदा ।।

षट्चक्रयोगक्रमज्ञानफलम्

ज्ञात्वैतत् क्रममुत्तमं यतमना योगी यमाद्यैर्युतः
श्रीदीक्षागुरु - पादपद्म - युगलामोदप्रवाहोदयात् ।
संसारे न हि जन्यते न हि कदा संक्षीयते संक्षये
नित्यानन्दपरम्पराप्रमुदितः शान्तः सतामग्रणी ॥ ५४ ॥

षट्चक्रश्लोकाध्ययनफलम्

योऽधीते निशि सन्ध्ययोरथ दिवा योगी स्वभावे स्थितो
मोक्षज्ञाननिदानमेतदमलं शुद्धञ्च गुप्तं परम् ।
श्रीमत् श्रीगुरुपादपद्मयुगलालम्बी यतान्तर्मना-
स्तस्यावश्यमभीष्टदैवतपदे चेतो नरीनृत्यते ॥ ५५ ॥

उक्तयोगक्रमज्ञानफलमाह--ज्ञात्वैदिति । **श्रीदीक्षागुरुपादपद्मयुगलामोदप्रवाहोदयादिति** । आमोद आनन्दस्तस्य प्रवाहोऽविच्छिन्नोत्तरसम्बन्धस्तेन नित्यानन्द इति यावत्, तस्योदयो यस्मात् तादृशपादद्मयुगलाज् ज्ञात्वेत्यर्थः । दीक्षागुरुरिति । प्रथमोपस्थितत्वेन गौरवातिशयेन च तद्ग्रहणम् । तदभावे अन्यगुरोरपि ज्ञातव्यम् ।

अत एवोक्तम्—मधुलुब्धो यथा भृङ्गः पुष्पात् पुष्पान्तरं व्रजेत् ।
ज्ञानलुब्धस्तथा शिष्यो गुरोर्गुर्वन्तरं व्रजेत् ।

इति **नित्यानन्दपरम्पराप्रमुदित** इति । नित्यानन्दधारारूप-हर्षयुक्त इत्यर्थः । सतां योगिरूपप्रशस्तजनानामग्रगण्य इत्यर्थः ॥ ५४ ।

षट्चक्रश्लोकाध्ययनफलमाह—योऽधीत इति । **स्वभावे स्थित** आत्मभावे नियुक्त इत्यर्थः । **यतान्तर्मना** इति । यतं योगाभ्यासेन स्थिरीकृतमन्तरात्मनि मनो येन तादृश इत्यर्थः । स्पष्टमन्यत् ॥ ५५ ॥

इति श्रीपूर्णानन्दयतिविरचित श्रीतत्वचिन्तामण्यन्तर्गत-षट्चक्रविवरण-श्लोकार्थपरिष्कारिणी-व्याख्या समाप्ता ।

**ज्ञात्वैतदिति । एतदुत्तमं क्रमं ज्ञात्वा संयतमनाः सन् योगी जनो यमाद्यभ्यासेषु श्रीदीक्षागुरुपादपद्मयुगलामोदप्रवाहोदयात् संसारे न हि जन्यते । न हि कदा संक्षये संक्षीयते । प्रलयेऽपि तस्य क्षयो नास्तीत्यर्थः । स कीदृशीः ? पूर्णानन्दपरम्परया प्रमुदितं स्वान्तर्यस्य स तथा । सतामग्रणीरपि भवति ॥ ५४ ॥**

**योऽधीते इति । अथैतत् सुगुप्तक्रमं यः स्वीयभावस्थितः सन् निशि सन्ध्ययोर्दिवा अधीते तस्याऽवश्यमेव अभीष्टदैवतपदे चित्तं मुहुर्नृत्यति । यतं निश्चलम् अन्तर्मनो यस्य स तथेति ॥ ५५ ॥**

**इति श्रीमच्छङ्करकृतषट्चक्रभेदटिप्पणी समाप्ता ।**

इति श्रीविश्वनाथकृत**विवृताख्यटीका** समाप्ता ।

॥ श्रीः ॥

श्रीपूर्णानन्दयतिविरचितम्

# षट्चक्रनिरूपणम्

सविमर्श'प्रह्लाद'हिन्दीव्याख्यासहितम्

आत्मा त्वभिज्ञातनिजस्वभावः
पूर्णत्वमाप्तो गतमोहशोकः ।
देहस्थितत्वं गगनाद्यशेषं
स्वव्यापकैकत्वमुपेत्य चास्ते ।।

योऽयं शिवोऽस्ति सर्वात्मा सर्वाकृतिस्वभावकः ।
तस्मिन् मयि कुतो भेदः कथं कस्माद्भवेदपि ।।

॥ श्रीः ॥

# षट्चक्रनिरूपणम्

## सविमर्श'प्रह्लाद'हिन्दीव्याख्यासहितम्

### योगनिरूपण करनेकी प्रतिज्ञा

अथ तन्त्रानुसारेण षट्चक्रादिक्रमोद्‌गतः।
उच्यते परमानन्द-निर्वाह-प्रथमाङ्कुरः ॥ * ॥

इसके अनन्तर मैं ( पूर्णानन्द यति ) तन्त्रके अनुसार षट्चक्रादिक्रमघटित परमानन्द ब्रह्मकी ज्ञानप्राप्तिके लिए प्रथमकारणीभूत कर्मके स्वरूपको कहता हूँ।

**विमर्श**—ग्रन्थकार श्री पूर्णानन्द यतिने प्रथम श्लोकमें ही योगनिरूपणकी प्रतिज्ञा करते हुए सर्वप्रथम मङ्गलस्वरूप आनन्तर्यार्थक **'अथ'** शब्दका प्रयोग किया है। यदि अथ शब्द आनन्तर्यार्थक है तो प्रश्न उठता है कि किसके अनन्तर ? कहते हैं—**'षट्चक्रनिरूपणम्'** श्री पूर्णानन्द यति विरचित 'तत्त्वचिन्तामणि' नामक ग्रन्थका षष्ठ अध्याय है। इससे पूर्ववर्ती पाँच अध्यायोंमें जैसे—( १ ) प्रथम अध्यायमें तत्त्वबोध, ( २ ) द्वितीय अध्यायमें दीक्षाकी विधियाँ, ( ३ ) तृतीय अध्यायमें दीक्षाके लिए स्थानका निर्णय, कूर्मचक्र, वास्तुयाग, विघ्ननाशक मण्डल तथा मण्डलमें पूजे जानेवाले देवताओंके मन्त्र, ( ४ ) चतुर्थ अध्यायमें सम्बन्धित मण्डपोंके निर्माणका विधान तथा ( ५ ) पञ्चम अध्यायमें दीक्षासे सम्बन्धित देवताओंके स्थान एवं पूजाविधिसे सम्बन्धित कुम्भोंके आकार तथा धातुका निर्णय है। इन पाँचों अध्यायोंसे यह विदित होता है कि विधिपूर्वक गुरुसे दीक्षा ग्रहणके अनन्तर ही उनके निर्देशानुसार कुण्डलिनी ज्ञान प्राप्त करे, अतः ग्रन्थकारने आनन्तर्यार्थक अथ शब्दका प्रयोग किया है। **षट्चक्रादिक्रमोद्‌गतः**—शरीरके अन्दर छः चक्र हैं; जैसे—( १ ) मूलाधार, ( २ ) स्वाधिष्ठान, ( ३ ) मणिपूर, ( ४ ) अनाहत, ( ५ ) विशुद्ध तथा ( ६ ) आज्ञा चक्र। 'आदि' पदसे सहस्रदल-कमल अर्थात् सहस्रारका ग्रहण होता है। **'क्रम'** शब्दसे यहाँपर क्रमशः चक्रादिके भेदन करनेका निर्देशन है। **परमानन्दनिर्वाहप्रथमाङ्कुरः**—परमानन्द ब्रह्म है। **'निर्वाह'** शब्दका अर्थ है—ज्ञानप्राप्ति होना अर्थात् उसका साक्षात्कार होना। उस

### इडादि नाड़ीत्रयका स्वरूप

**मेरोर्बाह्य-प्रदेशे शशि-मिहिर-शिरे सव्य-दक्षे निषण्णे**
**मध्ये नाडी सुषुम्णा त्रितयगुणमयी चन्द्रसूर्याग्निरूपा ।**
**धूस्तूर-स्मेर-पुष्प-ग्रथिततम-वपुः कन्दमध्याच्छिरस्था**
**वज्राख्या मेढ्रदेशाच्छिरसि परिगता मध्यमेऽस्या ज्वलन्ती ।। १ ।।**

---

ब्रह्मके साक्षात्कारके लिए आदि-कारण क्या है ? कहते हैं--षट्चक्रादिके क्रमसे घटित कर्म है । इसी कर्मके स्वरूपका निरूपण ग्रन्थकारने आगे किया है ।। * ।।

मेरुदण्डके बाह्यप्रदेशमें वाम तथा दक्षिण भागमें क्रमशः इडा तथा पिङ्गला नामक दो नाडियाँ स्थित हैं । मेरुदण्डके मध्यरन्ध्र में सुषुम्णा नामक नाड़ी स्थित है, जो कि सत्त्व, रज तथा तम–त्रिगुणमयी है और चन्द्र, सूर्य तथा अग्निके समान प्रकाशमान् है । खिले हुए धतूरेके पुष्पके समान शरीरवाली यह सुषुम्णा नाड़ी नाडियोंके उत्पत्तिस्थान कन्दके मध्यसे निकलकर मस्तकमें स्थित सहस्रदल पर्यन्त गयी है । इसके मध्यभागमें देदीप्यमान् वज्रा नामक एक अन्य नाड़ी लिङ्गमूलसे-निकलकर मस्तक पर्यन्त गयी है ।

**विमर्श**--नाड़ी तथा षट्चक्रके ज्ञानके बिना ब्रह्मप्राप्ति नहीं हो सकती है, अतः ग्रन्थकार सर्वप्रथम उपयुक्त नाडियोंका निरूपण कर रहे हैं—मानव शरीरमें बहत्तर हजार नाड़ियाँ विद्यमान हैं । उनमें तीन प्रसिद्ध नाडियाँ हैं; जैसे--( १ ) इडा, ( २ ) पिङ्गला तथा ( ३ ) सुषुम्णा । इनमें भी सुषुम्णा नाड़ी प्रधान है । इडा नाड़ीका अधिष्ठातृदेवता चन्द्र है तथा पिङ्गलाका सूर्य है, अतः इडाको चन्द्र नाड़ी तथा पिङ्गलाको सूर्यनाडी भी कहते हैं । इडा नाड़ी मेरुदण्डके वामभागमें तथा पिङ्गला नाड़ी दक्षिण भागमें स्थित हैं । ये दोनों नाड़ियाँ नाडियोंके उत्पत्तिस्थान नाड़ीकन्दसे निकलकर नासारन्ध्र पर्यन्त चली गयी हैं । मेरुदण्डके मध्य छिद्रभागमें सुषुम्णा नाड़ी स्थित है । यह नाड़ी सत्त्व, रज तथा तम–इन तीनों गुणोंसे युक्त है । चन्द्र, सूर्य तथा अग्निके समान इसका रूप है । यह नाड़ी कन्दके मध्यभागसे निकली है । नाड़ियोंके उत्पत्तिस्थानको कन्द कहते हैं । गुदा-से दो अङ्गुल ऊपर तथा लिङ्गमूलसे दो अङ्गुल नीचे चार अङ्गुल विस्तार पक्षीके अण्डेके समान नाडियोंका उत्पत्तिस्थान नाडीकन्द स्थित है । यहींसे बहत्तर हजार नाडियोंकी उत्पत्ति हुई है, अतः इडा, पिङ्गला तथा सुषुम्णाका भी यही उत्पत्तिस्थान है । सुषुम्णा नाड़ीका शरीर खिले हुए धतूरेके पुष्पके समान है । यही नाड़ी मस्तकमें स्थित सहस्रार पर्यन्त गयी है । इसके मध्यमें वज्रा नाड़ी है जो कि देदीप्यमान् है । इसका उत्पत्तिस्थान लिङ्गमूल है । यहींसे यह मस्तकमें स्थित सहस्रार पर्यन्त गयी है ।। १ ।।

### चित्रिणी नाड़ीकी संस्थिति

तन्मध्ये सा प्रणवविलसिता योगिनां योगगम्या
लूतातन्तूपमेया सकलसरसिजान् मेरुमध्यान्तरस्थान् ।
भित्त्वा देदीप्यते तद्ग्रथनरचनया शुद्धबोधस्वरूपा
तन्मध्ये ब्रह्मनाडी हरमुखकुहरादादिदेवान्तसंस्था ॥ २ ॥

उस वज्रा नाड़ीके मध्यभागमें चित्रिणी नाड़ी स्थित है। वह प्रणवके समान देदीप्यमान् है तथा मकड़ीके सूतके समान अतिसूक्ष्म होनेसे योगियोंको योगके द्वारा विदित होनेवाली है। वह नाड़ी मेरुके मध्यान्तरमें स्थित समस्त कमलोंको भेद कर उन्हें गूँथकर अत्यधिक प्रकाशित कर रही है। उस चित्रिणी नाड़ीके मध्यमें शुद्ध ज्ञानस्वरूपा ब्रह्म नाड़ी स्वयम्भू लिङ्गके छिद्रसे निकलकर आदि-देव अर्थात् सहस्रदलकी कर्णिकाके मध्यमें स्थित ब्रह्म पर्यन्त चली गयी है।

**विमर्श**—चित्रिणी नाड़ीकी स्थिति वज्रा नाड़ीके मध्यभागमें है। यह चित्रिणी नाड़ी मकड़ीके सूतके समान अत्यन्त सूक्ष्म होनेसे योगियोंको योगके द्वारा ही विदित होती है। यही नाड़ी समस्त कमलोंका भेदन करती है। कमलोंकी स्थितिके सम्बन्धमें **'मेरुमध्यान्तरस्थान्'** शब्द सूचित करता है--पूर्व श्लोकके अनुसार यह तो निश्चित है कि मेरुदण्डके मध्यभागमें सुषुम्णा नाड़ी स्थित है। उसी सुषुम्णाके मध्यभागमें वज्रा नाड़ीकी स्थिति है। ये दोनों नाड़ियाँ कमलोंका भेदन नहीं करती हैं। भेदन करनेवाली नाड़ी एकमात्र चित्रिणी है; अतः कमलोंकी स्थिति इस प्रकारसे है—मेरुके मध्यभागमें सुषुम्णा नाड़ी है, सुषुम्णा नाड़ीके मध्यभागमें वज्रा नाड़ी है और वज्रा नाड़ीके मध्यभागमें कमलोंकी स्थिति है। यहाँपर एक प्रश्न इस प्रकारसे उठता है कि क्या वज्रा नाड़ीके मध्यभागमें सभी कमलोंकी स्थिति है ? तो कहते हैं—वज्रा नाड़ीके मध्यमें सभी कमलोंकी स्थिति नहीं हो सकती है; क्योंकि मूलाधार कमलके निरूपणमें कहा गया है कि मूलाधारका स्थान 'ध्वजाधो गुदोर्ध्वम्' अर्थात् लिङ्गमूलसे नीचे तथा गुदाके ऊपर है, और भी 'सुषुम्णास्यलग्नम्' सुषुम्णाके मुखमें संलग्न है। पूर्वश्लोकमें वज्राका उत्पत्तिस्थान लिङ्गमूल बताया गया है। लिङ्गमूलके नीचे मूलाधार कमलका स्थान होनेसे वज्राके अन्दर मूलाधारका स्थान नहीं हो सकता है। केवल मूलाधार ही सुषुम्णा मात्रके मध्यभागमें स्थित है, मूलधार कमलको छोड़कर अन्य कमलोंकी स्थिति वज्रा नाड़ीके मध्यमें है। मूलाधार कमल वज्रा नाड़ीके अधोभागमें स्थित है। मूलाधारस्थ त्रिकोणके निरूपणमें भी त्रिकोणकी स्थिति 'वज्राख्यावक्त्रदेशे'के अनुसार वज्राके मुखमें है। वज्राका उत्पत्तिस्थान लिङ्गमूल है, तो उसका मुख लिङ्गमूलके अधोभागमें होगा। इससे यह विदित होता है कि मूलाधार कमल मात्र सुषुम्णाके मध्यभागमें स्थित है। श्लोकमें 'मेरुमध्यान्तर-

**विद्युन्मालाविलासा मुनिमनसि लसत्तन्तुरूपा सुसूक्ष्मा**
**शुद्धज्ञानप्रबोधा सकलसुखमयी शुद्धबोधस्वभावा ।**
**ब्रह्मद्वारं तदास्ये प्रविलसति सुधाधारगम्यप्रदेशं**
**ग्रन्थिस्थानं तदेतद् वदनमिति सुषुम्णाख्यनाड्या लपन्ति ॥ ३ ॥**

---

स्थान्' शब्दका प्रयोग किया गया है। मेरुके मध्यमें रहनेवाली सुषुम्णा है। उसके मध्यमें रहनेवाली वज्रा नाड़ी है। उसमें रहनेवाले 'तत्स्थाः सरसिजाः' कमल हैं। इस प्रकारसे जब समझा जाय तो मूलाधारको छोड़ अन्य कमलोंका बोध होगा, किन्तु मूलाधारको केवल सुषुम्णाके मध्यभागमें तथा वज्राके बहिर्भागमें स्थित मानना होगा, अतः ग्रन्थकारने स्वाधिष्ठानके निरूपणप्रसङ्गमें स्वाधिष्ठानको 'सौषुम्णमध्यघटितम्' कहा है। इसका अर्थ इस प्रकारसे है—सुषुम्णाया इदं सौषुम्णम्, वज्रानाड्यादि, तन्मध्यभूतं पद्मम्, तस्येदमित्यर्थे अण् प्रत्ययः। इससे स्पष्ट होता है कि सुषुम्णाके मध्यमें वज्रा नाड़ी है तथा उस वज्रा नाड़ीके मध्यमें स्वाधिष्ठान कमल है। आगेके मणिपूरादि कमल भी वज्रा नाड़ीके मध्यभागमें स्थित हैं। मूलाधारादि समस्त कमलोंका भेदन चित्रिणी नाड़ी करती है, अतः इसका उत्पत्तिस्थान मूलाधारके नीचे होना चाहिए, अतः चित्रिणीका उत्पत्तिस्थान स्वयम्भू लिङ्गका छिद्रभाग है। इसी चित्रिणी नाड़ीके मध्यभागमें ब्रह्म नाड़ी है। वस्तुतः ब्रह्म नाड़ी नामक कोई एक अन्य नाड़ी नहीं है। चित्रिणी ही ब्रह्म नाड़ी है; क्योंकि इसीके अन्दरमें सहस्रारस्थित ब्रह्म पर्यन्त जाननेके लिए पदवी—मार्ग है। 'नाड़ी' शब्दका अर्थ है पदवी—मार्ग। यह चित्रिणी नाड़ी स्वयम्भू लिङ्गके छिद्रभागसे निकलकर सहस्रारके मध्यमें स्थित ब्रह्म पर्यन्त चली गयी है। इसीलिए इसे ब्रह्म नाड़ी कहते हैं। निष्कर्ष यह है कि मेरुके मध्यभागमें सुषुम्णा नाड़ी स्थित है। सुषुम्णा नाड़ीके मध्यभागमें वज्रा नाड़ी स्थित है। वज्राके मध्यमें चित्रिणी अर्थात् ब्रह्म नाड़ी स्थित है। इसी ब्रह्म नाड़ीके मध्यमें कुण्डलिनी ब्रह्म पर्यन्त जाती है, अतः जहाँ कहीं भी ब्रह्म नाड़ीका नाम आता है उसे चित्रिणी नाड़ी समझना चाहिए अर्थात् चित्रिणी नाड़ीका दूसरा नाम ब्रह्म नाड़ी है। यह सङ्गत है। चित्रिणी नाड़ी आज्ञा चक्रका भी भेदन करनेसे आज्ञा चक्रस्थित प्रणवके प्रकाशसे स्वयं प्रकाशित होती है तथा समस्त कमलोंको भी प्रकाशित करती है; क्योंकि समस्त कमल एकमात्र सूत चित्रिणी नाड़ीसे गुँथे हुए हैं। यह ब्रह्म नाड़ी विशुद्ध ज्ञानस्वरूपा है ॥ २ ॥

यह ब्रह्म नाड़ी विजलीकी माला जैसी प्रकाशमान्, मुनियोंके हृदयमें देदीप्यमान्, तन्तु समान अत्यन्त सूक्ष्म, शुद्धज्ञानका प्रकाश करनेवाली, सर्वानन्दमयी, शुद्धज्ञानको प्रदान करनेवाली है। इसीके मुखमें ब्रह्मद्वार है, जिसमें कि अमृतका धार प्रवाहित होता रहता है। इसी द्वारके समीपवर्ती प्रदेशको ग्रन्थिस्थान कहते हैं। योगी पुरुष इसे सुषुम्णा नाड़ीका मुखप्रदेश कहते हैं।

### मूलाधार चक्रका निरूपण

अथाधारपद्मं सुषुम्णास्यलग्नं
ध्वजाधो गुदोर्ध्वं चतुःशोणपत्रम् ।
अधोवक्त्रमुद्यत्-सुवर्णाभवर्णै-
र्वकारादिसान्तैर्युतं वेदवर्णैः ॥ ४ ॥

### धरामण्डलका स्वरूप

अमुष्मिन् धरायाश्चतुष्कोणचक्रं
समुद्भासि-शूलाष्टकैरावृतं तत् ।
लसत्पीतवर्णं तडित्कोमलाङ्गं
तदन्ते समास्ते धरायाः स्वबीजम् ॥ ५ ॥

---

**विमर्श**—ब्रह्म नाडीके मुखको ब्रह्मद्वार कहते हैं; क्योंकि यह ब्रह्म पर्यन्त गया है। ब्रह्म नाड़ी स्वयम्भू लिङ्गके छिद्रभागमें भी स्थित है। ठीक् स्वयम्भू लिङ्गके ऊपर ब्रह्मद्वार है। ध्यान रहे कि मूलाधार कमल अधोमुख तथा विकसित है, अतः उसमें स्थित स्वयम्भू लिङ्ग भी अधोमुख है। स्वयम्भू लिङ्गके छिद्रके मुखको ब्रह्मद्वार कहते हैं। यहीं तक सहस्रारस्थित ब्रह्मसे अमृतका प्रवाह होता रहता है। इसी द्वारके समीपवर्ती प्रदेशको सुषुम्णा नाड़ीका ग्रन्थिस्थान तथा मुखप्रदेश कहते हैं। इससे स्पष्ट होता है कि मूलाधार कमल सुषुम्णा नाड़ी मात्रके मध्यभागमें स्थित है॥ ३ ॥

सुषुम्णाके मुखसे लगा हुआ लिङ्गमूलसे नीचे तथा गुदाके ऊपर मूलाधार कमल स्थित है। इस कमलका मुख नीचेकी ओर है। इसके चार दल हैं जो कि रक्त-वर्ण हैं। इन चारों दलोंपर उत्तप्त सुवर्णके जैसे वर्णवाले व, श, ष, स—ये चार अक्षर स्थित हैं।

**विमर्श**—सुषुम्णा नाड़ीके मध्यभागमें उसके मुखसे लगा हुआ मूलाधार चक्र स्थित है। समस्तचक्रोंके आधार होनेसे इसे मूलाधार कहते हैं। इस मूलाधार कमल-का मुख नीचेकी ओर है। इसके चार दल हैं। **वेदवर्णैः**-वेद चार हैं; अतः वेद शब्दसे चार संख्याका बोध होता है। इन चारों दलोंपर चार अक्षर—व, श, ष, स स्थित हैं। इनका वर्ण तप्त सुवर्णके समान है। दलोंपर अक्षर-लिखनक्रम दक्षिणावर्त्त होता है और भी समस्त अक्षर अर्धचन्द्र-बिन्दुयुक्त होते हैं; जैसे—वँ, शँ, षँ, सँ ॥ ४ ॥

इस मूलाधार कमलकी कर्णिकाके मध्यमें चार कोणवाला एक पृथ्वीमण्डल है। वह मण्डल आठों दिशाओंसे प्रकाशमान् आठ शूलोंसे घिरा हुआ है। वह मण्डल विजलीके समान पीतवर्ण तथा कोमल अङ्गवाला है। उस पृथ्वीमण्डलके मध्यमें पृथ्वीका अपना बीज 'लँ' स्थित है। इस बीजका वर्ण भी पीत है।

धराबीजका स्वरूप

चतुर्बाहुभूषं गजेन्द्राधिरूढं
तदङ्के नवीनार्कतुल्यप्रकाशः ।
शिशुः सृष्टिकारी लसद्वेदबाहु-
र्मुखाम्भोजलक्ष्मीश्चतुर्भागभेदः ॥ ६ ॥

मूलाधार पद्ममें रहनेवाली डाकिनी शक्तिका स्वरूप

वसेदत्र देवी च डाकिन्यभिख्या
लसद्वेदबाहूज्ज्वला रक्तनेत्रा ।
समानोदितानेक-सूर्य-प्रकाशा
प्रकाशं वहन्ती सदा शुद्धबुद्धेः ॥ ७ ॥

---

विमर्श—यहाँपर मूलाधार कमलमें स्थित पृथ्वीमण्डलके स्वरूपका निरूपण किया गया है । इस कमलकी कर्णिकाके मध्यमें चार कोणवाला एक पृथ्वीमण्डल है । यह मण्डल आठों दिशाओंसे प्रकाशमान् आठ शूलोंसे घिरा है । इसका कोमल अङ्ग विजलीके समान पीत वर्णवाला है । इस मण्डलके मध्यमें पृथ्वीका अपना बीज 'लँ' स्थित है । इसका वर्ण भी विजलीके समान पीत है । यह सुकोमल अङ्गवाला है । यहाँपर 'लसत्पीतवर्णं तडित्कोमलाङ्गम्'का अन्वय मण्डल तथा बीज दोनोंसे है ॥ ५ ॥

चार बाहुवाला वह पृथ्वीबीज ऐरावत हाथीपर आरूढ़ है । उसके गोदमें प्रातःकालीन सूर्यके समान प्रकाशमान् सृष्टिकर्ता ब्रह्मा शिशु रूपमें शोभायमान् है । यह ब्रह्मा चतुर्भुज तथा चतुर्मुख है ।

विमर्श—मूलाधार कमलका अधिष्ठातृदेवता ब्रह्मा है । ब्रह्मा सृष्टिकर्ता, चतुर्मुख तथा चतुर्भुज है । यह ब्रह्मा प्रातःकालीन सूर्यके समान प्रकाशमान् रक्तवर्ण शिशुरूप है ॥ ६ ॥

इस मूलाधार कमलमें डाकिनी नामक देवी रहती है । यह चार भुजावाली, उज्ज्वल वर्णवाली तथा रक्तवर्णके समान नेत्रवाली है । एक ही समयमें उदित अनेक सूर्योंके समान प्रकाशवाली यह देवी सर्वदा तत्त्वज्ञानके प्रकाशका प्रदान करती रहती है ।

विमर्श—मूलाधारकी अधिष्ठात्री देवी डाकिनी शक्ति है । इसकी चार भुजाएँ हैं । यह उज्ज्वल वर्णवाली है तथा इसकी आँखें रक्तवर्णके समान हैं । यह डाकिनी देवी एक ही समयमें उदित अनेक सूर्योंके समान प्रकाशवाली है तथा सर्वदा तत्त्व-ज्ञानका सम्पादन करनेवाली है ॥ ७ ॥

मूलाधार पद्मकी कर्णिकामें स्थित त्रिकोणका स्वरूप

वज्राख्या-वक्त्रदेशे विलसति सततं कर्णिकामध्यसंस्थं
कोणं तत् त्रैपुराख्यं तडिदिव विलसत् कोमलं कामरूपम् ।
कन्दर्पो नाम वायुर्निवसति सततं तस्य मध्ये समन्ताज्-
जीवेशो बन्धुजीवप्रकरमभिहसन् कोटिसूर्यऽऽकाशः ॥ ८ ॥

त्रिकोणके मध्यमें स्थित स्वयम्भु लिङ्गका स्वरूप

तन्मध्ये लिङ्गरूपी द्रुत-कनककला-कोमलः पश्चिमास्यो
ज्ञानध्यानप्रकाशः प्रथमकिसलयाकाररूपः स्वयम्भुः ।
विद्यु त्-पूर्णेन्दुबिम्ब-प्रकरकर-चय-स्निग्ध-सन्तान-हासी
काशीवासी-विलासी विलसति सरिदावर्त्तरूपप्रकारः ॥ ९ ॥

---

वज्रा नाड़ीके मुखप्रदेशमें मूलाधार कमलकी कर्णिकाके मध्यमें त्रिपुरासे सम्बन्धित त्रैपुर नामक त्रिकोण सुशोभित है। यह विजलीके समान प्रकाशमान्, सुस्निग्ध तथा कामरूप है। उस त्रिकोणके मध्यमें सर्वत्र कन्दर्प नामक वायु व्याप्त होकर निवास करता है। यह जीवका धारण करनेवाला, बन्धुक पुष्पोंके समूहका उपहास करनेवाला तथा करोड़ों सूर्यके समान प्रकाशमान् है।

**विमर्श**—वज्रा नाड़ीके मुखप्रदेशमें अर्थात् वज्राके अधोभागमें कमलकी कर्णिकाके मध्यमें एक त्रिकोण है। यह त्रिकोण त्रिपुर सुन्दरीका अधिष्ठान है; अतः यह त्रैपुर नामक कोण कहलाता है। यह त्रिकोण एक योनि है। यह विजलीके समान प्रकाशमान्, अत्यन्त सुस्निग्ध कोमल है। यह योनि मदनागार है। यहांपर कन्दर्प नामक वायु स्थित है अर्थात् काम यहांपर वायु बनकर सर्वदा निवास करता है। यही जीवका धारण करनेवाला है, बधुक पुष्पोंके समूहका उपहास करनेवाला है अर्थात् अत्यधिक रक्तवर्णवाला है तथा करोड़ों सूर्यके समान प्रकाशमान् है ॥ ८ ॥

उस त्रिकोणके मध्यमें तप्त काञ्चनके समान कोमल, अधोमुख, ज्ञान तथा ध्यानसे विदित होनेवाला, नवीन पल्लवके समान रूपवाला, विजली और पूर्णचन्द्रके बिम्बके समूह किरणवृन्दके समान विशिष्ट प्रकाशवाला तथा अत्यन्त स्निग्ध, काशीमें वास करनेवालेके समान सुशोभित, नदीके आवर्तरूपके समान आकारवाला स्वयम्भू लिङ्ग शोभायमान् है।

**विमर्श**—उस त्रिकोण योनिके मध्यमें स्वयम्भू लिङ्ग शोभायमान् है। यह तप्त काञ्चनके समान कोमल अर्थात् अत्यन्त स्निग्ध है। इसका मुख नीचेकी ओर है। यह लिङ्ग ज्ञानके द्वारा निर्गुण रूपसे तथा ध्यानके द्वारा सगुण रूपसे विदित होता है। इसका रूप नवीन पल्लवके समान है अर्थात् श्याम वर्ण है। विजली तथा पूर्णचन्द्रके

स्वयम्भु लिङ्गमें रहनेवाली कुण्डलिनी शक्तिका स्वरूप

तस्योर्ध्वे बिसतन्तुसोदरलसत्सूक्ष्मा जगन्मोहिनी
ब्रह्मद्वारमुखं मुखेन मधुरं सञ्छादयन्ती स्वयम् ।
शङ्खावर्त्तनिभा नवीनचपलामालाविलासास्पदा
सुप्ता सर्पसमा शिवोपरिलसत्सार्द्धत्रिवृत्ताकृतिः ॥ १० ॥
कूजन्ती कुलकुण्डली च मधुरं मत्तालिमालास्फुटं
वाचं कोमल-काव्य-बन्ध-रचना-भेदातिभेद-क्रमैः ।
श्वासोच्छ्वासविभञ्जनेन जगतां जीवो यया धार्यते
सा मूलाम्बुजगह्वरे विलसति प्रोद्दामदीप्तावलिः ॥ ११ ॥

---

बिम्बके समुहोंके समान इसका प्रकाश है। यह काशीमें वास करनेवालेके समान यहाँपर शोभायमान् है अर्थात् इसका स्थान काशी है। और भी **'काशीवासी विलासी'** शब्दसे इसका काशीमें निवास करनेवाला विश्वेश्वर होनेका प्रमाण मिलता है। स्वयम्भू लिङ्गका आकार नदीके जलमें जो जलभ्रम होता है उसीके समान है अर्थात् यह स्वयभूलिङ्ग लम्ब गोलाकार—स्तम्भाकार है, मूलभाग स्थूलाकार तथा अग्रभाग सूक्ष्म है। इसके मध्य में छिद्र है ॥ ९ ॥

उस स्वयम्भू लिङ्गके ऊर्ध्वमें कमलके तन्तुके समान अत्यन्त पतली देहवाली, जगत्को मोहित करनेवाली, ब्रह्मद्वारके मधुर मुखको अपने मुखसे आच्छादित करती हुई, शङ्खके वेष्टनाकारके समान, नवीन विजलीकी मालाकी शोभाके साथ आस्पर्द्धा करनेवाली, साढ़े-तीन लपेटोंसे लिपटी हुई सर्पके समान स्वयम्भू लिङ्गके ऊपर सोयी हुई, मत्त भ्रमरोंकी पंक्तिकी ध्वनिके समान कोमल काव्य, बन्ध, रचना तथा उनके भेद एवं अतिभेद क्रमसे मधुर वाणीका गुञ्जार करती हुई, श्वास तथा उच्छ्वास-रूपी वायुसे जीवका धारण करती हुई वह कुल-कुण्डलिनी उद्दीप्त तेजोमय त्रिबलीके रूपमें मूलाधार कमलकी कर्णिकाके गह्वरमें विलास करती है।

**विमर्श**—प्रस्तुत श्लोकद्वयमें कुल-कुण्डलिनीका निरूपण किया जा रहा है। यह कुण्डलिनी स्वयम्भूलिङ्गके ऊपर कुण्डलाकारसे साढ़े-तीन लपेटोंसे लिपटी सर्पके समान सो रही है। यह कमलके तन्तुके समान-अत्यन्त पतली तथा लम्बी है। हय कुल कुण्डलिनी जगत्को मोहित करनेवाली महामाया है। स्वयम्भू लिङ्ग मूलाधार कमलमें अधोमुख है, अतः कुण्डलिनी भी अधोमुख है, किन्तु यह स्वयम्भू लिङ्गके छिद्रको अपने मुखसे आच्छादित कर रक्खी है। सहस्रारस्थित नित्यानन्द ब्रह्मसे जो अमृतकी धारा स्वयम्भू लिङ्गके छिद्रसे होकर प्रवाहित हो रही है, उसे कुण्डलिनी सर्वदा पी रही है। यह नवीन विजलीकी मालाको भी लज्जित करती हुई सुशोभित हो रही है अर्थात् विजलीसे भी अत्यधिक प्रकाशवाली है। जिस प्रकार मतवाले भौंरोंकी पंक्तिकी ध्वनि

कुण्डलिनीके मध्यमें रहनेवाली पर-शक्तिका स्वरूप

**तन्मध्ये परमा कलाऽतिकुशला सूक्ष्मातिसूक्ष्मा परा**
**नित्यानन्द-परम्परातिविगलत्-पीयूषधारा-धरा ।**
**ब्रह्माण्डादिकटाहमेव सकलं यद्भासया भासते**
**सेयं श्रीपरमेश्वरी विजयते नित्यप्रबोधोदया ॥ १२ ॥**

---

होती है उसी प्रकार कुण्डलिनी भी **कोमलकाव्य**—मृदु शब्दघटित रूप, गुण तथा रसादि वर्णनात्मक वाक्य; **बन्ध**—पद्मबन्ध, अश्वबन्धादि चित्रकाव्य, **रचना**—उनसे भिन्न गद्यपद्यात्मक वाक्य; **भेद**—उनके प्रकार, **अतिभेद**—संस्कृत तथा अन्य वाक्य अर्थात् प्राकृतका समुदाय तथा **क्रम**—शास्त्रव्यवहारके अनुरूप रीतिसे मधुर वाणीका गुञ्जार करती है। यही वाणी वैखरी कहलाती है। इस कुण्डलिनीके श्वास तथा प्रश्वाससे जीव प्राणधारण करता है। **प्रोद्दामदीप्तावलिः**—यह शब्द यहाँपर कटिभाग-में स्थित रेखार्थक है। स्वयम्भू लिङ्गके कटिभागमें यह कुण्डलिनी त्रिवलीके रूपमें शोभायमान है, जो कि अत्यधिक तेजोमयी है। इस प्रकारसे यह मूलाधार कमलकी कर्णिकाके गह्वरमें विलास करती है ॥ १०–११ ॥

उस कुण्डलिनीमें नादरूपा श्रीपरमेश्वरी पर-शक्ति शोभायमान् है, जो कि सूक्ष्मसे भी सूक्ष्म, अत्यन्त कुशल तथा नित्यानन्द ब्रह्मसे क्रमशः क्षरित अमृतके प्रवाह-का ग्रहण करनेवाली है। इसके प्रकाशसे ब्रह्माण्डसे लेकर पिण्ड पर्यन्त सकल जगत् प्रकाशित है तथा इससे नित्य ज्ञानका उदय होता है।

**विमर्श**—प्रस्तुत श्लोकमें कुण्डलिनीमें रहनेवाली पर-शक्तिका निरूपण किया गया है। **तन्मध्ये**—इस शब्दसे यह बोध होता है कि पर-शक्ति कुण्डलिनीसे अभेद-शरीरवाली है। इसका स्वतन्त्र अन्य कोई शरीर नहीं है, अतः यह नादरूपा है। सर्वश्रेष्ठ शक्ति है अतः परमा शक्ति है। इसे पर-शक्ति कहते हैं। **अतिकुशला**—सृष्टिसम्पा-दनमें अत्यन्त कुशल है यह पर-शक्ति। यह सूक्ष्मसे भी सूक्ष्म अर्थात् अत्यन्तसूक्ष्म निराकारा है। **नित्यानन्दपरम्परातिविगलत्पीयूषधाराधरा**—नित्यानन्द ब्रह्म है, उससे निरन्तर क्रमशः झरनेवाले अमृतके प्रवाहका ग्रहण करनेवाली है यह कुण्डलिनी अर्थात् कुण्डलिनी शरीरके माध्यमसे ब्रह्मद्वारके मुखमें अमृतका पान करती है। यहाँपर 'नित्यानन्दपरम्परातिचपलाविद्युल्लतादीधितिः' यदि इस प्रकारका पाठ माना जाय तो 'नित्यानन्दपम्परा'—नित्य आनन्दका निरन्तर बना रहना अर्थात् 'नित्यानन्द-स्वरूपा' तथा 'अतिचपलाविद्युल्लतादीधितिः'—अत्यन्त चञ्चल विजलीकी मालाके समान तेजवाली—ऐसा ही अर्थ करना होगा। 'नित्यानन्दपरम्परा'का अर्थ कुछ विद्वान् इस प्रकार करते हैं—नित्यानन्द निर्गुण ब्रह्म है, उससे सगुणका आविर्भाव है, सगुणसे शक्ति, शक्तिसे नाद, नादसे बिन्दु, बिन्दुसे कुण्डलिनी, कुण्डलिनीका अवा-

### मूलाधार तथा कुण्डलिनी शक्तिके चिन्तनका फल

**ध्यात्वैतन्मूलचक्रान्तर-विवर-लसत्-कोटिसूर्य-प्रकाशां**
**वाचामीशो नरेन्द्रः स भवति सहसा सर्वविद्याविनोदी।**
**आरोग्यं तस्य नित्यं निरवधि च महानन्दचित्तान्तरात्मा**
**वाक्यैः काव्यप्रबन्धैः सकलसुरगुरून् सेवते शुद्धशीलः ॥ १३ ॥**

---

न्तररूप यह चित्कला होती है। इस प्रकारसे यह 'नित्यानन्दपरम्परा'का भाव है। हमारे मतमें तो 'नित्यानन्दपरम्परातिविगलत्पीयूषधाराधरा'—यह कुण्डलिनीका एकशब्दात्मक विशेषण है, जिसका अर्थ इस प्रकारसे होता है—नित्यानन्द ब्रह्मसे पर बिन्दु, बिन्दुसे पर आज्ञा चक्र, आज्ञा चक्रसे पर विशुद्ध चक्र, विशुद्ध चक्रसे पर अनाहत चक्र, अनाहत चक्रसे पर मणिपूर चक्र, मणिपूर चक्रसे पर स्वाधिष्ठान चक्र तथा स्वाधिष्ठान चक्रसे पर मूलाधार चक्र है। इस मूलाधार चक्रके मध्यमें स्वयम्भू लिङ्ग है, स्वयम्भू लिङ्गका छिद्र ब्रह्मद्वार है। इसी ब्रह्मद्वार पर्यन्त नित्यानन्द ब्रह्मसे अमृतका क्षरण होता है। इसी ब्रह्मद्वारके मुखमें कुण्डलिनीके शरीरमें अभेदरूपसे शक्तिरूपसे स्थित श्रीपरमेश्वरी पर-शक्ति अमृतका पान करती है। ब्रह्माण्डादिकटाहमेव–ब्रह्माण्ड तथा पिण्ड दो होते हैं। वृहद् रूपसे ब्रह्माण्ड तथा सूक्ष्म रूपसे पिण्ड–शरीर है; अतः ब्रह्माण्डसे लेकर पिण्ड पर्यन्त सकल पदार्थ उसकी कलासे भासित होते हैं। इसीसे ही नित्य ज्ञानका उदय होता है ॥ १२ ॥

इस मूलाधार चक्र तथा मूलाधार चक्रके गह्वरमें विलास करनेवाली, करोड़ों सूर्योंके समान प्रकाशवाली कुण्डलिनी शक्तिका ध्यानकर वह साधक पुरुषोंमें श्रेष्ठ तथा शीघ्र ही वृहस्पतिके समान समस्त विद्याओंका विनोदी बन जाता है। वह नित्य आरोग्य रहता है तथा अहर्निश ईश्वर चिन्तनसे युक्त विशिष्ट अन्तरात्मा होकर वह शुद्ध स्वभाववाला साधक वाक्य तथा काव्यप्रबन्धोंसे समस्त प्रमुख देवताओंको प्रसन्न कर लेता है।

**विमर्श**—प्रस्तुत श्लोकमें मूलाधार चक्र तथा उसमें स्थित कुण्डलिनी शक्तिके चिन्तनके फल निरूपित हैं। इन दोनोंके चिन्तनसे साधक वृहस्पतिके समान वक्ता तथा सर्वविद्याका ज्ञाता बन जाता है। वह सब दिनके लिए व्याधिमुक्त हो जाता है। उसके अन्तःकरण ईश्वर चिन्तनसे शुद्ध हो जाते हैं। उसमें एक विशेष प्रकारकी योग्यता आ जाती है, जिससे स्वरचित काव्य तथा प्रबन्ध आदि स्तुतिसे समस्त श्रेष्ठ देवताएँ अर्थात् ब्रह्मा, विष्णु तथा महेश प्रसन्न हो जाते हैं, अर्थात् उसकी वाणी मन्त्रस्वरूपा बन जाती है। निष्कर्ष यह है कि साधकको शारीरिक तथा मानसिक दोनों प्रकारकी शक्ति तथा शान्तिकी प्राप्ति हो जाती है ॥ १३ ॥

स्वाधिष्ठान चक्रका निरूपण

सिन्दूर-पूर-रुचिरारुण-पद्ममन्यत्
सौषुम्णमध्यघटितं ध्वजमूलदेशे ।
अङ्गच्छदैः परिवृतं तडिदाभवर्णै-
र्बाद्यैः सबिन्दुलसितैश्च पुरन्दरान्तैः ॥ १४ ॥

अम्भोजमण्डलका स्वरूप

तस्यान्तरे प्रविलसद् विशद-प्रकाश-
मम्भोजमण्डलमथो वरुणस्य तस्य ।
अर्द्धेन्दुरूपलसितं शरदिन्दुशुभ्रं
वङ्कारबीजममलं मकराधिरूढम् ॥ १५ ॥

---

लिङ्गके मूलप्रदेशमें स्थित वज्रा नाड़ीके मध्यभागमें निर्मित सुन्दर, कोमल, सिन्दूरके समान अरुण वर्णका छः दलवाला एक अन्य कमल सुशोभित है । इसे स्वाधिष्ठान कहते हैं । इस कमलके दलोंमें विजलीके समान प्रकाशवाले बिन्दुयुक्त 'ब'से लेकर 'ल' तक अक्षर सुशोभित हैं ।

**विमर्श**––मूलाधार चक्रके निरूपणके अनन्तर स्वाधिष्ठान चक्रका निरूपण किया गया है । यह स्वाधिष्ठान चक्र लिङ्गके मूलप्रदेशमें स्थित है । **सौषुम्णमध्यघटितम्**—इस शब्दसे विदित होता है कि स्वाधिष्ठान चक्र वज्रा नाड़ीके मध्यभागमें हैं; क्योंकि—'सुषुम्णाया इदं सौषुम्णम्, तन्मध्ये घटितम्, सौषुम्णमध्यघटितम्'के अनुसार वज्रा नाड़ीके मध्यभागमें स्वाधिष्ठान कमल स्थित है । अब यहाँसे आगेके कमल वज्रा नाड़ीके मध्यभागमें चित्रिणी नाड़ीके द्वारा गुँथे हुए हैं । इसीलिए उपर्युक्त पदका प्रयोग किया गया है । यह पद्म अत्यन्त सुन्दर, सिन्दूरके समान अरुण वर्णवाला है । **अङ्गच्छदैः**––वेदाङ्ग छः हैं, अतः 'अङ्ग' शब्दसे छ संख्याका बोध होता है, अतः इस कमलके छः दल हैं । इन छहों दलोंपर विजलीके समान प्रकाशमान् बँ, भँ, मँ, यँ, रँ, लँ—ये छः अक्षर सुशोभित हैं । 'पुरन्दर'का अर्थ है लकार ॥ १४ ॥

स्वाधिष्ठान चक्रकी कर्णिकाके मध्यमें शुक्लवर्ण, अर्धचन्द्राकार एक जलका मण्डल है । उस जलमण्डलके मध्यमें निर्मल शरत्कालीन चन्द्रमाके समान शुभ्र, मकरके ऊपर बैठा हुआ अर्धचन्द्राकार वरुणबीज 'वँ' शोभायमान हो रहा है ।

**विमर्श**––स्वाधिष्ठान चक्रकी कर्णिकाके मध्यमें एक जलमण्डल है । 'अम्भसि जातम् अम्भोजम्'के अनुसार इस मण्डलका उत्पन्न जलमें ही है अर्थात् यह जल-

### वरुणबीजबिन्दुवर्ती विष्णुका स्वरूप

तस्याङ्कदेश-कलितो हरिरेव पायात्
नील-प्रकाश-रुचिर-श्रियमादधानः ।
पीताम्बरः प्रथम-यौवन-गर्वधारी
श्रीवत्स-कौस्तुभ-धरो धृतवेदबाहुः ॥ १६ ॥

### स्वाधिष्ठान पद्ममें रहनेवाली राकिणी शक्तिका स्वरूप

अत्रैव भाति सततं खलु राकिणी सा
नीलाम्बुजोदर-सहोदर-कान्ति-शोभा ।
नानायुधोद्यत-करैर्लसिताङ्ग-लक्ष्मी-
र्दिव्याम्बराभरण-भूषित-मत्त-चित्ता ॥ १७ ॥

---

मण्डल है, जिसप्रकार कि मूलाधारमें पृथ्वीमण्डल है। इसीप्रकार पाँचों तत्त्वोंके पाँच मण्डल होंगे। इस जलमण्डलका आकार अर्धचन्द्रके समान है। यह मण्डल शुभ्र वर्णका है। 'अर्द्धेन्दुरूपलसितम्' तथा 'शरदिन्दुशुभ्रम्' ये दोनों शब्द मण्डल तथा बीज दोनोंके विशेषण हैं। ध्यान रहे कि मण्डलके अनुसार बीजका भी वर्ण होता है, अतः जलमण्डल शुभ्र है तथा 'वँ' बीज जो कि वरुणका बीज है शुभ्र है। जलका अधिष्ठातृदेवता वरुण है अतः जलका बीज अर्थात् वरुणका बीज 'वँ' है। वरुणका वाहन मकर है अत 'वँ' बीजका वाहन भी मकर है ॥ १५ ॥

उस वरुण बीजके गोदमें स्थित हरि सबकी रक्षा करे, कि जिसने नील तेज-पुञ्जकी कान्ति, पीतवस्त्र, प्रथम यौवनके गर्व, श्रीवत्स चिह्न तथा कौस्तुभका धारण किया है एवं जो चार भुजाओंसे युक्त है।

**विमर्श**—स्वाधिष्ठान चक्रका अधिष्ठातृदेवता हरि—विष्णु है। यह विष्णु वरुण बीज 'वँ'के गोदमें स्थित है। यह विष्णु पीतवस्त्रका धारण करनेवाला है। इसकी चार भुजाएँ हैं, शरीरका वर्ण नील कमलके समान श्यामल है, हृदयमें श्रीवत्स चिह्न तथा कौस्तुभ मणि शोभायमान् है। यह विष्णु प्रथम यौवनके गर्वका धारण करनेवाला है अर्थात् अत्यन्त नव यौवनका धारण करनेवाला है ॥ १६ ॥

इसी पद्ममें राकिणी नामक देवी शोभायमान् है। वह नील कमलके समान कान्तियुक्त शरीरवाली, नाना प्रकारके आयुधोंको धारण की हुई चारभुजाओंसे सुशोभित अङ्गवाली, दिव्य वस्त्र तथा आभरणसे अलंकृत, प्रसन्न चित्तवाली है।

**विमर्श**—स्वाधिष्ठान चक्रकी अधिष्ठात्री देवी राकिणी शक्ति है। यह विष्णुके वाम पार्श्वमें स्थित है। इसके शरीरकी शोभा नील कमलके समान श्याम है। इसकी चार भुजाएँ हैं, जिनमें कि इसने शूल, कमल, डमरु तथा तीक्ष्ण टङ्क धारण किये हैं। दिव्य वस्त्र तथा दिव्य आभरणसे यह अलंकृत है, मत्तचित्ता—प्रसन्न चित्तवाली है ॥

स्वाधिष्ठान चक्रके चिन्तनका फल

स्वाधिष्ठानाख्यमेतत् सरसिजममलं चिन्तयेद् यो मनुष्य-
स्तस्याऽहङ्कार-दोषादिक-सकलरिपुः क्षीयते तत्क्षणेन ।
योगीशः सोऽपि मोहाद्भुत-तिमिरचये भानुतुल्यप्रकाशो
गद्यैः पद्यैः प्रबन्धैर्विरचयति सुधावाक्यसन्दोहलक्ष्मीः ॥ १८ ॥

मणिपूर चक्रका निरूपण

तस्योर्ध्वे नाभिमूले दशदल-लसिते पूर्णमेघ-प्रकाशे
नीलाम्भोजप्रकाशैरुपहितजठरे डादिफान्तैः सचन्द्रैः ।
ध्यायेद् वैश्वानरस्याऽरुणमिहिरसमं मण्डलं तत् त्रिकोणं
तद्बाह्ये स्वस्तिकाख्यैस्त्रिभिरभिलसितं तत्र वह्नेः स्वबीजम् ॥१९॥
ध्यायेन्मेषाधिरूढं नवतपननिभं वेदबाहूज्ज्वलाङ्गम् ॥ १९½ ॥

---

जो मनुष्य इस निर्मल स्वाधिष्ठान नामक पद्मका चिन्तन करता है, उसके अहंकारादि दोषरूप समस्त शत्रु तत्काल ही नष्ट हो जाते हैं । वह योगियोंमें श्रेष्ठ हो जाता है तथा मोहरूपी अन्धकारके समूहमें सूर्यके समान प्रकाशमान् हो जाता है; गद्य, पद्य तथा प्रबन्धोंसे अमृत वाक्यसमूह रूपी सम्पत्तिको प्राप्त कर लेता है ।

**विमर्श**—प्रस्तुत श्लोकमें स्वाधिष्ठान चक्रके चिन्तनका फल निरूपित है । स्वाधिष्ठान चक्रका चिन्तन करनेवाले पुरुषके काम, क्रोध, लोभ, मोह, मद, मात्सर्य—ये छः शत्रु तत्काल नष्ट हो जाते हैं । वह पुरुष योगियोंमें श्रेष्ठ होता है, मोहरूपी अन्धकारके विनाशमें सूर्यके समान प्रकाशवाला हो जाता है । वह पुरुष गद्य, पद्य तथा प्रबन्धकी रचनासे अमृत वाक्यसमूहरूपी सम्पत्तिका उपभोग करता है ॥ १८ ॥

